कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ।।

## [प्रथमो विभागः]

[प्रथमाऽध्यायस्य प्रथमपादतः आरभ्य द्वितीयाऽध्यायस्य प्रथमपादपर्यन्तम्]

सम्पादक : मुनि विमलकीर्तिविजयः



प्रकाशक

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि- अहमदाबाद.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम् ॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## [प्रथमो विभागः]

[प्रथमाऽध्यायस्य प्रथमपादतः आरभ्य द्वितीयाऽध्यायस्य प्रथमपादपर्यन्तम्]

सम्पादक : मुनि विमलकीर्तिविजयः



श्रीहेमचन्द्राचार्य

प्रकाशक

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.

ई. २००८. वि. सं. २०६५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्री सिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका दुण्ढिका (प्रथमो विभागः) ।**

सम्पादक : **मुनि विमलकीर्तिविजयः ।**

प्रकाशक : **कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि**
अहमदाबाद

ई.सं. २००८ । वि.सं. २०६५ । वीर नि.सं. २५३५

प्रथमावृत्तिः प्रतय : २५०

आर्थिक सहयोग : श्रेष्ठीवर्य श्रीकस्तूरभाई लालभाई स्मारक निधि, अहमदाबाद

प्राप्तिस्थान : (१) श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर,
१२, भगतबाग, नवा शारदामंदिर रोड,
शेठ आणंदजी कल्याणजीनी पेढी पासे,
पालडी, अहमदाबाद-३८०००७.
फोन : २६६२२४६५

(२) सरस्वती पुस्तक भण्डार
११२, हाथीखाना, रतनपोल,
अहमदाबाद-३८०००१.
फोन : २५३५६६९२

मूल्यम् : रू. २५०/-

मुद्रक : क्रिष्ना ग्राफिक्स
९६६, नारणपुरा जूना गाम, नारणपुरा,
अहमदाबाद-१३. फोन : २७४९४३९३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## સમર્પણ

કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્યના
વિશ્વોપકારક
વ્યાકરણગ્રંથના વિવરણનો
આ ગ્રંથ તેઓશ્રીના જ
ચરણકમલોમાં
ભાવપૂર્વક સમર્પણ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## પ્રકાશકીય નિવેદન.....

પરમપૂજ્ય આચાર્યશ્રી વિજયસૂર્યોદયસૂરીશ્વરજી મહારાજની શુભ ભાવના તેમજ પ્રેરણાથી વિ.સં. ૨૦૪૫ના વર્ષે સ્થપાયેલ, કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય ભગવંતના નામ સાથે જોડાયેલ આ ટ્રસ્ટે, પૂજ્ય આચાર્યશ્રીના શિષ્ય આચાર્યશ્રીવિજયશીલચન્દ્રસૂરિજી મહારાજના માર્ગદર્શનમાં અનેક સાહિત્યિક પ્રવૃત્તિઓ કરી છે. તેમાં આપણા મૂર્ધન્ય વિદ્વજ્જનોને 'શ્રી હેમચન્દ્રાચાર્ય ચન્દ્રક' અર્પણ કરી તેમનું બહુમાન કરવામાં આવે છે. વિદ્વજ્જનોને આમંત્રણ આપીને વિવિધ વિષયો પર પરિસંવાદ અને સંગોષ્ઠીનું આયોજન થાય છે અને પ્રાચીન સાહિત્યના ગ્રંથોનું સંશોધન-સંપાદન કરાવવાપૂર્વક તેનું પ્રકાશન કરવામાં આવે છે. આજ પર્યંત આ ટ્રસ્ટના આશ્રયે આવા અનેક ગ્રંથોનું પ્રકાશન થયેલ છે, જે જૈન સંઘમાં જ નહિ પણ દેશ-વિદેશના અસંખ્ય વિદ્વાનોમાં પણ પ્રશંસાપાત્ર તથા ઉપાદેય બનેલા છે. 'अनुसन्धान' નામે એક શોધપત્રિકા પણ આ ટ્રસ્ટના ઉપક્રમે પ્રકાશિત કરવામાં આવે છે, જેના અદ્યાવધિમાં ૪૫ અંકો થઈ ચુક્યા છે.

આજે આ ટ્રસ્ટના ઉપક્રમે શ્રી હેમચન્દ્રાચાર્યના सिद्धहेम व्याकरण ઉપર લખાયેલા ढुण्ढिका નામના અપ્રગટ વિવરણનો પ્રથમ ગ્રંથ, પ્રથમ વખત જ પ્રકાશિત થઈ રહ્યો છે, જેનો અમને આનંદ છે. આ ગ્રંથનું હસ્તલિખિત પ્રતિઓ પરથી પ્રતિલિપિ-લેખન તેમજ સંપાદન, પૂજ્ય આ. શ્રીવિજયશીલચન્દ્રસૂરિમહારાજના શિષ્ય મુનિરાજ શ્રીવિમલકીર્તિવિજયજી મહારાજે કરેલ છે. આવું સરસ કાર્ય કરવા બદલ તેઓ અભિનંદનના અધિકારી છે.

શ્રી હેમચન્દ્રાચાર્યના ગ્રંથ પરની અપ્રકાશિત ટીકાના ગ્રંથના પહેલા ભાગનું પ્રકાશન કરવાનો લાભ અમારા ટ્રસ્ટને સાંપડ્યો, તે અમારું સદ્ભાગ્ય છે. અમો આશા રાખીએ છીએ કે બાકીના ભાગ પણ આ જ રીતે તૈયાર થશે અને તેના પ્રકાશનનો લાભ પણ અમોને-અમારા ટ્રસ્ટને જ પ્રાપ્ત થશે.

પ્રસ્તુત પુસ્તકના પ્રકાશનમાં ''શેઠશ્રી કસ્તુરભાઈ લાલભાઈ સ્મારક નિધિ'' તરફથી આર્થિક સહયોગ ટ્રસ્ટને પ્રાપ્ત થયો છે તે બદલ ટ્રસ્ટ તેઓનો આભાર માને છે.

લિ.
ક.સ.શ્રી હેમચન્દ્રાચાર્ય નવમજન્મ શતાબ્દી
સ્મૃતિ સંસ્કાર-શિક્ષણનિધિ
અમદાવાદ

વિ.સં. ૨૦૬૫
કાર્તિક શુદિ પૂનમ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# સંપાદકીય નિવેદન

કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય મહારાજે ગૂર્જરેશ્વર સિદ્ધરાજ જયસિંહની પ્રેરણાથી વિ.સં. ૧૧૯૪ માં સંસ્કૃતભાષાનો બોધ સુગમતાથી થઈ શકે તેવા, સૂત્રપાઠ-ઉણાદિવૃત્તિ - લિંગાનુશાસનાદિ પાંચ અંગવાળું ''સિદ્ધહેમચન્દ્રશબ્દાનુશાસન'' નામના વ્યાકરણની રચના કરી હતી. કલિકાલસર્વજ્ઞે રચેલા વ્યાકરણ પૂર્વે સંસ્કૃતભાષાનો બોધ થાય તેવા શુભાશયથી આપિશલિ-કાશ્યપ-ગાર્ગ્ય-ગાલવ-ચાક્રવાણી-ભારદ્વાજ-શાકટાયન-પાણિનીય-કાત્યાયન-ચંદ્રગોમી આદિ અનેક વૈયાકરણીઓએ સ્વ-સ્વસમયે જુદા જુદા નામવાળા વ્યાકરણો રચ્યાં હતાં. તે તમામ વ્યાકરણોની તુલનામાં કલિકાલસર્વજ્ઞે રચેલું વ્યાકરણ મુકુટસમાન શોભતું હતું. કલિકાલસર્વજ્ઞે એકલે હાથે એક જ વર્ષમાં વ્યાકરણના પાંચે અંગોની તથા લઘુવૃત્તિ (૬૦૦૦ શ્લોક) - તત્ત્વપ્રકાશિકા નામની બૃહદ્વૃત્તિ (૧૮૦૦૦ શ્લોક) - શબ્દમહાર્ણવન્યાસ (૮૪૦૦૦ શ્લોક)ની રચના કરી હતી. તે રચનામાં વૃત્તિમાં જણાવેલા અર્થ કઈ રીતે સૂત્રમાંથી નિષ્પન્ન થાય, પૂર્વસૂત્રની અનુવૃત્તિ, અનુવર્તમાનસૂત્રની નિવૃત્તિ, એકવચન-બહુવચનાદિના ફળ, ઉદાહરણ-પ્રત્યુદાહરણગત અભિનવ શબ્દોની સાધનિકા- તેને લગતી ચર્ચા-સમન્વય-અવતરણ-ઉપસંહારાદિનો સમાવેશ કર્યો હતો.

વિ.સં. ૧૭૧૦માં મહોપાધ્યાય વિનયવિજયજી મહારાજે કલિકાલસર્વજ્ઞે રચેલા સૂત્રોને આધારે સાધનિકાના ક્રમ પ્રમાણે સૂત્રોની ગોઠવણી કરી હૈમલઘુપ્રક્રિયા નામે વ્યાકરણની રચના કરી હતી, તે બાળ જીવોને ઉપયોગી બનતી હતી પણ બૌદ્ધિક શક્તિનો વિકાસ થાય તે માટે કલિકાલસર્વજ્ઞે રચેલા સિદ્ધહેમચન્દ્રશબ્દાનુશાસનનું અધ્યયન કરવું-કરાવવું અત્યુત્તમ છે.

કલિકાલસર્વજ્ઞ હેમચન્દ્રાચાર્ય મહારાજે રચેલા વ્યાકરણમાં રહેલા ગૂઢતર-ગૂઢતમ રહસ્યો પર ઊંડાણપૂર્વક અભ્યાસ-અવગાહન-અવલોકન કરી કોઈક વ્યાકરણવિશારદે ઢુંઢિકાની રચના કરી હતી. ઢુંઢિકાકારે ઢુંઢિકાની રચના કરતાં કરતાં વ્યાકરણના સૂત્રોમાં રહેલા મૂળ શબ્દોની તથા સૂત્રોમાં આપેલા ઉદાહરણ-પ્રતિઉદાહરણોમાં કયો ધાતું છે - કેવો છે - કયા કયા અનુબંધો લોપ થયા છે- કયા અર્થમાં કયો પ્રત્યય લાગ્યો છે - કયા પ્રત્યયની પ્રાપ્તિ હતી - પ્રત્યય લાગ્યા પછી ગુણ-વૃદ્ધિ સંબંધી કયા કયા ફેરફારો થયા - કયા ન્યાયસંગ્રહના સૂત્રોથી કયા કયા ફેરફારો થયા - કયો સમાસ થયો - કઈ વિભક્તિ લાગી - કઈ રીતે વિભક્તિનો લોપ થયો વિગેરે અનેક હકીકતો સુંદર શૈલીમાં અતિવિસ્તૃત વર્ણવી છે. સિદ્ધહેમચન્દ્રશબ્દાનુશાસન વ્યાકરણનું અધ્યયન કરનાર - કરાવનારને શરૂઆતથી જ સરળતા અનુભવાય - રૂચિ જાગે - ઉત્સાહ વધે તેવા શુભાશયથી અજ્ઞાતકર્તૃકા ઢુંઢિકાનું સંપાદન કર્યું છે. ભોયણી તીર્થમંડન મલ્લિનાથ ભગવાનની પરમ પાવનકારી શીતલછાયામાં સંપાદન કાર્યની શુભ શરૂઆત કરી હતી. સાતે અધ્યાયનું સંપૂર્ણ પ્રેસમેટર તૈયાર કરવામાં લગભગ ત્રણ વર્ષ જેટલો સમય લાગ્યો હતો. સંપાદન કાર્ય કરતાં કરતાં અનેક પ્રશ્નો ઉદ્ભવ્યા હતા, તે પ્રશ્નોના સમાધાન માટે વ્યાકરણવિશારદ પંડિતવર્ય છબીલદાસ કેશરીચંદ સંઘવીને વિનંતિ કરી હતી પણ તેમનું સ્વાસ્થ્ય સ્વસ્થ-સાનુકૂળ ન હોવાથી તેમણે પંડિત જગદીશભાઈ સી. શાહને ભલામણ કરી, તેમણે તેમની મતિ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ક્ષયોપશમના આધારે શક્ય તેટલા સમાધાનો કરી આવ્યાં હતાં.

શ્રી હેમચન્દ્રાચાર્ય જૈન. જ્ઞાનમંદિર (પાટણ)ના ભંડારમાં રહેલી ''સિદ્ધહેમશબ્દાનુશાસન બૃહદ્‌વૃત્તિ ઢુંઢિકા પંચમાધ્યાય પર્યંત'' (ચતુષ્ક-આખ્યાત-કૃદ્‌વૃત્તિઢુંઢિકા), પત્ર-૩૫૭, ડા. ૯૭, નં. ૨૪૦૦ તથા કાંતિવિજયજી મહારાજ સંગૃહીત જ્ઞાનભંડાર (જાની શેરી-વડોદરા)માં રહેલી ''સિદ્ધહેમશબ્દાનુશાસન ઢુંઢિકાવૃત્તિ-પંચમાધ્યાયપર્યંત'', પત્ર-૨૯૫, પ્રત નં. ૨૦૨૦ પ્રતિને આધારે સંપાદન કાર્ય કર્યું છે.

પ્રતના અંતિમપત્રમાં ગ્રંથકર્તાના નામનો ઉલ્લેખ ન હોવાથી ઢુંઢિકા અજ્ઞાતકર્તૃકા હશે તેવું અનુમાન કરી અજ્ઞાતકર્તૃકા ઢુંઢિકા એવું નામ આપ્યું છે. અંબાલાલ પ્રેમચંદ શાહે બૃહન્યાસના પહેલા અધ્યાયના ઉપોદ્‌ઘાતમાં ''સિધ્ધહેમવ્યાકરણ પરના ટીકા ગ્રંથોમાં'' વિ.સં. ૧૫૯૧માં સૌભાગ્યસાગર મહારાજે હૈમબૃહદ્‌વૃત્તિ ઢુંઢિકાની રચના કરી હતી તેવો ઉલ્લેખ કર્યો છે, તેથી સૌભાગ્યસાગર મહારાજે રચેલી ઢુંઢિકા આ જ છે કે બીજી છે તે સંશોધનનો વિષય બની રહે છે.

અકારાદિ ક્રમે ઉદાહરણોની જે સૂચિ આપવામાં આવી છે તેમાં સૂત્રોની અંદર આવેલા-આપેલા ઉદાહરણોનો જ નિર્દેશ કર્યો છે. મૂળ સૂત્રમાં રહેલાં શબ્દોનો તથા શ્લોકમાં રહેલા શબ્દોનો નિર્દેશ કર્યો નથી. જેમકે **प्रणम्य परमात्मानं.....** શ્લોકમાં **प्रणम्य** આદિ શબ્દો છે પણ તેનો અકારાદિ ક્રમની સૂચિમાં ઉલ્લેખ કર્યો નથી. તથા ''**सिद्धिः स्याद्वादात्**'' ૧।૧।૨ સૂત્રમાં **सिद्धिः** આદિ શબ્દોની સાધનિકા આપી છે પણ તેનો અકારાદિ ક્રમની સૂચિમાં ઉલ્લેખ કર્યો નથી.

ઉદાહરણમાં રહેલા જે શબ્દોની સાધનિકા એક વાર આપી હોય તે જ શબ્દ બીજીવાર આવતો હોય ત્યારે ત્યાં તે શબ્દની સાધનિકા સંપૂર્ણ લખી નથી પણ સૂત્રક્રમાંક લખી અતિદેશ કર્યો છે - ગ્રંથ લાઘવ માટે. જેમકે સૂત્રક્રમાંક ૧।૧।૨૬ માં ''**धर्मो वो रक्षतु**'' ઉદા. છે. **धर्मः** શબ્દની સાધનિકા સૂત્રક્રમાંક ૧।૧।૨૦ માં ''**धर्मो वः स्वम्**'' શબ્દ આગળ ૧।૧।૨૦ સૂત્રક્રમાંકનો અતિદેશ કર્યો છે. તે રીતે બીજે બધે પણ સમજી લેવું.

ધાતુપારાયણમાં આપેલા ધાતુક્રમાંક અનુસારે જ ધાતુક્રમાંક આપવામાં આવ્યા છે.

જ્યાં જ્યાં શંકાસ્પદ સ્થાનો દષ્ટિગોચર થયા ત્યાં ત્યાં (?) પ્રશ્નાર્થ ચિહ્ન કરી તેની બાજુમાં જ ( ) આવું ચિહ્ન કરી યોગ્ય જણાતાં સૂત્રોનો ઉલ્લેખ કર્યો છે.

હેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર-પાટણથી પ્રાપ્ત થયેલી પ્રતિને આધારે પાઠાંતરો આવ્યા છે ત્યાં P. સંજ્ઞા કરી છે. મુદ્રિત પુસ્તકોને આધારે પાઠાંતરો આપ્યા છે ત્યાં તે તે પુસ્તકોના નામનો નિર્દેશ કર્યો છે.

સંપાદન કાર્યમાં શાસનસમ્રાટ વિજયનેમિસૂરીશ્વરજી મ.સા. ના સમુદાયના ગચ્છાધિપતિ પરમપૂજ્ય વિજય સૂર્યોદયસૂરીશ્વરજી મ.સા. તથા પરમ પૂજ્ય વિજય શીલચન્દ્રસૂરીશ્વરજી મ. સા.ની પ્રેરણા સતત મળતી હતી. તેમના આશીર્વાદથી જ સંપાદન કાર્ય કરી શક્યો છું.

સંપાદન કાર્યમાં ક્યાંય પણ ક્ષતિ રહી ગઈ હોય તો તે સુધારી લેવા વિનંતિ. સંપાદન કાર્યમાં પ્રત્યક્ષ-પરોક્ષ સહભાગી બનનાર સર્વેની અનુમોદના.

**મુનિ વિમલકીર્તિવિજય**

શેઠ હઠીસિંગ કેસરસિંહ જૈન ઉપાશ્રય
દિલ્હી દરવાજા બહાર,
અમદાવાદ-૩૮૦૦૦૪
જ્ઞાનપંચમી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ।। सम्पादनोपयुक्तग्रन्थसूचिः ।।

(१) श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।
[स्वोपज्ञतत्त्वप्रकाशिकाभिधानबृहद्वृत्ति-स्वोपज्ञशब्दमहार्णवन्यास-श्रीकनकप्रभसूरिरचितन्याससारसमुद्धार संवलितम्]
प्रथमोऽध्यायः - द्वितीयोऽध्यायः-पञ्चमोऽध्यायः ।
बृहन्न्यासानुसन्धानकारः - सम्पादकश्च - आ० श्रीमद्विजयलावण्यसूरीश्वरः ।

(२) श्रीहेमचन्द्राचार्यरचिता अभिधानचिन्तामणिनाममाला ।

(३) श्रीमद्विजयलावण्यसूरिप्रणीतो धातुरत्नाकरः [भाग १ थी ७]

(४) श्रीहेमचन्द्रसूरिभगवद्भिरचितं धातुपारायणम् ।

(५) श्रीहैमव्याकरणसत्का श्रीउणादिगणविवृत्तिः ।

(६) आचार्यश्रीगुणरत्नसूरिविरचितः क्रियारत्नसमुच्चयः ।

(७) श्रीहेमहंसगणिविरचितः न्यायसंग्रहः ।

(८) श्रीअमरचन्द्रसूरिविरचितः अवचूरिसमेतः स्यादिशब्दसमुच्चयः ।

(९) कृत्प्रत्ययानां महायन्त्रम् । रचयिता - श्रीमद्विजयलावण्यसूरीश्वरः ।

(१०) सिद्धहेमशब्दानुशासनं स्वोपज्ञमध्यमवृत्त्यवचूरिभ्यामलङ्कृतम् । चतुष्कवृत्तिपर्यन्तः प्रथमो विभागः ।

(११) हैमकृदन्तश्रेणिः । सम्पादिका-साध्वी श्रीअमीरत्नाश्रीजी ।

(१२) शब्दरत्नमहोदधिः १-२-३ । संकलनकर्त्ता - पंन्यासप्रवरमुक्तिविजयो गणिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ।। विषयानुक्रमः ।।

प्रथमाऽध्यायस्य प्रथमः पादः । संज्ञाप्रकरणम् ।

सूत्रसंख्या - ४२ । पत्रांकः - १-२३ ।

प्रथमाऽध्यायस्य द्वितीयः पादः । स्वरसन्धिप्रकरणम् ।

सूत्रसंख्या - ४१ । पत्रांकः - २४-४४ ।

प्रथमाऽध्यायस्य तृतीयः पादः । व्यञ्जनसन्धिप्रकरणम् ।

सूत्रसंख्या - ६५ । पत्रांकः - ४५-८७ ।

प्रथमाऽध्यायस्य चतुर्थः पादः । स्यादिप्रकरणम् ।

सूत्रसंख्या - ९३ । पत्रांक : ८८-१३५ ।

द्वितीयाऽध्यायस्य प्रथमः पादः । स्यादिप्रकरणम् ।

सूत्रसंख्या - ११८ । पत्रांकः १३६-२२० ।

अकारादिवर्णक्रमेण सूत्रान्तर्गतोदाहरणसूचिः । पत्रांकः २२१-२४२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं
## श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुंढिका ॥

## ॥ अथ प्रथमाऽध्यायस्य प्रथमः पादः ॥

**प्रणम्य परमात्मानं, श्रेयःशब्दानुशासनम् ।**
**आचार्यहेमचन्द्रेण, स्मृत्वा किञ्चित् प्रकाश्यते ॥**

**[प्रणम्य]** 'प्रांक् पूरणे' (१०७२) प्रा । प्राप्नोति = पूरयति उत्कृष्टाद्यर्थमिति प्र । 'क्वचित्' (५।१।१७१) डप्र० —> अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आकारलोपः । 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । 'धातोः पूजार्थस्वति०' (३।१।१) प्रपूर्वकम् । प्रणमनं पूर्वं = प्रणम्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० —> त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् —> य । प्रथमैकवचनं सि । 'अदुरुपसर्गान्तरो०' (२।३।७७) नस्य णत्वम् । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[परमात्मानम्]** 'पृश् पालनपूरणयोः' (१५३२) पृ । पृणाति = लब्धमर्थं पालयति, अलब्धमर्थं पूरयतीति परम । 'सृ-पृ-प्रथि-चरि-कडि- कर्देरमः' (उणादि-३४७) अमप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अत सातत्यगमने' (२७९) अत् । अतति = सातत्येन गच्छति तांस्तान् पदार्थान् इति आत्मा । 'सात्मन् - आत्मन् - वेमन्०' (उणादि-९१६) मन्प्रत्यये आत्मन् इति निपातः । परमश्चासौ आत्मा च = परमात्मा, तम् = परमात्मानम् । 'कर्मणि' (२।२।४०) द्वितीयैकवचनं अम् । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[श्रेयः]** 'शंसू स्तुतौ च' (५५०) शंस्, प्रपूर्वकम् । प्रशस्यते इति प्रशस्यम् । 'कृ-वृषि-मृजि-शंसि०' (५।१।४२) क्यप्प्र० —> य । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । इदं पूर्वाचार्यप्रणीतं व्याकरणजातं प्रशस्यमिदं च नवतरप्रारभ्यमाणव्याकरणं प्रशस्यमिदमनयोर्मध्येऽतिशयेन प्रशस्यं = श्रेयः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० —> ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) इत्यनेनाऽकारलोपप्राप्तौ 'नैकस्वरस्य' (७।४।४४) इत्यनेन निषेधः । 'प्रशस्यस्य श्रः' (७।४।३४) प्रशस्यस्थाने श्रादेशः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अ० —> ए० । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[शब्दानुशासनम्]** 'शर्पी आक्रोशे' (९१६) शप् । शपति = आक्रोशति दुरुच्चारकमिति शब्दः । 'शा-शपि-मनि-कनिभ्यो दः' (उणादि-२३७) दप्र० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) प० —> ब० ।

'शासूक् अनुशिष्टौ' (१०९५) शास्, अनुपूर्वकम् । अनुशास्यन्ते = व्युत्पाद्यन्ते शब्दा अनेनेति अनुशासनम् । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० —> अन । 'लोकात्' (१।१।३) संहिता । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम् । 'समानादमोतः' (१।४।४६) अमोऽकारलोपः । शब्दानामनुशासनं = शब्दानुशासनम् ।

**[आचार्य]** 'चर भक्षणे च' (४१०) चर्, आङ्पूर्वकम् । आचर्यते = सेव्यते विनयार्थं विद्याग्रहणार्थं वा शिष्यैः इति आचार्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः = चार् ।

**[हेमचन्द्रेण]** 'हिंट् गति-वृद्धयोः' (१२९५) हि । हिनोति = गमयति स्वावतस्य वृद्धिमिति हेमः । 'क्षु-हिभ्यां वा' (उणादि- ३४१) मप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ए । 'चदु दीप्त्याह्लादयोः' (३१३) चद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः = चन्द् । चन्दति = आह्लादयति जगज्जननयनमनांसीति चन्द्रः । 'भी-वृधि-रुधि-कन्य०' (उणादि-३८७) रप्र० । हेम इव कान्तिमत्त्वाद् हेमः । चन्द्र इव आह्लादकत्वात् चन्द्रः । हेमश्चासौ चन्द्रश्च = हेमचन्द्रः, आचार्यश्चासौ हेमचन्द्रश्च = आचार्यहेमचन्द्रः, तेन, तृतीयैक० टा → आ । 'टा-ङसोरिन-स्यौ' (१।४।५) आ → इनादेशः । अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अकारस्य इकारेण सह एत्वम् । 'र-षृवर्णान्नो ण०' (२।३।६३) नस्य णत्वम् ।

**[स्मृत्वा]** 'स्मृं चिन्तायाम्' (१८) स्मृ । स्मरणं पूर्वं = स्मृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[किञ्चित्]** टुक्षु-रु-'कुंक् शब्दे' (१०८६) कु । कौति प्रश्नाद्यर्थमिति किम् । 'कोर्डिम्' (उणादि-९३९) डिद् इम्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उकारलोपः । 'लोकात्' (१।१।३) संहिता । किम् अग्रे 'चिंग्ट् चयने' (१२९०) चि । किमपि अल्पं चिनोतीति किञ्चित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः ।

**[प्रकाश्यते]** 'काशृङ् दीप्तौ' (८३०) काश्, प्रपूर्वकम् । प्रकाशमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लोपः । प्रकाश्यते = प्रकटीक्रियते = विव्रियते इत्यर्थः ।

किं तत् ? उक्तकथ्यतापन्नं शब्दानुशासनं शब्दशास्त्रम् ।

किं विशिष्टं ? श्रेयः = प्रशस्यतरं कल्याणकारि छो ।

केन कर्त्रा ? आचार्यहेमचन्द्रेण ।

किं कृत्वा ? स्मृत्वा = सूत्ररूपतया कृत्वा ।

कथम् ? किञ्चित् = स्तोकमात्रम् ।

पुनः किं कृत्वा ? प्रणम्य = नमस्कृत्य ।

किम् ? परमात्मानम्, परमदैवतं परमात्मा भणियइ ।

परमदेवतासु प्रणमिउ = नमस्करिउं ।

आचार्यि हेमचन्द्रि श्रेय = प्रशस्यतरु अथवा कल्याणकारियउं शब्दानुशासनु भणियइ = व्याकरणुस्सरिऊ करिऊ ।

किञ्चित् = स्तोकमात्रु ।

प्रकाश्ययइ = प्रकटु कीजइ = विवरियइ ॥ छ ॥

**अर्हम् ॥१।१।१॥**

**[अर्हम्]** 'अर्ह पूजायाम्' (५६५) अर्ह् । अर्हति शक्रादिकृतां पूजामित्यर्हम् । 'लिहादिभ्यः' (५।१।५०) अच्प्र० । 'पृषोदरादयः' (३।२।१५५) अर्हमिति निपातः ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सिद्धिः स्याद्वादात् ॥१।१।२॥

**[सिद्धिः]** 'षिधू गत्याम्' (३२०) षिध् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध् । सेधनं = सिद्धिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) ति० → धि० । 'तृतीयस्तृतीय - चतुर्थे' (१।३।४९) ध० → द० । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→रु०→र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) र० → विसर्गः ।

**[स्याद्वादात्]** 'असक् भवे(भुवि)' (११०२) अस् । सप्तमी यात्प्र० । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अस्धातोरकारलोपः । 'वद व्यक्तायां वाचि' (९९८) वद् । वदनं = वादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र०→अ । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धौ वादः । स्यादित्येतस्य वादः = स्याद्वादः, तस्मात् = स्याद्वादात्, पञ्चमी ङसिप्र० → अस् । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) अस् → आत् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ॥ छ ॥

## लोकात् ॥१।१।३॥

**[लोकात्]** 'लोकृङ् दर्शने' (६१२) लोक् । लोकतेऽवलोकते निखिलव्यवहारानिति लोकः । 'अच्' (५।१।४९) अच्प्र० → अ । तस्मात् = लोकात्, पञ्चमी ङसिप्र० → अस् । 'ङे - ङस्योर्याऽऽतौ' (१।४।६) अस् → आत् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ॥ छ ॥

## औदन्ताः स्वराः ॥१।१।४॥

**[औदन्ताः]** औत् अन्ते येषां ते = औदन्ताः । अथवा औत् अन्तो येषां ते = औदन्ताः । प्रथमाबहुवचनं जस्प्र० → अस् । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) अकारस्य आत्वम् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[स्वराः]** 'औस्वृ शब्दोपतापयोः' (२१) स्वृ । स्वरन्तीति स्वराः । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अथवा स्वयं 'राजृग् दीप्तौ' (८९३) राज् । स्वयं राजन्ते = शोभन्ते इति स्वराः । 'क्वचित्' (५।१।१७१) डप्र० → अ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमाबहुवचनं जस् → अस् । शेषं पूर्ववत् ॥ छ ॥

## एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ॥१।१।५॥

**[एकद्वित्रिमात्राः]** 'इंण्क् गतौ' (१०७५) इ । एति प्राप्ति (?) प्रथमांकसंख्यामिति एकः । 'भीण्-शलि-वलि-कल्यति०' (उणादि-२१) कप्र० । नामिनो गुणोऽक्ङिति (४।३।१) गुणः ए । 'आत्' (२।४।१८) आप् → आ । 'समानानां तेन दीर्घः' (१।२।१) आ । -

'उभ पूरणे' (१३८५) उभ् । उम्भतः = पूरयतो द्वित्वसंख्यामिति द्वि । 'उभेर्द्व-त्रौ' च' (उणादि-६१५) इप्रत्यये द्व आदेशः ।

'उभ पूरणे' (१३८५) उभ् । उम्भन्ति = पूरयन्ति त्रित्वसंख्यामिति त्रि । 'उभेर्द्व-त्रौ च' (उणादि-६१५) इप्रत्यये त्र आदेशः ।

'मांङ्क् मान-शब्दयोः' (११३७) मा । मीयते = परिच्छिद्यते कालविशेषो अनया इति मात्रा । 'हु-या-मा-श्रु-वसि-भसि०' (उणादि-४५१) त्रप्र० । 'आत्' (२।४।१८) आप् → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एका च द्वे च तिसृ(स्रः) च = एकद्वितिस्रः । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावः एका० → एक० । एकद्वितिस्रो मात्रा येषां ते = एकद्वित्रिमात्राः । प्रथमाबहु० जस् → अस् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० ।

**[ह्रस्वदीर्घप्लुताः]** 'ह्रस शब्दे' (५४०) ह्रस् । ह्रस्यते = शब्दाय्यते एकमात्रिकतया इति ह्रस्वः । ' लटि-खटि-खलि-नलि-कण्यशौ०' (उणादि-५०५) वप्र० ।

'दृश् विदारणे' (१५३५) दृ । दृणाति = विदारयति ह्रस्वभावमिति दीर्घः । 'मघा-घङ्घाघ-दीर्घादयः' (उणादि-११०) दीर्घ इति निपातः ।

च्युंङ् - ज्युंङ् - जुंङ् - पुंङ् - 'प्लुंङ् गतौ' (५९८) प्लु । प्लवते मात्राधिकतया इति प्लुतः । 'पुत-पित्त-निमित्तोत - शुक्त-तिक्त०' (उणादि-२०४) कित् तप्र० ।

ह्रस्वश्च दीर्घश्च प्लुतश्च = ह्रस्वदीर्घप्लुताः, प्रथमाबहु० जस्० → अस्० । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) अ० → आ० । 'समानानां०' (१।२।१) आ । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥ छ ॥

## अनवर्णा नामी ॥१।१।६॥

**[अनवर्णाः]** न विद्यते अवर्णो येषां ते = अनवर्णाः । 'अन् स्वरे' (३।२।१२९) अन् ।

**[नामी]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमनं = नामः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धिः । नामो अस्याऽस्तीति नामी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याव्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ॥ छ ॥

## लृदन्ताः समानाः ॥१।१।७॥

**[लृदन्ताः]** लृत् अन्तो येषां ते = लृदन्ताः । प्रथमाबहु० जस् → अस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'समानानां तेन दीर्घः' (१।२।१) आ ।

**[समानाः]** समानं = तुल्यं मानं = परिमाणं येषां ते = समानाः । 'समानस्य धर्मादिषु' (३।२।१४९) सभावः । प्रथमाबहु० जस् । शेषं पूर्ववत् ॥ छ ॥

## ए-ऐ-ओ-औ सन्ध्यक्षरम् ॥१।१।८॥

**[एऐओऔ]** एश्च ऐश्च ओश्च औश्च = एऐओऔ । प्रथमाबहु० जस् । सूत्रत्वाल्लोपः ।

**[सन्ध्यक्षरम्]** 'डुधांग्क् धारणे च' (११३९) धा, संपूर्वकम् । संधानं = संधिः । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आकारलोपः ।

'क्षर संचलने' (९७१) क्षर्, नञ्पूर्वकम् । न क्षरति → न चलति स्वस्वरूपादित्यक्षरम् । 'अच्' (५।१।४९) अच्प्र० → अ । सन्धावक्षरं = सन्ध्यक्षरम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽकारलोपः ॥ छ ॥

## अं-अः अनुस्वार-विसर्गौ ॥१।१।९॥

**[अंअः]** अं च अश्च = अंअः । प्रथमाद्विवचनं औ । सूत्रत्वात् लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अनुस्वारविसर्गौ]** 'औस्वृ शब्दोपतापयोः' (२१) स्वृ, अनुपूर्वकम् । अनुस्वर्यते = संलीनमुच्यार्यते इत्यनुस्वारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धौ आर् ।

'सृजंत् विसर्गे' (१३४९) सृज्, विपूर्वकम् । विसर्ज्यते (?) (विसृज्यते) = विरम्यते अर्थोऽनेनेति विसर्गः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

अनुस्वारश्च विसर्गश्च = अनुस्वारविसर्गौ । प्रथमाद्वि० औ । ऐदौत्सन्ध्यक्षरैः (१।२।१२) औ० ॥ छ ॥

**कादिर्व्यञ्जनम्** ॥१।१।१०॥

**[कादिर्व्यञ्जनम्]** 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्वकम् । आदानं = आदिः । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आकारलोपः । 'लोकात्' (१।१।३) संहिता । क् आदिर्यस्याऽसौ कादिः । प्रथमैक० सि । 'सो रुः' (२।१।७२) स० → र० ।

'अञ्जौप् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज् विपूर्वकम् । व्यज्यते = प्रकटीक्रियते अर्थोऽनेनेति व्यञ्जनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'लोकात्' (१।१।३) संहिता । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लोपः ॥ छ ॥

**अपञ्चमान्तस्थो धुट्** ॥१।१।११॥

**[अपञ्चमान्तस्थो धुट्]** 'पञ्चन्' । पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (प्रथमो वक्षस्कारः /२९) स्था, अन्तपूर्वकम् । स्वस्य स्वस्य स्थानस्याऽन्ते तिष्ठन्तीति अन्तस्थाः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आकारलोपः । 'आत्' (२।४।१८) आप् → आ । 'समानानां०' (१।२।१) आ । पञ्चमाश्च अन्तस्थाश्च = पञ्चमान्तस्थाः, न विद्यते पञ्चमान्तस्था यत्र स = अपञ्चमान्तस्थाः । 'नञत्' (३।२।१२५) न० → अ० । प्रथमैक सि । 'सो रुः' (२।१।७२) स० → र० ।

'धुक्षि संदीपन-क्लेशन-जीवनेषु' (८७६) धुक्ष् । धुक्षते = धुट् । 'दिद्युद् - ददृद् - जगज्जुहू०' (५।२।८३) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्प्रत्ययस्य लोपः । 'संयोगस्यादो' स्कोर्लुक्' (२।१।८८) कलुक् । 'धुटस्तृतीयः' (२।१।७६) ष०→ड० । 'विरामे वा' (१।३।५१) ड०→ट० । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'घोषवति' (१।३।२१) र०→उ० । 'अवर्णस्ये०' (१।२।६) ओ ॥ छ ॥

**पञ्चको वर्गः** ॥१।१।१२॥

**[पञ्चको वर्गः]** पञ्चन् । पञ्चसंख्या परिमाणमस्य = पञ्चकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९२) नलोपः । प्रथमैक० सि । 'सो रुः' (२।१।७२) स० → र० ।

'वृग्ट् वरणे' (१२९४) वृ । व्रियते = वर्गः । 'गम्यमि-रम्यजि-गद्यदि-छाग०' (उणादि-९२) गप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गुणः अर् । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते०' (१।३।५३) र०→विसर्गः । 'घोषवति' (१।३।२१) र०→उ० । 'अवर्णस्ये०' (१।२।६) ओ ॥ छ ॥

**आद्य-द्वितीय-श-ष-सा अघोषाः** ॥१।१।१३॥

**[आद्यद्वितीयशषसा अघोषाः]** आदि । आदौ भवः = आद्यः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इकारलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वि । द्वयोः पूरणः = द्वितीयः । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० ।

आद्याश्च द्वितीयाश्च शश्च षश्च सश्च = आद्यद्वितीयशषसाः । प्रथमाबहु० जस्→अस् । 'अत आ स्यादौ०' (१।४।१) अ०→आ० । 'सो रुः' (२।१।७२) स०→र० ।

'घुषृ शब्दे' (४९७) घुष् । घोषणं = घोषः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र०→अ । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । न विद्यते घोषो ध्वनिर्येषां ते = अघोषाः । 'नञत्' (३।२।१२५) न०→अ० । प्रथमाबहु० जस्→अस् । 'अत आ स्यादौ०' । (१।४।१) अ०→आ० । शेषं पूर्ववत् । 'रोर्यः' (१।३।२६) र०→य० । 'स्वरे वा' (१।३।२४) यकारलोपः ॥ छ ॥

## अन्यो घोषवान् ॥१।१।१४॥

**[अन्यो घोषवान्]** 'अन प्राणने' (१०८९) अन् । अनिति = प्राणिति पराऽर्थोऽनेनेति अन्यः । 'स्था-छा-मा-सा-सू- मन्यनि०' (उणादि-३५७) यप्र० । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० ।

घोषो ध्वनिर्विद्यते यस्याऽसौ घोषवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र०→मत् । प्रथमैक० सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'मावर्णान्तोपान्ता०' (२।१।९४) म०→ व० । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः । 'घोषवति' (१।३।२१) र०→उ० । 'अवर्णस्ये०' (१।२।६) ओ ॥ छ ॥

## य - र - ल - वा अन्तस्थाः ॥१।१।१५॥

**[यरलवा अन्तस्थाः]** यश्च रश्च लश्च वश्च = यरलवाः । प्रथमाबहु० जस् । शेषं (१।१।१३) सूत्रवत् । अन्तस्थाः (१।१।११) सूत्रवत् ॥ छ ॥

## अं - अः - ≍ क - ≍ प - श - ष - साः शिट् ॥१।१।१६॥

**[अं अः ≍ क ≍ पशषसाः]** अं च अश्च ≍ कश्च ≍ पश्च शश्च षश्च सश्च = अंअः ≍ क ≍ पशषसाः । प्रथमाबहु० जस् । शेषं (१।१।४) सूत्रवत् ।

**[शिट्]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । शिनष्टीति शिट् । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।३८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्प्रत्ययलोपः । 'धुटस्तृतीयः' (२।१।७६) ष०→ड० । 'विरामे वा' (१।३।५१) ड०→ट० । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ॥ छ ॥

## तुल्यस्थानाऽऽस्यप्रयत्नः स्वः ॥१।१।१७॥

**[तुल्यस्थानाऽऽस्यप्रयत्नः]** 'तुलण् उन्माने' (१६९२) तुल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । तोलनं = तुला । 'भिदादयः' (५।३।१०८) अङ्प्र०→अ । 'णेरनिटि' (४।३।८३) णिच्प्रत्ययलोपः । 'निमित्ताभावे०' (प्रथमो वक्षस्कारः /२९) गुणाऽभावः । 'आत्' (२।४।१८) आप्→आ । तुलया संमितास्तुल्यः । 'हृद्य-पद्य-तुल्य-मूल्य-वश्य०' (७।१।११) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आकारलोपः ।

स्था (१।१।११) सूत्रवत् । तिष्ठन्ति वर्णा अस्मिन्निति स्थानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र०→अन । 'समानानां०' (१।२।१) दीर्घत्वम् ।

'असूच् क्षेपणे' (१२२१) अस् । अस्यति = क्षिपति वक्ता वर्णाऽअनेनेति आस्यम् । 'शिक्यास्याढ्य-मध्य-विन्ध्य०' (उणादि-३६४) यप्रत्यये निपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'यतैङ् प्रयत्ने' (७११) यत्, प्रपूर्वकम् । प्रयतनं = प्रयत्नः । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

आस्ये प्रयत्नः = आस्यप्रयत्नः, स्थानं च आस्यप्रयत्नश्च = स्थानाऽऽस्यप्रयत्नौ, तुल्यौ = वर्णान्तरेण सदृशौ स्थानाऽऽस्यप्रयत्नौ यस्य सः = तुल्यस्थानाऽऽस्यप्रयत्नः ।

**[स्वः]** 'असूच् क्षेपणे' (१२२१) अस् । अस्यति = क्षिपति परभावमिति स्वः । 'प्रह्वा-ह्वाय-ह्वा-स्व०' (उणादि-५१४) वप्रत्ययेऽस्यतेरलोपश्च । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥ छ ॥

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च, नासिकोष्ठौ च तालु च ॥

अवर्ण-कवर्ग-ह-विसर्गाः कण्ठ्याः ।
इवर्ण-चवर्ग-य-शास्तालव्याः ।
उवर्ण-पवर्ग-उपध्मानीया ओष्ठ्याः ।
ऋवर्ण-टवर्ग-र-षा मूर्धन्याः ।
लृवर्ण-तवर्ग-ल-सा दन्त्याः ।
ए - ऐ कण्ठ्य-तालव्यौ ॥
ओ-औ कण्ठ्योष्ठ्यौ । वो दन्त्यौष्ठ्यः ।
जिह्वामूलीयो जिह्व्यः, कण्ठ्य इत्यन्ये ।

नासिक्योऽनुस्वारः । ङ-ञ-ण-न-माः स्वस्थान-नासिकास्थानाः ।
अथाऽऽस्यप्रयत्नः - स्पृष्टं करणं स्पर्शानां स्पर्शा वर्ग्याः ।
ईषत् स्पृष्टं करणं अन्तस्थानां । ईषत् विवृतं करणमूष्मणां ।
विवृतं करणं स्वराणां । ऊष्माणः शषसहाः ।
स्थानग्रहणं किम् ? क-च-ट-त-पानां तुल्याऽऽस्यप्रयत्नानामपि भिन्नस्थानानां मा भूत् ।
किञ्च स्यात् ? 'तर्प्ता-तर्पुम्' इत्यत्र 'धुटो धुटि स्वे वा' (१।३।४८) इति पकारस्य तकारे परे लोपः स्यात् ।
आस्यप्रयत्नग्रहणं किम् ? चवर्ग-य-शानां तुल्यस्थानानामपि भिन्नाऽऽस्यप्रयत्नानां मा भूत् ।
किञ्च स्यात् ? अरुक्(श्) श्च्योततीत्यत्र 'धुटो धुटि स्वे वा' (१।३।४८) इति शकारस्य चकारे लोपः स्यात् ॥ छ ॥

**स्यौ - जसमौ - शस् - टा - भ्याम् - भिस् - ङे - भ्याम् - भ्यस् - ङसि - भ्याम् - भ्यस् - ङसोसाम् - ङ्योस्सुपां त्रयी त्रयी प्रथमाऽऽदिः ॥१।१।१८॥**

**[स्यौजसमौशस्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुपाम्]** सिश्च औश्च जस् च अम् च औश्च शस् च टाश्च भ्याम् च भिस् च ङेश्च भ्याम् च भ्यस् च ङसिश्च भ्याम् च भ्यस् च ङस् च ओस् च आम् च ङिश्च ओस् च सुप् च = स्यौजसमौशस्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुपः, तेषाम् ।

**[त्रयी त्रयी]** त्रि (१।१।५) सूत्रवत् । त्रयाणां पूरणी = त्रयी । त्रयोऽवयवा यस्याः सा = त्रयी । 'द्वि-त्रिभ्यामयट् वा' (७।१।१५२) अयट्प्र० → अय । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० → ई । 'अस्य ङ्यां लुक्' (२।४।८६) अस्य लोपः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'वीप्सायाम्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७।४।८०) 'त्रयी' द्वित्वम् ।

**[प्रथमाऽऽदिः]** 'प्रथिष् प्रख्याने' (१००३) प्रथ् । प्रथते या इति प्रथमा । 'सृ-पृ-प्रथि-चरि-कडि-कर्देरमः' (उणादि-३४७) अमप्र० । 'आत्' (२।४।१८) आप् → आ । 'समानानां०' (१।२।१) दीर्घः । आदि (१।१।१०) सूत्रवत् । प्रथमा आदिर्यस्याऽसौ प्रथमादिः । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० । 'रः पदान्ते०' (१।३।५३) → विसर्गः ।

बहुवचनं स्याद्यादेशानामपि प्रथमादिसंज्ञा प्रतिपत्त्यर्थम् ॥ छ ॥

**स्त्यादिर्विभक्तिः ॥१।१।१९॥**

**[स्त्यादिर्विभक्तिः]** स्-ति-आदि । स् च तिश्च = स्ती, स्ती आदिर्यस्याऽसौ स्त्यादिः । 'इवर्णादेरस्वे०' (१।२।२१) य० । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० ।

'भजीं सेवायाम्' (८९५) भज्, विपूर्वकम् । विभजनं = विभक्तिः । अथवा विभज्यन्ते = विभागीक्रियन्ते कर्तृ-कर्मादयोऽनया इति विभक्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । च-जः क-गम् (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग०→क० । प्रथमैक० सि ॥ छ ॥

**तदन्तं पदम् ॥१।१।२०॥**

**[तदन्तम्]** तत्-अन्त । सा = विभक्तिरन्तो यस्य तत् = तदन्तम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽकारलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

**[पदम्]** 'पदिंच् गतौ' (१२५७) पद् । पद्यते = गम्यते कारकसंश्लिष्टोऽर्थोऽनेनेति पदम् । 'अच्' (५।१।४९) अच्प्र० → अ । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽकारलोपः ।

**[धर्म्मो वः स्वम्]** 'धृंग् धारणे' (८८७) धृ । धरति दुर्गतिप्रसृतात् सुगतौ च धारयतीति धर्म्मः । 'अर्तीरि-स्तु-सु-हु-सृ-घृ-धृ०' (उणादि-३३८) मप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् । प्रथमैक० सि । 'सो रुः' (२।१।७२) स०→र० ।

'युष सेवायाम्' (सौत्रधातुः) युष् । योषति = सेवति परभावमिति युष्मद् । 'युष्यसिभ्यां क्मद्' (उणादि-८९९) किद्. मद्प्र० । षष्ठीबहु० आम् । 'पदाद् युग्विभक्त्यैकवाक्ये०' (२।१।२१) वस् आदेशः । ततो धर्म्म इत्यत्र 'घोषवति' (१।३।२१) सूत्रेण र०→उ० । 'अवर्णस्ये०' (१।२।६) ओत्वम् ।

'असूच् क्षेपणे' (११२१) अस् । अस्यति = क्षिपति दारिद्रभावमिति स्वम् । शेषं (१।१।१७) सूत्रवत् ।

**[ददाति नः शास्त्रम्]** 'डुदांग्क् दाने' (११३८) दा । वर्त्तमाना तिव् → ति । 'हवः शिति' (४।१।१२) दा धातो-र्द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वम् ।

'असक् भुवि' (११०२) अस् । अस्ति = भवतीति अस्मद् । 'युष्यसिभ्यां क्मद्' (उणादि-८९९) किद् मद्प्र० । चतुर्थीबहु० भ्यस् । 'पदाद् युग्विभक्त्यैकवाक्ये०' (२।१।२१) अस्मदश्चतुर्थीभ्यसा सह नस् आदेशः ।

'शासूक अनुशिष्टौ' (१०९५) शास् । शास्तीति शास्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । शास्तुर्धर्म्यं = शास्त्रम् । 'ऋन्नरादेरण्' (६।४।५१) अण्प्र० । 'इवर्णादे०' (१।२।२१) ऋ० → र० । द्वि० अम् । अथवा शास्ति शिष्यान् तत्त्वमिति शास्त्रम् । 'त्रट्' (उणादि-४४६) त्रट्प्र० → त्र । द्वितीया अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नाम सिदय्व्यञ्जने ॥१।१।२१॥

**[नाम]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमति = प्रह्वीभवति जनोऽनेनेति नामन् । 'सात्मन्नात्मन्-वेमन्-रोमन्०' (उणादि-९१६) मन्प्रत्यये नामन्निति निपातः । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सिदय्व्यञ्जने]** स् इत् अनुबंधो यस्याऽसौ सित्, न य् = अय्, 'नञत्' (३।२।१२५) न० → अ० । अय् च तद् व्यञ्जनं च = अय्व्यञ्जनम्, सिच्च तत् अय्व्यञ्जनं च = सिदय्व्यञ्जनम्, तस्मिन् = सिदय्व्यञ्जने । सप्तम्येक० ङि → इ । 'अवर्णस्ये०' (१।२।६) एत्वम् ।

**[भवदीयः]** 'भांक् दीप्तौ' (१०६१) भा । भातीति । 'भातेर्डवतुः' (उणादि-८८६) डवतुप्र० → अवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । भवतोऽयं = भवदीयः । 'भवतोरिकणीयसौ' (६।३।३०) ईयस्प्र० । सकारानुबन्धः पदसंज्ञार्थः, तस्य किं फलम् ? 'धुटस्तृतीयः' (२।१।७६) इति त० → द० । प्रथमैक० सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ऊर्णायुः]** ऊर्णा अस्याऽस्तीति ऊर्णायुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इति आकारलोपो न भवति । सकारानुबन्धः पदसंज्ञार्थः ।

**[अहंयुः]** अहमस्याऽस्तीति अहंयुः ।

**[शुभंयुः]** शुभमस्याऽस्तीति शुभंयुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० । 'तौ मुमो व्यञ्जने स्वौ'' (१।३।१४) अनुस्वार-अनुनासिकौ ॥

**[पयोभ्याम्]** 'पां पाने' (२) पा । पिबतीति पयः । 'पा-हाक्भ्यां पयह्यौ च' (उणादि-९५३) अस्प्रत्यये पय आदेशः । तृतीयाद्वि० भ्याम् । अनेन पदसंज्ञा । 'सो रुः' (२।१।७२) स०→र० । 'घोषवति' (१।३।२१) र०→उ० । 'अवर्णस्ये०' (१।२।६) ओ ।

**[वाच्यति]** 'वचंक् भाषणे' (१०९६) वच् । वक्तीत्येवंशीला = वाक् । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्०' (५।२।८३) क्विप्प्रत्यये वाच् निपातनं च । 'अप्रयोगीत्' (१।१।३७) क्विप्प्रत्ययलोपः । वाचमिच्छति = वाच्यति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र०→ य । वर्त्तमाना तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अकारलोपः ।

**[राजता]** 'राजृग् दीप्तौ' (८९३) राज् । राजते = शोभते छत्रचामरादिभिरिति राजा । 'उक्षि-तक्ष्यक्षीशि-राजि०' (उणादि-९००) अन्प्र० । राज्ञो भावः = राजता । 'भावे त्व-तल्' (७।१।५५) तल्प्र० ।

**[दृक्त्वम्]** दृशो भावो = दृक्त्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'ऋत्विज्-दिश्-दृश्०' (२।१।६९) श०→ ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[राजकाम्यति]** राजन् पूर्ववत् । राजानमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० ।

**[यज्वा]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इष्टवान् । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) वन्प्र० । प्रथमैक० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सौश्रुतम्]** 'श्रुंट् श्रवणे' (१२९६) श्रु, सुपूर्वकम् । सुष्ठु शृणोतीति सुश्रुत् । 'क्वत्०' (५।३।११४) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्प्रत्ययलोपः । सुश्रुत इदं = सौश्रुतम् । 'तस्येदम्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६।३।१६०) अण्प्र०→अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'लोकात्' (१।१।३) संहिता । प्रथमैक० सि० । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[भागवतम्]** भगो विद्यते यस्याऽसौ भगवान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र०→मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० । भगवत इदं = भागवतम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । शेषं पूर्ववत् ॥ छ ॥

## नं क्ये ॥१।१।२२॥

**[नम्]** न । प्रथमैक० सि० । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[क्ये]** क्य । सप्तम्येक० ङि → इ । 'अवर्णस्ये०' (१।२।६) ए ।

**[राजीयति]** राजन् (१।१।२१) सूत्रवत् । राजानमिच्छति = राजीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) । क्यन्प्र०→य । अनेन पदसंज्ञा । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'क्यनि' (४।३।११२) अ० → ई० । वर्त्तमाना तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अस्य लुक् ।

**[राजायते]** राजन् (१।१।२१) सूत्रवत् । राजा इव आचरति = राजायते । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । अनेन पदसंज्ञा । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) आ । वर्त्तमाना ते । शेषं पूर्ववत् ।

**[चर्मायते]** चर्मन् । अचर्म चर्म भवति = चर्मायते । 'डाच् लोहितादिभ्यः षित्' (३।४।३०) षित् क्यङ्प्र० → य । अनेन पदसंज्ञा । शेषं 'राजायते' वत् ।

**[सामन्यः]** 'षोंच अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । स्यति वैरभावमिति साम । 'स्यतेरी च वा' (उणादि-९१५) मन्प्र० । सामनि साधुः = सामन्यः । 'तत्र साधौ' (७।१।१५) यप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्त्यस्वरादेर्लोपस्य प्राप्तौ 'अनोऽटये ये' (७।४।५१) अन्त्यस्वरादिलोपनिषेधः ।

**[वेमन्यः]** 'वेंग् तन्तुसंताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) आत्त्वे → वा । ऊयते पटोऽनेनेति वेम । 'सात्मन्नात्मन्-वेमन्-रोमन्०' (उणादि-९९६) मन्प्रत्यये वेमन् इति निपातः । वेमनि साधुः = वेमन्यः । 'तत्र साधौ' (७।१।१५) यप्र० । शेषं 'सामन्यः' वत् ॥ छ ॥

## न स्तं मत्वर्थे ॥१।१।२३॥

**[न]** न । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[स्तम्]** स् च तश्च = स्तम्, समाहारत्वादेकत्वं च । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[मत्वर्थे]** मतोरर्थो यस्य सः मत्वर्थस्तस्मिन् = मत्वर्थे, सप्तम्येक० ङि० → इ । 'अवर्णस्ये०' (१।२।६) ए. ।

**[यशस्वी]** यशस् । यशो विद्यते यस्याऽसौ यशस्वी । 'अस्-तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः = वीन् । 'दीर्घङ्याब्०' (१।४।४५) - सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[पेचुष्मान्]** 'डुपचींष् पाके' (८९२) पच् । पेचे = पेचिवान् । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० →

वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् । 'अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः' (४।१।२४) प०→पे० । पेचिवान् अत्र अस्ति = पेचुष्मान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'क्वसुष्मतौ च' (२।१।१०५) वस् → उष्० । पथमैक० सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[विदुष्मान्]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२) क्वसुप्र० → वस् । विद्वान् अत्र अस्ति = विदुष्मान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । अग्रे 'पेचुष्मान्' वत् ।

**[यशस्वान्]** यशोऽत्र अस्ति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) वन्प्र० । प्रथमैक० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[तडित्वान्]** तडिदत्र अस्ति ।

**[मरुत्वान्]** मरुदत्र अस्ति ।

**[विद्युत्वान्]** विद्युदत्र अस्ति ।

**[तक्षवान्]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । तक्ष्णोतीति तक्षन् । 'उक्षि-तक्ष्यक्षीशि-राजि०' (उणादि-९००) अन्प्र० । तक्षा अस्य अस्तीति तक्षवान् ।

**[राजवान्]** राजा अत्रास्ति । 'तदस्यास्त्य०' (७।२।१) मतुप्र० → मत् । अग्रे पूर्ववत् ।। छ ।।

**मनुर्नभोऽङ्गिरो वति ।।१।१।२४।।**

**[मनुर्नभोङ्गिरो वति]** मनुश्च नभा(भ)श्च अङ्गिराश्च = मनुर्नभोऽङ्गिरर् । प्रथमाबहु० जस् । सूत्रत्वात् लोपः ।

वत् सप्तम्येक० ङि → इ । 'सो रुः' (२।१।७२) स० → र० । 'घोषवति' (१।३।२१) र० → उ० । 'अवर्णस्ये०' (१।२।६) ओ ।

**[मनुष्वत्]** मनुरिव = मनुष्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[नभस्वत्]** नभ इव = नभस्वत् ।

**[अङ्गिरस्वत्]** अङ्गिरा इव = अङ्गिरस्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त०→द० । 'विरामे वा' (१।३।५१) द० → त० । इह पदत्वाऽभावात् 'सो रुः' (२।१।७२) रुर्न भवति ।। छ ।।

**वृत्त्यन्तोऽसषे ।।१।१।२५।।**

**[वृत्त्यन्तोऽसषे]** 'वृतूङ् वर्तने' (९५५) वृत् । वर्तनं = वृत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । वृत्तेरन्तो = वृत्त्यन्तः । प्रथमैक० सि । 'सो रुः' (२।१।७२) स० → र० ।

सश्च षश्च = सषम्, न सषं = असषम्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = असषे, सप्तम्येक० ङि → इ । 'अवर्णस्ये०' (१।२।६) ए । 'अतोऽति रोरुः' (१।३।२०) र० → उ० । 'अवर्णस्ये०' (१।२।६) ओ ।

सा च त्रिधा, समासान्त-तद्धितान्त-नामधातुश्च ।

**[परमदिवौ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति दिव् । 'दिवेर्डिव्' (उणादि-९४९) डिद् इव्प्र० । परम 'आत्' (२।४।१८) आप् → आ । 'समानानां०' (१।२।१) दीर्घः । परमा द्यौर्ययोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ = परमदिवौ । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । प्रथमाद्वि० औ ।

**[गोधुक्]** गो 'दुहींक् क्षरणे' (११२७) दुह् । गां दोग्धि इति क्विप् गोधुक् । 'क्विप्' (५।१।१४८) क्विप्प्र० ।

**[परमवाचौ]** परमा वाक् ययोः तौ = परमवाचौ ।

**[बहुदण्डिनौ]** दण्डो विद्यते यस्याऽसौ दण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलोपः । ईषदूनौ दण्डिनौ = बहुदण्डिनौ । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहुप्र० = बहुदण्डिन् । प्रथमाद्वि० - औ । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपो न भवति ।

**[दधिसेक्]** 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै०' (२।३।९८) सिच् । सिञ्चतीति सेक् । 'मन् - वन् - क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । लघोरुपान्त्यस्य (४।३।४) गुणः ए । 'अप्रयोगीत्' (१।१।३७) विच्प्रत्ययलोपः । दध्नः सेक् = दधिसेक् । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च→ क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[दधिसेचौ]** दध्नः सिचौ ।

**[बहुसेक्]** ईषदूनः सेक् ।

**[बहुसेचौ]** ईषदूनौ सेचौ । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) वहुप्र० । प्रथमाद्वि० औ ।

असष इति प्रतिषेधाभावे सेकः पदादित्वं न स्यात्, तदभावे च पदमध्यस्थत्वात् षत्वं स्यादित्यस्मिन् कर्तव्ये वृत्त्यन्तस्य पदत्वात् सकारस्य पदादित्वम् ।। छ ।।

**सविशेषणमाख्यातं वाक्यम्** ।।१।१।२६।।

**[सविशेषणम्]** 'शिष्लृंप् विशेषणे' (१४९२) शिष्, विपूर्वकम् । विशिष्यते अनेनेति विशेषणम् । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० → अन । सह विशेषणैर्वर्त्तते इति सविशेषणम् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह किहइ सभावु-ह लोपः क्रियते इत्यर्थः । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[आख्यातम्]** 'ख्यांक् प्रकथने' (१०७१) ख्या, आङ्पूर्वकम् । आख्याति स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[वाक्यम्]** 'वचंक् भाषणे' (१०९६) वच् । उच्यते इति वाक्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धिः । 'क्तेऽनिटश्च-जोः०' (४।१।१११) च → क० । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽस्य लुक् ।

**[धर्मो वो रक्षतु]** धर्मो (१।१।२०) सूत्रवत् ।

वः (१।१।२०) सूत्रवत् ।

'रक्ष पालने' (५६७) रक्ष् । पञ्चमी तुव् → तु । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ ।

**[उच्चैर्वो वदति]** 'वद व्यक्तायां वाचि' (९९८) वद् । वर्त्तमाना तिव् → ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ ।

**[भोक्तुं त्वा याचते, भोक्तुं मा याचते]** 'भुजंप् पालनाऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय = भोक्तुम् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) उपान्त्यस्वरगुणः । 'च-जः क-गम्' (२।१।८६) ज०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

→ ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

युष्मद्-अस्मद् द्वितीयैक० अम् । 'अमा त्वा-मा' (२।१।२४) युष्मदस्मदोः क्रमेण त्वा-मा आदेशौ ।

'डुयाचृग् याच्ञायाम्' (८९१) याच् । वर्त्तमाना ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ ।

**[लुनीहि ३ पृथुकाँश्च खाद]** 'लूग्श् छेदने' (१५१९) लू । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई० । 'क्षियाशीः प्रैषे' (७।४।९२) प्लुतत्वम् ।

'खादृ भक्षणे' (२९४) खाद् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिप्रत्ययलुक् ।

**[पुनीहि ३ सक्तूंश्च पिब]** 'पूग्श् पवने' (१५१८) पू । शेषं सर्वं 'लुनीहि३' वत् ।

'पां पाने' (२) पा । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) पा → पिबादेशः ।

**[कुरु नः कटम्]** अत्र एकवाक्यसंबद्धयोः युष्मदस्मदोर्वस्नसादयः, न वाक्यसंबद्धयोः, इत्याशङ्क्या शिष्यस्याऽर्थभेदेनैक-वाक्यत्वान्नसादेशः ।

**[शीलं ते स्वम्]** युष्मद् । षष्ठी ङस् । 'ङे-ङसा ते-मे' (२।१।२३) युष्मदः ङसा सह ते आदेशः ।

स्वम् (१।१।२०) सूत्रवत् ॥ छ ॥

**अधातु-विभक्ति-वाक्यमर्थवन्नाम ॥१।१।२७॥**

**[अधातुविभक्तिवाक्यम्]** 'डुधांगक् धारणे च' (११३९) धा । दधाति अर्थान् = धातुः । 'कृ-सि-कम्यमि-गमि०' (उणादि-७७३) तुन्प्र० → तु । न धातुः = अधातुः । 'नञत्' (३।२।१२५) न० → अ० ।

विभक्तिः (१।१।१९) सूत्रवत् ।

वाक्यम् (१।१।२६) सूत्रवत् ।

अधातुश्च विभक्तिश्च वाक्यं च = अधातुविभक्तिवाक्यम् ।

**[अर्थवत्]** 'ऋंक् गतौ' (११३५) ऋ । अर्यते इति अर्थः । 'कमि-पु-गार्त्तिभ्यस्थः' (उणादि-२२५) थप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः अर् । अर्थ इव = अर्थवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[नाम]** नाम (१।१।२१) सूत्रवत् ।

**[वृक्षः]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । वृश्चति → छिनत्ति आतपमिति वृक्षः । 'ऋजि-रिषि-कुषि-कृति-व्रश्च्युन्दि-शुभ्यः कित्' (उणादि-५६७) कित् सप्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् = वृस्च् । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-ष संयोगे क्ष । प्रथमैक० सि ।

**[प्लक्षः]** 'प्लुषू दाहे' (५३३) प्लुष् । प्लोषति दवादिना इति प्लक्षः । 'प्लुषेः प्लष् च' (उणा० ५६६) सप्रत्यये प्लष् आदेशः । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष । प्रथमैक० सि ।

**[कृष्णः]** 'कृषींत् विलेखने' (१३१९) कृष् । कृषतीति कृष्णः । 'घृ-वी-ह्वा-शुष्युषि-तृषि-कृष्यर्तिभ्यः कित्' (उणा०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८३) कित् णप्र० । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[अहन्]** 'हनंक् हिंसा-गत्योः' (११००) हन् । ह्यस्तनी दिव् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दलोपः । अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा (४।४।२९) अडागमः ।

**[अयजन्]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । ह्यस्तनी अन् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः ।

**[बहुराजा]** बहवो राजानो यस्यां सा = बहुराजा । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डित् आप्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः ।

**[गौरी]** गौर । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङीप्र० ।

**[कुमारी]** कुमार । कुत्सितोऽल्पो मारः = कंदर्पो यस्याः सा = कुमारी । 'वयस्यनन्त्ये' (२।४।२१) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः ।

**[गार्ग्यायणी]** गर्गस्य अपत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः, स्त्री चेत् गार्ग्यायणी । 'यञो डायन् च वा' (२।४।६७) ङीप्र० पूर्व० डायन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः ।

**[गौकक्ष्यायणी]** गौरिव कक्षोऽस्येति गोकक्षः । गोकक्षस्य अपत्यं वृद्धं = गौकक्ष्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः, स्त्री चेत् गौकक्ष्यायणी । 'षा-ऽवटाद् वा' (२।४।६९) ङीप्र० पूर्व० डायन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः ।

**[युवतिः]** युवा पुरुषः, स्त्री चेत् । 'यूनस्तिः' (२।४।७७) तिप्र० ।

**[ब्रह्मबन्धूः]** ब्रह्मा बन्धुर्यस्याः सा = ब्रह्मबन्धूः । 'उतोऽप्राणिनश्चाऽयुरज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० ।

**[करभोरूः]** करभस्य इव ऊरू यस्याः सा = करभोरूः । 'उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः' (२।४।७५) ऊङ्प्र० ।

**[कारकः]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कारकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक. । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[कर्त्ता]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कर्त्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमैक० सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि → डा → आ । डित्यन्त्यस्वरादेः (२।१।११४) ऋलोपः ।

**[छित्]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छिनत्तीति छित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'विरामे वा' (१।३।५१) द० → त० ।

**[भित्]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्तीति भित् । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'विरामे वा' (१।३।५१) द० → त० ।

**[औपगवः]** उप अग्रे गो । उपगोः अपत्यं = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[आक्षिकः]** अक्षैर्दीव्यतीति आक्षिकः । 'तेन जित-जयद्-दीव्यत्-खनत्सु' (६।४।२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चित्रगुः]** चित्रा गौर्यस्याऽसौ चित्रगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) गो० → गु० । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुम्वत् । चित्रा गौर्यस्येति विग्रहकालेऽर्थवत्समुदायभावान(त्) चित्रगुरित्यादौ नामत्वप्रतिषेधः प्रसजनीत्याशंक्याह एकपद्येन समुदायाऽभावात् ।

**[राजपुरुषः]** राज्ञः पुरुषः ।

**[वनम्]** 'वन संभक्तौ' (३२९) वन् । वनतीति वनम् । 'अच्' (५।१।४९) अच्प्र० → अ । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[धनम्]** 'धन शब्दे' (३२४) धन् । धनतीति धनम् । 'अच्' (५।१।४९) अच्प्र० → अ । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ॥ छ ॥

**शिर्घुट** ॥१।१।२८॥

**[शिर्]** शि । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[घुट्]** 'घुषृ शब्दे' (४९७) घुष् । घोषतीति घुट् । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।८३) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० । प्रथमैक० सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः ।

**[पद्मानि तिष्ठन्ति]** पद्म । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । स्था (१।१।११) सूत्रवत् । वर्तमानाया अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था०' (४।२।१०८) तिष्ठ आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । ॥ छ ॥

**पुं-स्त्रियोः स्यमौ-जस्** ॥१।१।२९॥

**[पुं-स्त्रियोः]** पुमांश्च स्त्री च = पुं-स्त्रियौ, तयोः = पुंस्त्रियोः, सप्तमीद्विवचनं ओस् । 'स्त्रियाः' (२।१।५४) इय् ।

पुम्स् इत्यत्र 'पदस्य' (२।१।८९) सलोपः । 'शिड्हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[स्यमौ-जस्]** औश्च औश्च = औ । 'स्यादावसंख्येयः' (३।१।११९) एकशेषः । सिश्च अम् च औश्च जस् च = स्यमौजस् । प्रथमाबहु० जस् । सूत्रत्वात् जस्लोपः ।

**[राजा-राजानम्-राजानौ तिष्ठतः-पश्य-राजानः]** राजन् ४ अग्रे सि-अम्-प्र०द्वि० औ-जस् । अनेन घुट्संज्ञा । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[सीमा-सीमानम्-सीमानौ तिष्ठतः-पश्य वा-सीमानः]** 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै०' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । स्यति = क्षिपति विवादमिति सीमा । 'स्यतेरी च वा' (उणादि-९१५) मन्प्र०- सी आदेशश्च । सि-अम्-प्र०-द्वि० औ - जस् । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[सामनी]** स्यति = क्षिपति विवादमिति सामन् । 'स्यतेरी च वा' (उणादि-९१५) मन्प्र० । प्रथमाद्वि० औ । 'औरीः' (१।४।५६) ई ।

**[वेमनी]** वेमन् (१।१।२२) सूत्रवत् । प्रथमाद्वि० औ । 'औरीः' (१।४।५६) ई ॥ छ ॥

**स्वरादयोऽव्ययम्** ॥१।१।३०॥

**[स्वरादयः]** स्वर् आदिर्येषां ते = स्वरादयः । प्रथमाबहु० जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अव्ययम्]** 'व्ययी गतौ' (९१८) व्यय्, नञ्पूर्वकम् । न व्ययति = न चलति स्वस्वरूपादित्यव्ययम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'नञत्' (३।२।१२५) न० → अ० । प्रथमैक० सि. ।

**[स्वः सुखयति]** स्वर् । प्रथमैक० सि० । 'अव्ययस्य' (३।२।७) सिलोपः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अत्युच्चैसौ]** उच्चैः अतिक्रान्तौ तौ ।

**[अत्युच्चैसः]** उच्चैः अतिक्रान्ताः ते ।। छ ।।

**चादयोऽसत्त्वे** ।।१।१।३१।।

**[चादयः]** च आदिर्येषां ते = चादयः । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[असत्त्वे]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै०' (२।३।९८) सद् । सीदतीति सत् । 'क्रुत्०' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सतो भावः = सत्त्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । सीदन्तोऽस्मिन् लिङ्ग-संख्ये इति सत्त्वम्, न सत्त्वं = असत्त्वम् । 'नञत्' (३।२।१२५) न० → अ० । तस्मिन्, सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए ।। छ ।।

**अधण्तस्वाद्या शसः** ।।१।१।३२।।

**[अधण्तस्वाद्या]** न धण् = अधण्, तसुआदिर्येषां ते = तस्वादयः, अधण् च तत् तस्वादयश्च = अधण्तस्वादि । प्रथमैक० सि । सूत्रत्वात् लोपः । आ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[शसः]** शस् पञ्चमी ङसि → अस् ।

**[देवा अर्जुनतोऽभवन्]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यन्ति = क्रीडन्ति स्वर्गे विलसन्ति इति देवाः । 'लिहादि०' (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ए । प्रथमाबहु० जस् → अस् । अर्जुनस्य पक्षे = अर्जुनतः । 'व्याश्रये तसुः' (७।२।८१) तसुप्र० → तस् । 'भू सत्तायाम्' (१) भू । ह्यस्तनी अन् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अट् ।

**[ततः]** तद् । तस्मात् । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'लोकात्' (१।१।३) संहिता ।

**[तत्र]** तद् । तस्मिन् । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । शेषं पूर्ववत् ।

**[इह]** इदम् । अस्मिन् । 'क्व-कुत्रात्रेह' (७।२।९३) इह निपातः ।

**[क्व]** किम् । कस्मिन् । 'क्व-कुत्राऽत्रेह' (७।२।९३) क्व निपातः ।

**[कदा]** किम्शब्दात् । कस्मिन् काले इति कदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० ।

**[एतर्हि]** एतस्मिन् काले इति एतर्हि । 'सदा-ऽधुनेदानीं-तदानीमेतर्हि' (७।२।९६) एतर्हि निपातः ।

**[अधुना]** अस्मिन् अनद्यतनकाले इति अधुना । 'सदा-ऽधुनेदानीं-तदानीमेतर्हि' (७।२।९६) अधुना निपातः ।

**[इदानीम्]** अस्मिन् काले इति इदानीम् । 'सदा-ऽधुनेदानीं-तदानीमेतर्हि' (७।२।९६) इदानीं निपातः ।

**[सद्यः]** समान अग्रे अहन् । समाने अहनि = सद्यः । 'सद्यो-ऽद्य-परेद्यव्यह्नि' (७।२।९७) सद्यः निपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परेद्यवि]** पर अग्रे अहन् । परस्मिन् अहनि = परेद्यवि । 'सद्योऽद्य-परेद्यव्यह्नि' (७।२।९७) परेद्यवि निपातः ।

**[पूर्वेद्युः]** पूर्व अग्रे अहन् । पूर्वस्मिन् अहनि = पूर्वेद्युः । 'पूर्वा-ऽपरा-ऽधरो-त्तरा-ऽन्या-ऽन्यतरेतरादेद्युस्' (७।२।९८) एद्युस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[उभयेद्युः]** उभय अग्रे अहन् । उभयस्मिन् अहनि = उभयेद्युः । 'उभयाद् द्युस् च' (७।२।९९) एद्युस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[परुत्]** पर अग्रे वर्ष । परस्मिन् वर्षे इति परुत् । 'ऐषमः-परुत्-परारि वर्षे' (७।२।१००) परुत् निपातः ।

**[परारि]** परतर अग्रे वर्ष । परतरस्मिन् वर्षे इति परारि । 'ऐषमः-परुत्-परारि वर्षे' (७।२।१००) परारि निपातः ।

**[ऐषमः]** इदम् अग्रे वर्ष । अस्मिन् वर्षे इति ऐषमः । 'ऐषमः-परुत्-परारि वर्षे' (७।२।१००) ऐषमः निपातः ।

**[कर्हि]** किम्शब्दात् । कस्मिन् काले इति कर्हि । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क ।

**[यथा]** यद्शब्दात् । येन प्रकारेण इति यथा । 'प्रकारे था' (७।२।१०२) थाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कथम्]** केन प्रकारेण इति कथम् । 'कथमित्थम्' (७।२।१०३) कथं निपातः ।

**[पञ्चधा]** पञ्चन्शब्दात् । पञ्चभिः प्रकारैः इति पञ्चधा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

**[ऐकध्यम्]** एकशब्दात् । एकेन प्रकारेण इति ऐकध्यम् । 'वैकाद् ध्यमञ्' (७।२।१०६) ध्यमञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ।

**[द्वैधम्]** द्विशब्दात् । द्वाभ्यां प्रकाराभ्यां इति द्वैधम् । 'द्वि-त्रेर्धमञेधौ वा' (७।२।१०७) धमञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ।

**[द्वेधा]** द्विशब्दात् । द्वाभ्यां प्रकाराभ्यां इति द्वेधा । 'द्वि-त्रेर्धमञेधौ वा' (७।२।१०७) एधाप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[पञ्चकृत्वः]** पञ्चन्शब्दात् । पञ्च वारा अस्य इति पञ्चकृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वस्प्र० ।

**[द्विः]** द्विशब्दात् । द्वौ वारौ अस्य इति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० ।

**[सकृत्]** एकशब्दात् । एकवारं = सकृत् । 'एकात् सकृच्चास्य' (७।२।१११) सकृत् निपातः ।

**[बहुधा]** बहुशब्दात् । बहुभिः प्रकारैः इति बहुधा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

**[प्राक्]** 'अञ्चू गतौ च' (१०५) अञ्च्, प्रपूर्वक० । प्राञ्चतीति क्विप प्राक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । दिक्ः-प्राङ् दिग् रमणीया, प्राच्या दिश आगतः, प्राच्यां दिशि वसति । देशः - प्राङ् देशो रमणीयः, प्राचो देशादागतः, प्राचि देशे वसति । कालः-प्राङ् कालो रमणीयः, प्राचः कालादागतः, प्राचि काले वसति ।

**[दक्षिणतः]** दक्षिणस्यां अदूरवर्त्तिन्यां दिशि आगतः इति दक्षिणतः । 'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[पश्चात्]** अपरशब्दात् । अपरस्मिन् काले इति पश्चात् । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'पश्चोऽपरस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिक्पूर्वस्य चाऽऽति' (७।२।१२४) पश्च आदेशः ।

**[पुरः]** पूर्वशब्दात् । पूर्वस्मिन् देशे वसति इति पुरः । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्प्र० - पूर्व → पुर् आदेशः ।

**[पुरस्तात्]** पूर्वशब्दात् । पूर्वस्मिन् देशे वसति इति पुरस्तात् । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्तात्प्र० - पूर्व० → पुर् आदेशः ।

**[उपरि]** ऊर्ध्वशब्दात् । ऊर्ध्वे देशे वसति इति उपरि । 'ऊर्ध्वाद् रि-रिष्टातौ उपश्चाऽस्य' (७।२।११४) रिप्र०- ऊर्ध्व० → उप आदेशः ।

**[उपरिष्टात्]** ऊर्ध्वशब्दात् । ऊर्ध्वे देशे वसति इति उपरिष्टात् । 'ऊर्ध्वाद् रि-रिष्टातौ उपश्चाऽस्य' (७।२।११४) रिष्टात्प्र० - ऊर्ध्व० → उप आदेशः ।

**[दक्षिणा]** दक्षिणाशब्दात् । दक्षिणस्यां दिशि वसति इति दक्षिणा । 'वा दक्षिणात् प्रथमा-सप्तम्या आः' (७।२।११९) आप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[दक्षिणाहि]** दक्षिणाशब्दात् । दक्षिणस्यां दिशि वसति इति दक्षिणाहि । 'आ-ऽऽही दूरे' (७।२।१२०) आहिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[दक्षिणेन]** दक्षिणाशब्दात् । दक्षिणस्यां अदूरवर्त्तिन्यां दिशि वसति इति दक्षिणेन । 'अदूरे एनः' (७।२।१२२) एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[द्वितीया करोति क्षेत्रम्]** क्षेत्रस्य द्वितीयं वारं कर्षणं करोति इति द्वितीया करोति क्षेत्रम् । 'तीय-शम्ब-बीजात् कृगा कृषौ डाच्' (७।२।१३५) डाच्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः ।

**[शुक्लीकरोति]** अशुक्लं शुक्लं करोति इति शुक्लीकरोति । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) ई० ।

**[अग्निसात् संपद्यते]** अग्नि अग्रे संपद्यते । अनग्निः अग्निः संपद्यते इति अग्निसात् संपद्यते । 'जातेः सम्पदा च' (७।२।१३१) स्सात्प्र० ।

**[देवत्रा करोति]** देवाय(देवे) अधीनं देयं करोति इति देवत्रा करोति । 'देये त्रा च' (७।२।१३३) त्राप्र० ।

**[बहुशः]** वहुशब्दात् । वहुभ्य इति वहुशः । 'बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस्' (७।२।१५०) शस्प्र० ।

**[पथिद्वैधानि]** द्विशब्दात् । द्वाभ्यां प्रकाराभ्यां इति द्वैधम् । 'तद्वति धण्' (७।२।१०८) धण्प्र० → ध । वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते (७।४।१) वृद्धिः द्वै । पथां द्वैधानि इति पथिद्वैधानि । जस्प्र० । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[संशयत्रैधानि]** त्रिशब्दात् । त्रिभिः प्रकारैः इति त्रैधम् । 'तद्वति धण्' (७।२।१०८) धण्प्र० → ध । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते (७।४।१) वृद्धिः त्रै । संशयानां त्रैधानि इति संशयत्रैधानि । जस्प्र० । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[पचतिरूपम्]** पचतिशब्दात् । प्रशस्तं पचति इति पचतिरूपम् । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० ।।छ।।

### विभक्ति-थमन्त-तसाद्याभाः ।।१।१।३३।।

**[विभक्तिथमन्तसाद्याभाः]** थम् अन्ते येषां ते = थमन्ताः, तस् आदिर्येषां ते = तसादयः, थमन्ताश्च तसादयश्च =

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थमन्ततसादयः, विभक्तयश्च थमन्ततसादयश्च = विभक्तिथमन्ततसादयः, विभक्तिथमन्ततसादीनां इव आभाच्छाया येषां ते = विभक्तिथमन्ततसाद्याभाः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वत्वम् । प्रथमा जस् । 'अत आ: स्यादौ जस्-भ्याम्-ये' (१।४।१) आ० ।

**[अहंयुः]** अहम्शब्दात् । अहमस्याऽस्तीति अहंयुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० । सकाराऽनुवन्धः पदसंज्ञार्थः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[शुभंयुः]** शुभंशब्दात् । शुभमस्याऽस्तीति शुभंयुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० । सकाराऽनुवन्धः पदसंज्ञार्थः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[अस्तिक्षीरा ब्राह्मणी]** अस्ति = विद्यमानं क्षीरं यस्याः सा=अस्तिक्षीरा । 'आत्' (२।४।१८) आप् । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ॥ ॥

### वत्-तस्याम् ॥१।१।३४॥

**[वत्तस्याम्]** वच्च तसिश्च आम् च = वत्तस्याम् । प्रथमा जस् । सूत्रत्वात् लोपः । अव्यभिचारणा व्यभिचारी यन्नियम्यते तत् साहचर्यम् ।

**[मुनिवद् वृत्तम्]** 'मनिंच् ज्ञाने' (१२६३) मन् । मन्यते संसारं असारतया इति मुनिः । 'मने-रुदेतौ चास्य वा' (उणा० ६१२) इप्र० - अकारस्य उकारः । मुनेः अर्हं इति मुनिवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० (?) । 'तस्याऽर्हे क्रियायां वत्' (७।१।५१) वत्प्र० । प्रथमैक० सि० । 'अव्ययस्य' (३।२।७) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तनं = वृत्तम् । 'क्लीवे क्तः' (५।३।१२३) क्तप्र० → त । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[क्षत्रियवद् युध्यन्ते]** क्षत्रशब्दात् । क्षत्रस्याऽपत्यं क्षत्रियः । 'क्षत्रादियः' (६।१।९३) इयप्र० । क्षत्रिय इव इति क्षत्रियवद् । 'स्यादेरिवे' (७।१।५१) वत्प्र० । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

'युधिंच् सम्प्रहारे' (१२६०) युध् । वर्तमानाया अन्ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[उरस्तः]** उरस्शब्दात् । उरसा एकदिक् इति उरस्तः । 'यश्चोरसः' (६।३।२१२) तसिप्र० → तस् । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० ।

**[उच्चैस्तराम्]** उच्चैस्शब्दात् । अतिशयेन उच्चैः इति उच्चैस्तराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० । 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) आम् । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[उच्चैस्तमाम्]** उच्चैस्शब्दात् । प्रकृष्टः उच्चैः इति उच्चैस्तमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० । 'किं-त्याद्येऽव्ययादसत्वे तयोरन्तस्याऽऽम्' (७।३।८) आम् । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ॥ छ ॥

### क्त्वा-तुमम् ॥१।१।३५॥

**[क्त्वातुमम्]** क्त्वा च तुम् च अम् च = क्त्वातुमम् । प्रथमा जस् । सूत्रत्वात् लोपः ।

**[कृत्वा]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[हृत्वा]** 'हृंग् हरणे' (८८५) हृ । हरणं पूर्वं = हृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रकृत्य]** 'डुकृंग् करणे' (८८८) कृ, प्रपूर्व० । प्रकरणं पूर्वं इति प्रकृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोन्तः ।

**[प्रहृत्य]** 'हृंग् हरणे' (८८५) हृ, प्रपूर्वक० । प्रहरणं पूर्वं इति प्रहृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोन्तः ।

**[कर्त्तुम्]** करणाय इति कर्त्तुम् । 'क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती (५।३।१३) तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः अर् ।

**[हर्त्तुम्]** हरणाय इति हर्त्तुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः अर् ।

**[यावज्जीवमदात्]** 'जीव प्राणधारणे' (४६५) जीव्, यावत्पूर्वक० । यावत् कालं जीव्यते इति यावज्जीवम् । 'यावतो विन्द-जीवः' (५।४।५५) णम्प्र० । प्रथमैकं० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) द० → ज० ।

'डुदांग्क् दाने' (११३८) दा । अद्यत० दि । 'सिजद्यतन्याम्' (३।४।५३) सिच्प्र० । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[स्वादुङ्कारं भुङ्क्ते]** स्वादोः करणं = स्वादुङ्कारं । 'स्वाद्वार्थाद् अदीर्घात्' (५।४।५३) ख्णम्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोन्तः ।

'भुजंप् पालनाऽभ्यवहारयोः' (१४८७) भुज् । वर्तमानायाः ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० । 'श्नाऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गे० (१।३।३९) न० → ङ० ॥ छ ॥

### गतिः ॥१।१।३६॥

**[अदःकृत्य]** 'डुकृंग् करणे' (८८८) कृ, अदस् पूर्व० । अदःकरणं पूर्वं इति अदःकृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमैक० सि । 'अव्ययस्य (३।२।७) सिलोपः । 'अग्रहा-ऽनुपदेशेऽन्तरदः' (३।१।५) गतिसंज्ञा । अनेन अव्ययसंज्ञा । तस्य किं फलं ? 'अतः कृ-कमि-कंस०' (२।३।५) इत्यादिना रस्य स न ॥ छ ॥

### अप्रयोगीत् ॥१।१।३७॥

**[अप्रयोगी]** 'युजृंपी योगे' (१४७६) युज्, प्रपूर्वक० । प्रयोजनं = प्रयोगः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गुणः प्रयोज । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । प्रयोगोऽस्याऽस्तीति प्रयोगी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । न प्रयोगी = अप्रयोगी । 'नञत्' (३।२।१२५) न० → अ० । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः ई । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[इत्]** 'इंण्क् गतौ' (१०७५) इ । एत्यपगच्छतीति इत् । क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[एधते]** 'एधि वृद्धौ' (७४१) एध् । वर्त्तमानायाः ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ० ।

**[शेते]** 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्तमानायाः ते । 'शीङ एः शिति' (४।३।१०४) शे. ।

**[यजते-यजति]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । वर्तमानायाः ते-तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ० ।

**[चिनुते]** 'चिंगट् चयने' (१२९०) चि । वर्त्तमानायाः ते । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु० ।

**[चिनोति]** 'चिंगट् चयने' (१२९०) चि । वर्त्तमानायाः तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गुणः नो ।

**[कण्डूयते-कण्डूयति]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू, सौत्रोऽयं धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० । वर्त्तमानायाः ते-तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दवथुः]** 'टुदुंट् उपतापे' (१२९७) दु । दुनोतीति दवथुः । 'ट्वितोऽथुः' (५।३।८३) अथुप्र० ।

**[चित्रीयते]** 'चित्रङ् आश्चर्ये' (  ) चित्र । आश्चर्यं चित्रं करोति इति चित्रीयते । 'नमो-वरिवश्चित्रङोऽर्चा-सेवाऽऽश्चर्ये' (३।४।३७) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अवर्णस्य ईकारु । वर्तमानायाः ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[मा भवान् कार्षीत्]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् → स् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृद्धिः आर् । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) स० → ष० ।

**[पपिथ]** 'पां पाने' (२) पा । परोक्षायाः थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्त्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ॥ छ ॥

### अनन्तः पञ्चम्याः प्रत्ययः ॥१।१।३८॥

**[अनन्तः]** न अन्तः = अनन्तः । 'अन् स्वरे' (३।२।१२९) अन् । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पञ्चम्याः]** 'पचुङ् व्यक्तीकरणे' (६५७) पच् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) पञ्च् । पञ्चन्ति(न्ते) = व्यक्तीकुर्वन्ति पञ्चत्वसंख्यामिति पञ्चन् । 'उक्षि-तक्ष्यक्षीशि-राजि-धन्वि-पञ्चि-पूषि-क्लिदि-स्निहि-नु-मस्जेरन्' (उणा० ९००) अन्प्र० । पञ्चानां पूरणी = पञ्चमी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० → ई । पञ्चम्येक० ङसि → अस् । 'स्त्रिया ङितां०' (१।४।२१) दास् आदेशः ।

**[प्रत्ययः]** 'इंण्क् गतौ' (१०७५) इ, प्रतिपूर्व० । प्रतीयते येनार्थः स = प्रत्ययः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[राज्ञी]** राजन् 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । 'अनोऽस्य' (२।१।१०८) अलोपः । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) न० → ञ० ।

**[कर्त्री]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कर्त्री । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङीप्र० → ई० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[खट्वा] 'खट काङ्क्षे' (१८६) खट् । खट्यते = आकांक्ष्यते शयालुभिरिति खट्वा । 'लटि-खटि-खलि-नलि०' (उणा० ५०५) वप्रत्यये खट्वा इति निपातः ।

[कार्यम्] 'डुकृंग् करणे' (८८८) कृ । क्रियते इति कार्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

[पाक्यम्] 'डुपचींष् पाके' (८९२) पच् । पच्यते इति पाक्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।। छ ।।

**डत्यतु संख्यावत्** ।।१।१।३९।।

[डत्यतु] डतिश्च अतुश्च = डत्यतु । प्रथमाद्वि० औ । सूत्रत्वात् लोपः ।

[संख्यावत्] संख्या इव । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

[कतिकः] का संख्या मानं एषां इति कति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लोपः । कतिभिः क्रीतः इति कतिकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[यतिकः] यतिभिः क्रीतः इति यतिकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[यतिधा] यत् (या) संख्या मानं एषां इति यति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । यतिभिः प्रकारैः इति यतिधा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

[यतिकृत्वः] यति वारा अस्य = यतिकृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० ।

[ततिकः] सा संख्या मानं एषां इति तति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादेर्लोपः । ततिभिः क्रीतः=ततिकः । 'संख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० ।

[ततिधा] ततिभिः प्रकारैः = ततिधा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

[ततिकृत्वः] तति वारा अस्य = ततिकृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० ।

[यावत्कः] यत् परिमाणं एषां इति यावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । यावद्भिः क्रीतः = यावत्कः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[यावद्धा] यावद्भिः प्रकारैर्यावद्धा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

[यावत्कृत्वः] यावन्तो वारा अस्य = यावत्कृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० ।

[तावत्कः] तावद्भिः क्रीतः = तावत्कः । 'संख्या-ऽतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[तावद्धा] तावद्भिः प्रकारैः = तावद्धा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

[तावत्कृत्वः] तावन्तो वारा अस्य = तावत्कृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० ।

[कियत्कः] किं परिमाणं एषां इति कियन्तः । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० तथा किमः कियादेशः । कियद्भिः क्रीतः इति कियत्कः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

अग्रे पूर्ववत् समासादिविधिर्ज्ञेयः । कप्रत्ययादिसंख्याकार्यं भजते, न पुनः सर्वथा संख्यात्वं, नियतः परिच्छेदाभावात् संख्या हि परिच्छेदका ।। छ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहु-गणं भेदे ।।१।१।४०।।

[बहु-गणं] बहुश्च गणं च = बहुगणम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

[भेदे] भेद । सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए० ।

[बहुकः] बहुभिः क्रीतः इति बहुकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[बहुधा] बहुभिः प्रकारैः इति बहुधा । 'संख्याया धा' (७।२।१०४) धाप्र० ।

[बहुकृत्वः] बहवो वारा अस्य = बहुकृत्वः । 'वारे कृत्वस्' (७।२।१०९) कृत्वसप्र० ।

[गणकः] गणैः क्रीतः इति गणकः । 'संख्या-डतेश्चाऽशत्०' (६।४।१३०) कप्र० । एवमग्रेऽपि ।

वैपुल्येऽत्रेति यथा बहुभिः द्रम्मैः क्रीतोऽश्वो बहुकस्तथा बहुना धान्येन क्रीतोऽश्वो बहुक इति न भवति ।

अयमर्थो यद्यपि द्रम्मेषु धान्ये चाऽपरिच्छेदकत्वमस्ति तथापि द्रम्मविषयं परिच्छेदकत्वं यदि वक्ता चिन्तयति तदा बुध्यतेऽक्लेशेनैव न तु धान्यविषयम् ।। छ ।।

क-समासेऽध्यर्द्धः ।।१।१।४१।।

[क-समासे] 'असक् भुवि' (११०२) अस् (?) ('असूच् क्षेपणे' (१२२१) अस् ।) संपूर्व० । समस्यन्ते नामान्यत्रेति समासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० ⟶ अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः मा । कश्च समासश्च=कसमासम् । तस्मिन्=कसमासे, सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

[अध्यर्द्धः] अधिकं अर्द्धं यस्याऽसौ अध्यर्द्धः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[अध्यर्द्धकम्] अधिकं अर्द्धं यस्याऽसौ अध्यर्द्धः । अध्यर्द्धेन क्रीतं = अध्यर्द्धकम् । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० ।

[अध्यर्द्धशूर्पम्] अध्यर्द्धेन शूर्पेण क्रीतं = अध्यर्द्धशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लोपः । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।।छ।।

अर्द्धपूर्वपदः पूरणः ।।१।१।४२।।

[अर्द्धपूर्वपदः] पूर्वं च तत् पदं च=पूर्वपदम् । अर्द्धं पूर्वपदं यस्याऽसौ अर्द्धपूर्वपदः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[पूरणः] 'पूरैचि आप्यायने' (१२६८) पूर् । पूर्यतेऽनेनेति पूरणः । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० ⟶ अन । प्रथमैक० सि ।

[अर्द्धपञ्चमकम्] पञ्चन् । पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७।१।१५९) मट्प्र० ⟶ म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । अर्द्धं पञ्चमं येषां ते=अर्द्धपञ्चमाः । अर्द्धपञ्चमैः क्रीतं = अर्द्धपञ्चमकम् । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । प्रथमैक० सि ।

[अर्द्धपञ्चमशूर्पम्] अर्द्धपञ्चमैः शूर्पैः क्रीतं = अर्द्धपञ्चमशूर्पम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लोपः । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।।छ।।

इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ प्रथमस्याऽध्यायस्य
प्रथमः पादः समाप्तः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ प्रथमाऽध्यायस्य द्वितीयः पादः ॥

### समानानां तेन दीर्घः ॥१।२।१॥

**[समानानाम्]** समानं = तुल्यं मानं = परिमाणं येषां ते = समानाः । 'समानस्य धर्मादिषु' (३।२।१४९) समानस्य सभावः । तेषाम् = समानानाम्, षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) आम्० → नाम्० । 'दीर्घो नाम्यतिसृ-चतसृ-षृः' (१।४।४७) दीर्घः ।

**[तेन]** तद् । तृतीयायाः टा । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णा०' (१।२।६) ए ।

**[दीर्घः]** दीर्घ । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[दण्डाऽग्रम्]** शमू (१२३०) 'दमूच् उपशमे' (१२३१) दम् । दम्यते जनोऽनेनेति दण्डः । 'पञ्चमात् डः' (उणा० १६८) डप्र० । 'अग कुटिलायां गतौ' (१०२२) अग् । अगति = गच्छति पुरोभावं इति अग्रम् । 'भी-वृधि-रुधि-वज्यगि-रमि-वमि-वपि-जपि-शक्ति-स्फायि-वन्दीन्दि-पदि-मदि-मन्दि-चन्दि-दसि-घसि-नसि-हस्यसि-वासि-दहि-सहिभ्यो रः' (उणा० ३८७) रप्र० । दण्डस्याऽग्रं = दण्डाऽग्रम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[दधीदम्]** दधि । प्रथमा सि । इदम् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[दधीहते]** 'दधि धारणे' (७४५) दध् । दधति (ते) = धारयति स्थौल्यभावमिति दधि । 'पदि-पठि-पचि-स्थलि-हलि-कलि-बलि०' (उणा० ६०७) इप्र० । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'ईहि चेष्टायां' (८५७) ईह् । वर्त्तमानायास्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ. ।

**[नदीन्द्रः]** 'णद अव्यक्ते शब्दे' (२९९) णद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नद् । नदति = शब्दायतेऽवगाह्यमाना इति नदी । 'लिहादि०' (५।१।५०) अच्प्र० → अ । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङीप्र० → ई । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'इदु परमैश्वर्ये' (३०९) इद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) इन्द् । इन्दति = परमैश्वर्यमनुभवतीति इन्द्रः । 'भी-वृधि-रुधि-वज्यगि०' (उणा० ३८७) रप्र० । नद्या इन्द्रः = नदीन्द्रः । प्रथमा सि । अनेन ।

**[मधूदकम्]** 'मनिंच् ज्ञाने' (१२६३) मन् । मन्यते मधुरतया विवेकिभिरिति मधु । 'मनि-जनिभ्यां धतौ च' (उणा० ७२१) उप्र० - न० → ध० । मधुना मिश्रमुदकं = मधूदकम् ।

**[मधूहनम्]** मधु अग्रे 'ऊहि तर्के' (८७०) ऊह् । मधु ऊह्यतेऽनेनेति मधूहनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन० ।

**[वधूदरम्]** 'वहीं प्रापणे' (९९६) वह् । उह्यते विवाहकाले मामु(तु)लेनेति वधू । 'वहेर्ध् च' (उणा० ८३२) ऊप्र०-ह० → ध० । वध्वा उदरं = वधूदरम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[वधूढा]** 'वहीं प्रापणे' (९९६) वह् । उह्यते स्म = ऊढा । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त० → ध० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्विला किहइं दीर्घत्वम् । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः ।

**[पितृषभः]** 'पांक् रक्षणे' (१०६७) पा । पाति = रक्षत्यपायेभ्य इति पिता । 'पातेरिच्च' (उणा० ८५८) तृप्र० - आ० → इ० । पितुरित्येतस्य ऋषभः = पितृषभः ।

**[मातृकारः]** ऋ इत्येतस्य कारः = ऋकारः । 'वर्णा-ऽव्ययात् स्वरूपे कारः' (७।२।१५६) कारप्र० । मातुरित्येतस्य ऋकारः = मातृकारः ।

**[होतॢकारः]** होतुरित्येतस्य ऌकारः = होतॢकारः । 'ऋलृति ह्रस्वो वा' (१।२।२) ह्रस्वः ॥ छ ॥

## ऋलृति ह्रस्वो वा ॥१।२।२॥

**[ऋलृति]** ऋश्च लृच्च = ऋलृत्, तस्मिन् = ऋलृति, सप्तम्येक० ङि ।

**[ह्रस्वः]** ह्रस्व । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० ।

**[वा]** वा । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[बालऋश्यः, बालर्श्यः]** बालश्चासौ ऋश्यश्च, वालस्य ऋश्यः = बालऋश्यः, बालर्श्यः । अनेन ह्रस्वः । पक्षे 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अर् ।

**[खट्वऋश्यः, खट्वर्श्यः]** खट्वा चासौ ऋश्यश्च = खट्वऋश्यः, खट्वर्श्यः । अनेन ह्रस्वः । पक्षे 'अवर्णस्ये०' (१।२।६) अर् ।

**[महऋषिः, महर्षिः]** महत् अग्रे ऋषि । महांश्चासौ ऋषिश्च = महऋषिः, महर्षिः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । अनेन ह्रस्वः । पक्षे 'अवर्णस्ये०' (१।२।६) अर् ।

**[धूलिऋतुः, धूल्यृतुः]** धूलिश्चासौ ऋतुश्च = धूलिऋतुः, धूल्यृतुः । अनेन ह्रस्वः । पक्षे 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) य् ।

**[नदिऋच्छति, नद्यृच्छति]** नदी अग्रे 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋच्छ् । वर्त्तमानायाः तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन ह्रस्वः । पक्षे 'इवर्णादि०' (१।२।२१) य् ।

**[तनुऋजुता, तन्वृजुता]** तनोः ऋजुता = तनुऋजुता, तन्वृजुता । अनेन ह्रस्वः । पक्षे 'इवर्णादि०' (१।२।२१) व् ।

**[वधुऋणम्, वध्वृणम्]** वधूनामृणं = वधुऋणं, वध्वृणम् । अनेन ह्रस्वः । पक्षे 'इवर्णादेरस्वे०' (१।२।२१) व् ।

**[कर्तृऋषभः, कर्तृषभः]** कर्तुः ऋषभः = कर्तृऋषभः, कर्तृषभः । अनेन ह्रस्वः । पक्षे 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[बाललृकारः, बालल्कारः]** बालस्य ऌकारः = वाललृकारः, बालल्कारः । अनेन ह्रस्वः । पक्षे 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अल् ।

**[कन्यलृकारः, कन्यल्कारः]** कन्याया ऌकारः = कन्यलृकारः, कन्यल्कारः । अनेन ह्रस्वः । पक्षे 'अवर्णस्ये०' (१।२।६) अल् ।

**[नदीऋश्यः]** नदी चासावृश्यश्च ।

**प्रार्च्छतीत्यादौ** तु परत्वात् 'ऋत्यारुपसर्गस्य' (१।२।९) आर् ॥ छ ॥

## ऌत ॡल्लृ ऋलृभ्यां वा ॥१।२।३॥

**[ऌत ॡल्लृ]** ऌत् षष्ठी ङस् । ॡश्च ल्लृश्च = ॡल्लृ । प्रथमाद्वि० औ । सूत्रत्वात् लोपः । 'रोर्यः' (१।३।२६) पूर्वरस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्वम् । 'स्वरे वा' (१।३।२४) यलोपः ।

**[ऋलृभ्याम्]** आ च ला च = ऋलृ, ताभ्याम् = ऋलृभ्याम्, तृतीयाद्वि० भ्याम् ।

**[वा]** वा प्रथमा सि ।

**[क्रृकारः, क्लृऋकारः, कृकारः]** क्लुः ऋकार = क्रृकारः । प्रथमा सि । अनेन ॠ वा । पक्षे क्लृऋकारः । 'ऋलृति ह्रस्वो वा' (१।२।२) ह्रस्वः । 'ॠस्तयोः' (१।२।५) ॠ = कृकारः ।

**[क्ल्लृकारः, क्लृलृकारः, क्लृकारः]** क्लुः लृकारः = क्ल्लृकारः । प्रथमा सि । अनेन वा ल्लृ । पक्षे क्लृलृकारः । 'ऋलृति ह्रस्वो वा' (१।२।२) ह्रस्वः । 'ॠस्तयोः' (१।२।५) ॠ = क्लृकारः ।।छ।।

**ऋतो वा, तौ च ।।१।२।४।।**

**[ऋतर्]** ऋत् षष्ठी ङस् ।

**[वा]** वा प्रथमा सि ।

**[तौ]** सश्च सश्च = तौ । 'त्यदादिः' (३।१।१२०) एकशेषुः औ ।

**[च]** च प्रथमा सि ।

**[पितॄॅषभः, पितृऋषभः, पितृषभः]** पितुः ऋषभः = पितॄॅषभः । अनेन ॠ । पक्षे पितृऋषभः । 'ऋलृति ह्रस्वो वा' (१।२।२) ह्रस्वः । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[होतॢॢकारः, होतृलृकारः, होतृकारः]** होतुः लृकारः = होतॢॢकारः । अनेन ऋ-लृस्थाने ल्लृ । पक्षे 'ऋलृति ह्रस्वो वा' (१।२।२) ह्रस्वः । एवं होतृकारः । 'ॠस्तयोः' (१।२।५) ऋ-लृस्थाने ॠ ।।छ।।

**ॠस्तयोः ।।१।२।४।।**

**[ॠस्तयोः]** ॠ प्रथमा सि । 'सो रुः' (२।१।७२) स०→र० । सश्च सश्च = तौ । 'त्यदादिः' (३।१।१२०) एकशेषः । तयोः = तयोः, षष्ठी ओस् ।

**[कृषभः]** क्लुः ऋषभः = कृषभः । अनेन लृ-ऋस्थाने ॠ ।

**[होतृकारः]** होतुः लृकारः = होतृकारः । अनेन ऋ-लृस्थाने ॠ ।।छ।।

**अवर्णस्येवर्णादिनैदोदरल् ।।१।२।६।।**

**[अवर्णस्य]** अकारेणोपलक्षितो वर्णोऽवर्णस्तस्य = अवर्णस्य, षष्ठी डस् ।

**[इवर्णादिना]** इवर्ण आदिर्यस्याऽसौ इवर्णादिस्तेन = इवर्णादिना, तृ० टा, 'टः पुंसि ना' (१।४।२४) ना ।

**[एदोदरल्]** एच्च ओच्च अर् च अल् च = एदोदरल् । प्रथमाबहु० जस् । सूत्रत्वात् लोपः ।

**[देवेन्द्रः]** इन्द्रः (१।२।१) सूत्रवत् । देवानामिन्द्रो = देवेन्द्रः । प्रथमैक० सि ।

**[तवेहा]** युष्मद् । षष्ठी ङस् । 'तव मम ङसा' (२।१।१५) युष्मदो ङसा सह तवाऽऽदेशः । 'ईहि चेष्टायां' (८५७) ईह् । ईहनमीहा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप् → आ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[मालेयम्]** माला । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । इदम् । प्रथमैक० सि । 'अयमियं पुंस्त्रियोः सौ' (२।१।३८) इदं → इयमादेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सेक्षते]** तद् । प्रथमैक० सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) तस्य स० । 'आत्' (२।४।१८) आप् । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'ईक्षि दर्शने' (८८२) ईक्ष् । वर्त्तमानायास्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तवोदकम्]** तव उदकम् । प्रथमैक० सि० ।

**[तवोढा]** तव अग्रे ऊढा (१।२।१) सूत्रवत् । अनेन ।

**[गंगोदकम्]** गंगाया उदकं = गंगोदकम् । प्रथमैक० सि ।

**[सोढा]** सा ऊढा = सोढा । ऊढा (१।२।१) सूत्रवत् ।

**[परमर्षिः]** परमश्चासौ ऋषिश्च = परमर्षिः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[तवर्कारः]** तव ऋकारः = तवर्कारः । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[महर्षिः]** अर्ह (५६४) - 'मह पूजायाम्' (५६५) मह् । महतीति महत् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । महांश्चासौ ऋषिश्च = महर्षिः । प्रथमैक० सि । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लोपः ।

**[सर्कारेण]** सा ॠकारः = सर्कारः, तेन ।

**[तवल्कारः]** तव लृकारः = तवल्कारः । प्रथमैक० सि ।

**[सल्कारेण]** सा लृकारः = सल्कारस्तेन । तृ० टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णादिनैदोद्रल्' (१।२।६) ए । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । अनेन सर्वत्र ए-ओ-अर्-अल् ॥ छ ॥

**ऋणे प्र-दशार्ण-वसन-कम्बल-वत्सर-वत्सरस्याऽऽर् ॥१।२।७॥**

**[ऋणे]** ऋण सप्तमी ङि ।

**[प्रदशार्णवसनकम्बलवत्सरवत्सतरस्याऽऽर्]** प्रश्च दशा च ऋणं च वसनश्च कम्बलश्च वत्सरश्च वत्सतरश्च=प्रदशार्णवसन-कम्बलवत्सरवत्सतरम्, तस्य, षष्ठी ङस्, 'टा-ङसोरिनस्यौ' (१।४।५) स्य । आर् प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) इति दशन्शब्दस्य नलोपे सति अनेनैव आर् प्रादिका स्थाप्यन्ते ।

**[प्रार्णम्]** प्रकृष्टं प्रगतं वा ऋणं = प्रार्णम् ।

**[दशार्णम्]** दशानामृणं = दशार्णम् ।

**[ऋणार्णम्]** 'ऋंक् गतौ' (११३५) ऋ । इयर्त्ति कालवशादिति ऋणम् । 'घृ-वी-ह्ना-शुष्युषि-तृषि-कृष्यर्तिभ्यः कित्' (उणा० १८३) कित् णप्र० । ऋणे ऋणं = ऋणार्णम् ।

**[वसनार्णम्]** वसनस्य ऋणं = वसनार्णम् ।

**[कम्बलार्णम्]** कम्बलस्य ऋणं = कम्बलार्णम् ।

**[वत्सरार्णम्]** वत्सरस्य ऋणं = वत्सरार्णम् ।

**[वत्सतरार्णम्]** 'वद व्यक्तायां वाचि' (९९८) वद् । वदति मातरं दृष्ट्वेति वत्सः । 'मा-वा-वद्यमि-कमि-हनि-मानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कष्यशि-पचि-मुचि-यजि-वृ-तृभ्यः सः' (उणा० ५६४) सप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । द्वयोर्मध्ये प्रकृष्टौ(टो) वत्सो = वत्सतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । वत्सतरस्य ऋणं = वत्सतरार्णम् ।

सर्वत्र प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । अनेन ऋता सह आर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ॥ छ ॥

**ऋते तृतीयासमासे** ॥१।२।८॥

**[ऋते]** ऋत सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए ।

**[तृतीयासमासे]** तृतीयायाः समासः = तृतीयासमासस्तस्मिन् ।

**[शीतार्त्तः]** शीतेन ऋतः = शीतार्त्तः । प्रथमैक० सि । अनेन आर् ।

**[सुखेतः]** सुखेन इतः ।

**[दुःखेतः]** दुःखेन इतः ।

**[परमर्त्तः]** परमश्चासावृतश्च = परमर्त्तः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अर् । प्रथमैक० सि ।

**[दुःखेनर्त्तः]** दुःख । तृती० टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए० । ऋत । प्रथमैक० सि । 'अवर्णस्ये०' (१।२।६) अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

("क्षुधार्तः सन् शालीन् कवलयति मांस्पाकवलितान्" ?)

**[कवलयति]** कवलात् (लं) करोतीति कवलयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[मांस्पाकवलितान्]** मांस अग्रे 'डुपचींष् पाके' (८९२) पच् । मांसस्य पचनं = मांस्पाकः । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'मांसस्याऽनङ्-घञि पचि नवा' (३।२।१४१) मांससंबंधि अलोपः । मांस्पाकेन वलिता = मांस्पाकवलितास्तान् = मांस्पाकवलितान् ॥ छ ॥

**ऋत्यारुपसर्गस्य** ॥१।२।९॥

**[ऋति]** ऋत् सप्तम्येक० ङि ।

**[आर्]** आर् प्रथमैक० सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः ।

**[उपसर्गस्य]** 'सृजंत् विसर्गे' (१३४९) सृज्, उपपूर्व० । उप=समीपे भूत्वा धातोरर्थं सृजतीत्युपसर्गः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् । तस्य = उपसर्गस्य, षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[प्रार्च्छति, परार्च्छति]** 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋच्छ्, प्रपूर्व०-परापूर्व० । 'धातोः पूजार्थस्वति०' (३।१।१) उपसर्गसंज्ञा । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन आर् । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छस्य च० ।

**[प्रार्ध्नोति, परार्ध्नोति]** प्र अग्रे, परा अग्रे 'ऋधूट् वृद्धौ' (१३०६) ऋध् । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० नो । अनेन आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[उपेतः] 'इंण्क् गतौ' (१०७५) इ, उपपूर्व० । उपैति स्म = उपेतः । 'गत्यर्थाऽकर्मक - पिब-भुजेः' (५।१।११) क्तप्र० → त ।

**[प्रर्षभं प्रर्श्यं वनम्]** प्रगता ऋषभा यत्र तत् = प्रर्षभम् । प्रगता ऋश्या यत्र तत् = प्रर्श्यं वनम् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अर् ॥ छ ॥

**नाम्नि वा ॥१।२।१०॥**

[नाम्नि] नामन् सप्तम्येक० ङि । 'ईङौ वा' (२।१।१०९) अनोऽस्य लुग्वा ।

**[प्रार्षभीयति, प्रर्षभीयति]** प्र अग्रे ऋषभमिच्छतीति प्रार्षभीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । वर्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेन आर् । पक्षे 'अवर्णस्ये०' (१।२।६) अर् ।

**[उपोष्ट्रीयति]** उप अग्रे उष्ट्रमिच्छतीति उपोष्ट्रीयति । अग्रे पूर्ववत् ॥ छ ॥

**लृत्याल् वा ॥१।२।११॥**

[लृति] लृत् सप्तम्येक० ङि ।

[आल्] आल् प्रथमैक० सि ।

[वा] वा प्रथमा सि ।

**[उपाल्कारीयति, उपल्कारीयति]** उप अग्रे लृकारमिच्छतीति उपाल्कारीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेन आल् । पक्षे 'अवर्णस्ये०' (१।२।६) अल् ।

**[उपलृकारीयति]** उप अग्रे लृकारमिच्छतीति उपलृकारीयति । **'ऋलृति ह्रस्वो वा'** (१।२।२) ह्रस्वः ॥ छ ॥

**ऐदौत् सन्ध्यक्षरैः ॥१।२।१२॥**

**[ऐदौत्]** ऐच्च औच्च = ऐदौत् । प्रथमा औ । सूत्रत्वात् लोपः ।

[सन्ध्यक्षरैः] सन्धावक्षराणि = सन्ध्यक्षराणि, तैः = सन्ध्यक्षरैः । तृतीयायाः भिस् । 'भिस ऐस्' (१।४।२) ऐस् । अनेन ऐ कीजइ ।

**[तवैषा]** 'इंण्क् गतौ' (१०७५) इ । एतीत्येतद् । 'इणस्तद्' (उणा० ८९६) तद्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'आ द्वेरः (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) प्रथमाऽकारस्य लोपः । 'तः सौ सः' (२।१।४२) तकारस्य सत्वे 'नाम्यन्तस्था०' (२।३।१५) सकारस्य षत्वम् । 'आत्' (२।४।१८) आप् । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । तव (१।२।६) सूत्रवत् ।

**[खट्वैषा]** खट्व । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः (१।२।१) दीर्घत्वे प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अग्रे एषा पूर्ववत् ।

**[तवेन्द्री-सैन्द्री]** तव - सा (१।२।६) सूत्रवत् । इन्द्रो देवता अस्याः सा = ऐन्द्री । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अकारस्य लोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० → ई । 'अस्य ङ्यां लुक्' (२।४।८६) अकारस्य लोपः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन । इन्द्रः (१।२।१) सूत्रवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[तवौदनः]** तव (१।२।६) सूत्रवत् । 'उन्दैप् क्लेदने' (१४९१) उन्द् । उद्यते=क्लिद्यते घृतादिना इत्योदनः । 'उन्देर्नलुक् च' (उणा० २७१) अनप्र० - नलोपश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ. ।

**[तवौपगवः]** तव (१।२।६) सूत्रवत् ! उपगो मांडियइ, *उपगतो गौर्यस्याऽसौ उपगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) गो० → गु० । उपगोरपत्यं = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ कीजइ । 'अस्वयम्भुवोऽव्' (७।४।७०) उकारस्य अव् । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । अनेन ।

**[दध्यैच्छत्]** दधि अग्रे 'इषत् इच्छायाम्' (१४१९) इष् । ह्यस्तन्या दिव् । 'तुदादेः शः' (३।४।८१) शप्र० । 'गमिषद्यमश्छः' (४।२।१०६) षस्य छत्वम् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) आद्यछस्य चत्वम् । 'स्वरादेस्तासु' (४।४।३१) इकारस्य ऐत्वम् ।

**[मध्वोदनः]** मधुना मिश्र ओदनः=मध्वोदनः । मधु (१।२।१) सूत्रवत् ।

**[साध्वौषधम्]** 'उषू दाहे' (५२९) उष् । ओषति=दहति रोगानित्यौषधिः । 'उषेरधिः' (उणा० ६७५) अधिप्र० ओष आदेशः । ओषधेरिदं=औषधम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इकारस्य लोपः ॥ छ ॥

**ऊटा** ॥१।२।१३॥

**[ऊटा]** ऊट् तृतीयायाष्टा ।

**[धौतः]** 'धावूग् गति-शुद्धयोः' (९२०) धाव् । धाव्यते स्म = धौतः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । प्रथमैक० सि । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) व० → ऊट् । अनेन ।

**[धौतवान्]** 'धावूग् गति-शुद्धयोः' (९२०) धाव् । धावति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० । प्रथमैक० सि । 'अनुनासिके च च्छ्-वः शूट् (४।१।१०८) वस्य ऊट् । अनेन औ । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[लौः]** 'लूग्श् छेदने' (१५१९) लू । लुनन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) लौ । 'ओदौतोऽवाव्' (१।२।२४) आव् । लावयतीति लौः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपे 'अनुनासिके च च्छ-वः शूट्' (४।१।१०८) वस्य ऊट् । अनेन औ । प्रथमैक० सि ।

**[पौः]** 'पूग्श् पवने' (१५१८) पू । पुनन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः (४।३।५१) पौ । 'ओदौतोऽवाव्' (१।२।२४) आव् । पावयतीति पौः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपे 'अनुनासिके०' (४।१।१०८) वस्य ऊट् । अनेन औ । प्रथमैक० सि ॥ छ ॥

**प्रस्यैषैष्योढोढ्यूहे स्वरेण** ॥१।२।१४॥

**[प्रस्यैषैष्योढोढ्यूहे]** प्र षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य० । एषश्च एष्यश्च ऊढश्च ऊढिश्च ऊहश्च = एषैष्योढोढ्यूहम् । तस्मिन् = एषैष्योढोढ्यूहे, सप्तम्येक० ङि । अवर्णस्ये० (१।२।६) ए. ।

·**[स्वरेण]** स्वर तृतीयायाष्टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्ये०' (१।२।६) ए । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

---

P * उप-समीपे गौर्यस्याऽसौ ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[प्रैषः]** प्र अग्रे 'इषत् इच्छायाम्' (१४१९) इष् । एषणं = एषः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (१४१९) गुणः ए । अनेन ऐ । प्रथमैक० सि ।

**[प्रैष्यः]** प्र अग्रे 'इषत् इच्छायाम्' (१४१९) इष् । इष्यते = एष्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण् प्र० → य । 'लघोरुपान्त्यस्य (४।३।४) गुणः ए । अनेन ऐ । प्रथमैक० सि ।

**[प्रौढः]** प्र अग्रे 'वहीं प्रापणे' (९९६) वह् । उह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । 'हो-धुट-पदान्ते' (२।१।८२) हस्य ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धस्य ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्विला दीर्घत्वम् । अनेन औ । प्रथमैक० सि ।

**[प्रौढिः]** प अग्रे 'वहीं प्रापणे' (९९६) वह् । वहनमूढिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । शेषं 'प्रौढः' वत् ।

**[प्रौहः]** प्र अग्रे 'ऊहि वितर्के' (८७०) ऊह् । ऊहनमूहः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । अनेन औ । प्रथमैक० सि ।

**[प्रेतः]** प्र अग्रे 'इंण्क् गतौ' (१०७५) इ । एति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'अवर्णस्ये०' (१।२।६) ए । प्रथमैक० सि ।

**[प्रोतः]** प्र अग्रे 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । ऊयते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ । प्रथमैक० सि ।

**[प्रेषः]** 'ईष उञ्छे' (५०५) ईष्, प्रपूर्व० । प्रेषणं = प्रेषः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रेषते]** जेषृङ् (८३६) - णेषृङ् (८३७) - **'एषृङ् गतौ' (८३८)** एष्, प्रपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'उपसर्गस्यानिणेधेदोति' (१।२।१९। अलोपः ।

**[प्रेष्यते]** 'एषृङ् गतौ' (८३८) **एष्, प्रपूर्व०** । **वर्त्तमानायास्ते** । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । **'उपसर्गस्यानिणेधेदोति'** (१।२।१९। अलोपः ।

**[प्रोढवान्]** 'वहीं प्रापणे' (९९६) वह्, प्रपूर्व० । प्रवहति स्म = प्रोढवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । **'हो धुट्-पदान्ते'** (२।१।८२। ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्विला दीर्घत्वम् । प्रथमैक० सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'पदस्य' (२।१।८९) तलोपः ॥छ॥

**स्वैर-स्वैर्यक्षौहिण्याम्** ॥१।२।१५॥

**[स्वैरस्वैर्यक्षौहिण्याम्]** स्वैरश्च स्वैरी च = स्वैरस्वैरिणौ, स्वैरस्वैरिभ्यामुपलक्षिता अक्षौहिणी = स्वैरस्वैर्यक्षौहिणी, तस्याम् । यद्वा स्वैरश्च स्वैरी च अक्षौहिणी च = स्वैरस्वैर्यक्षौहिर्णी, तस्याम् = स्वैरस्वैर्यक्षौहिण्याम्, सप्तम्येक० ङि । 'स्त्रिया ङितां०' (१।४।२८) ङि० → दाम्० → आम् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) यत्वम् ।

**[स्वैरः]** स्व (१।१।१७) सूत्रवत् । 'ईरिक् गति-कम्पनयोः' (१११५) ईर् । ईरणमीरः । 'भावा-ऽकर्त्रोः' (५।३।१८)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घञ्प्र० → अ । स्वस्य ईरः = स्वैरः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । अनेन ऐ. ।

**[स्वैरी]** स्वयमग्रे 'ईरिक् गति-कम्पनयोः' (१११५) ईर् । स्वयमीरितुं शीलमस्य स्वैरी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ऐ । अत एव सूत्रनिर्देशात् स्वयंशब्दस्य "स्व" भावः ।

**[अक्षौहिणी]** 'अशौटि व्याप्तौ' (१३१४) अश् । अश्नुते = व्याप्नोति चक्रमित्यक्षः । 'मा-वा-वद्यमि-कमि-हनि-मानि-कष्यशि-पचि-मुचि-यजि-वृ-तृभ्यः सः' (उणा० ५६४) सप्र० । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः' (२।१।८७) शस्य षत्वम् । 'ष-ढोः कस्सि' (२।१।६२) षस्य कत्वम् । 'नाम्यन्तस्था०' (२।३।१५) सस्य षत्वम् । क-षसंयोगे क्ष । अक्ष अग्रे 'ऊहि वितर्के' (८७०) ऊह् । ऊहनं = ऊहः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । अक्षाणामूहोऽस्याऽस्तीत्यक्षौहिणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'स्त्रियां नृतोऽस्वस्रादेर्डीः' (२।४।१) ङीप्र० । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) नस्य णत्वम् । अनेन औ. ॥ छ ॥

## अनियोगे लुगेवे ॥१।२।१६॥

**[अनियोगे]** 'युजूंपी योगे' (१४७६) युज्, निपूर्व० । नियोजनं = नियोगः । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) ओकारु । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) जस्य गत्वम् । न नियोगोऽनियोगः । 'नञत्' (३।२।१२५) न० → अ० । तस्मिन् = अनियोगे, सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए. । अनियम इत्यर्थः, तद्विषयेऽनियमविषये ।

**[लुगेवे]** लुक् प्रथमैक० सि । 'दीर्घङ्याव्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । एव सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[इहेव तिष्ठ]** इदम् शब्दात् । अस्मिन्निह । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) इह निपात्यते । एव । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ॥ स्था (१।१।११) सूत्रवत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ० । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था०' (४।२।१०८) तिष्ठ ॥ 'अतः प्रत्ययाल्लुक्' (४।२।१०८) हिलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन इहशब्दस्याऽकारस्य लोपः ।

**[अद्येव गच्छ]** इदम् शब्दात् । अस्मिन्नहनि = अद्य । 'सद्यो-ऽद्य-परेद्यव्यह्नि' (७।२।९७) द्यप्र० । इदम् शब्दस्य "अ" कीजइ । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । एव । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । अम (३९२) - द्रम (३९३) हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । पं० हि० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) मस्य छत्वम् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) आद्यछस्य चत्वम् । 'अतः प्रत्ययाल्लुक्' (४।२।१०८) हिलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेन द्यस्याऽकारस्य लोपः ।

**[इहैव तिष्ठ, मा गाः]** इह-एव प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ । तिष्ठ पूर्ववत् । 'इंण्क् गतौ' (१०७५) इ, माङ्पूर्व० । अद्यत० सि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिचो लोपः । 'इणिकोर्गाः' (४।४।२३) गा आदेशः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वौष्ठौतौ समासे** ॥१।२।१७॥

**[वौष्ठौतौ]** वा प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । ओष्ठश्च ओतुश्च = ओष्ठौतु माडियइ । तस्मिन्, = ओष्ठौतौ । सप्तम्येक० ङि । 'ङिर्डौः' (१।४।२५) डौ → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[समासे]** समसनं = समासस्तस्मिन् = समासे, सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[बिम्बोष्ठी, बिम्बौष्ठी]** 'बन्धंश् बन्धने' (१५५२) बन्ध् । बध्नाति रक्ततामिति । 'डी-नी-बन्धि-शृधि-चलिभ्यो डिम्वः' (उणा० ३२५) डिद् इम्वप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्धस्य लोपः । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङीप्र० । 'अस्य ङ्यां लुक्' २।४।८६) अकारस्य लोपः । बिम्ब्याः फलं = बिम्वम् । 'हेमादिभ्योऽञ्' (६।२।४५) अञ्प्र० । 'फले' (६।२।५८) अञ्लोपः । 'ङ्यादेर्गौणस्याऽक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः कीजइ । 'उषू दाहे' (५२९) उष् । ओषति = दह्यते पानीयादिनेत्योष्ठः । 'वनि-कणि-काश्युषिभ्यष्ठः' (उणा० १६२) ठप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । बिम्बाकारावौष्ठौ यस्याः सा । 'नासिकोदरौष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गा-ऽङ्ग-गात्र-कण्ठात्' (२।४।३९) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अकारस्य लोपः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन बिम्बशब्दस्याऽकारस्य लोपः । पक्षे 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[स्थूलोतुः, स्थूलौतुः]** स्था (१।१।११) सूत्रवत् । तिष्ठतीति स्थूलः । 'स्था-विडेः कित्' (उणा० ४२९) किदूरप्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'ऋफिडादीनां डश्च लः' (२।३।१०४) लकारु कीजइ । 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ- याचन-क्रियेच्छा-दीप्त्यवाप्त्या-ऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । अवतीति ओतुः । 'कृ-सि-कम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० । 'मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन' (४।१।१०९) ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ओ । स्थूलश्चासावोतुश्च = स्थूलोतुः । पक्षे 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औकारे स्थूलौतुः ।

**[हे राजपुत्रौष्ठं पश्य]** 'पूगृश् पवने' (१५१८) पू । पुनाति = पवित्रं करोति कुलमिति पुत्रः । 'पुत्रादयः' (उणा० ४५५) त्रप्र० । 'प्वादेर्ह्रस्वः' (४।२।१०५) पु । राज्ञः पुत्रः = राजपुत्रस्तस्य संबोधनं क्रियते हे राजपुत्र ! । आमंत्रणे सि । आमंत्रणाऽर्थाऽभिद्योतको हे शब्दप्रागुपादीयते । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः । ओष्ठ द्वितीयाया अम् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औत्वम् ।

**[शुच्योष्ठी]** शुची=निमी(र्म)ला ओष्ठौ यस्याः सा=शुच्योष्ठी ॥छ॥

**ओमाङि** ॥१।२।१८॥

**[ओमाङि]** ओम् च आङ् च = ओमाङ्, तस्मिन् = ओमाङि, सप्तम्येक० ङि ।

**[अद्योङ्कारः]** अद्य अव्यउ । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । ओङ्कार प्रथमैक० सि । प्रथमान्तस्तु सिद्धउ ।

**[सोमित्यवोचत्]** सा (१।२।६) सूत्रवत् । ओम् प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेनाऽऽकारस्य लोपः । वचंक् भाषणे (१०९६) वच् । अद्य० दि → त् । 'शास्त्यसू-वक्ति-रव्यातेरङ्' (३।४।६०) अङ्प्र० → अ । 'श्वयत्यसू-वच-पतः श्वा-ऽऽस्थ-वोच-पप्तम्' (४।३।१०३) वच्० → वोच्० । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः ।

**[अद्योढा]** आङ् प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । ऊढा (१।२।१) सूत्रवत् । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'अवर्णस्ये०' (१।२।६) ओत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्य प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेनाऽकारस्य लुकि सति अद्योढा ।

**[सोढा]** सा (१।२।६) सूत्रवत् । सा+ओढा, अनेनाऽऽकारस्य लुकि सति सोढा ।

**[अद्यर्श्यात्]** आ = सामस्त्येन ऋश्यात् = अर्श्यात् । अद्य+अर्श्यात् इति स्थितेऽनेनाऽकारस्य लुकि सति अद्यर्श्यात् ॥छ॥

**उपसर्गस्याऽनिणेधेदोति ॥१।२।१९॥**

**[उपसर्गस्य]** उपसर्जनमुपसर्गस्तस्य = उपसर्गस्य, षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[अनिणेधेदोति]** इण् च एध् च = इणेध् । न इणेध् = अनिणेध् । 'अन् स्वरे' (३।२।१२९) अन् । अनिणेध् च तत् एच्च = अनिणेधेत् । अनिणेधेच्च तत् ओच्च = अनिणेधेदोत् । तस्मिन् = अनिणेधेदोति ।

**[प्रेलयति, परेलयति]** 'इलण् प्रेरणे' (१७००) इल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'धातोः पूजार्थस्वति०' (३।१।१) प्रपूर्व० - परापूर्व० । 'लघोरुपान्त्यस्य' (४।३।४) ए । वर्त्तमानायास्तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेनोपसर्गस्थस्याऽवर्णस्य लोपः ।

**[प्रोखति, परोखति]** 'उख गतौ' (६३) उख् । 'धातोः पूजार्थस्वति०' (३।१।१) प्र-परापूर्व० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । अनेनोपसर्गस्थस्याऽवर्णस्य लोपः ।

**[उपैति, परैति]** 'इंण्क् गतौ' (१०७५) इ, उप-परापूर्व० । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ. ।

**[उपैधते, परैधते]** 'एधि वृद्धौ' (७४१) एध्, उप-परापूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ ।

**[उपायते]** 'अयि गतौ' (७९०) अय्, उपपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घत्वम् ॥छ॥

**वा नाम्नि ॥१।२।२०॥**

**[वा]** 'वन भक्तौ' (३२९) वन् । वनति = सेवते विकल्पार्थयतीति वा । 'डित्' (उणा० ६०५) डिद् आप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः ।

**[नाम्नि]** नामन् । सप्तम्येक० ङि । 'ईङौ वा' (२।१।१०९) अनोऽस्य लुक् ।

**[उपेकीयति, उपैकीयति]** उप अव्यउ । 'इंण्क् गतौ' (१०७५) इ । एत्यसहायतामित्येकः । एकमिच्छतीति एकीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'क्यनि' (४।३।११२) ई० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेनोपसर्गस्थस्याऽवर्णस्य लुकि सति उपेकीयति । पक्षे 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐत्वे उपैकीयति ।

**[प्रोषधीयति, पौषधीयति]** 'प्रांक् पूरणे' (१०७२) प्रा । विशेषेण प्राति = पूरयति प्रकर्षाद्यर्थमिति प्र । 'क्वचित्' (५।१।१७१) डप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आकारस्य लोपः । प्र(२)अव्यउ । ओषधमिच्छतीति ओषधीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'क्यनि' (४।३।११२) ई. । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेनोपसर्गस्थस्याऽवर्णस्य लुकि सति प्रोषधीयति । पक्षे 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औत्वे प्रौषधीयति ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### इवर्णादेरस्वे स्वरे य-व-र-लम् ॥१।२।२१॥

**[इवर्णादेः]** इवर्ण आदिर्यस्याऽसौ इवर्णादिस्तस्य = इवर्णादेः, षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) गुणः एकारः । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र्० ।

**[अस्वे]** न स्वः = अस्वः । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अस्वे, सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए. ।

**[स्वरे]** संराजते = शोभते इति स्वरस्तस्मिन् = स्वरे, सप्तम्येक० ङि ।

**[य-व-र-लम्]** यश्च वश्च रश्च लश्च = यवरलम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अमोऽकारस्य लुक् ।

**[दध्यत्र]** दधि प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । इदम् अस्मिन्नत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) अत्र निपातः । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[नद्येषा]** नदी प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । एषा (१।२।१२) सूत्रवत् ।

**[मध्वत्र]** मधु (१।२।१) सूत्रवत् । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[वध्वासनम्]** वधू (१।२।१) सूत्रवत् । 'आसिक् उपवेशने' (१११९) आस् । आस्यते इत्यासनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । प्रथमैक० सि । वध्वा आसनं = वध्वासनम् ।

**[पित्रर्थः]** 'ऋंक् गतौ' (११३५) ऋ । अर्यते = उपार्यते गुणैरित्यर्थः । 'कमि-पृ-गार्त्तिभ्यस्थः' (उणा० २२५) थप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । पितुरर्थः = पित्रर्थः ।

**[क्रादिः]** कृ आदिर्यस्याऽसौ क्रादिः । प्रथमैक० सि । अनेन रत्वम् ।

**[लनुबन्धः]** लृदनुवंधो यस्याऽसौ लनुबन्धः ।

**[लाकृतिः]** लृकारस्येवाऽऽकृतिर्यस्याऽसौ लाकृतिः । अनेन सर्वत्र य्-व्-र्-ल्- कीजइ ।

**[पचति]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[दधीदम्]** दधि प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । इदम् प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[मधु पिबति]** मधु (१।२।१) सूत्रवत् । प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'पां पाने' (२) पा । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) पिबाऽऽदेशः ।

**[तिरियङ्]** तिरि अग्रे 'अञ्चू गतौ च' (१०५) अञ्च् । अञ्चतीत्यङ् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नस्य लोपः । प्रथमैक० सि । 'अचः' (१।४।६९) नोऽन्तः । 'युजञ्च क्रुञ्चो नो ङः' (२।१।७१) ङत्वम् ॥ छ ॥

### ह्रस्वोऽपदे वा ॥१।२।२२॥

**[ह्रस्वः]** ह्रस्वतीति ह्रस्वः । प्रथमैक० सि । 'सो रुः' (२।१।७२) स० → र० ।

**[अपदे]** न पदं=अपदम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[वा]** वा अव्यउ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नदि एषा, नद्येषा]** नदी प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । एषा (१।२।१२) सूत्रवत् । अनेन ह्रस्वत्वम् । पक्षे 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[मधु अत्र, मध्वत्र]** मधु प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन ह्रस्वत्वम् । पक्षे 'इवर्णादेरस्वे०' (१।२।२१) वत्वम् ।

**[नद्यौ]** नदी प्र० औ । 'इवर्णादि०' (१।२।२१) यत्वम् ।

**[वध्वासनम्]** वध्वा आसनं = वध्वासनम् । 'इवर्णादेरस्वे०' (१।२।२१) वत्वम् । प्रथमैक० सि ।

**[नद्यर्थः]** नद्या अर्थः = नद्यर्थः । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् । प्रथमैक० सि ।

**[गौर्याराधः]** गौरीमाराध्नोनीति गौर्याराधः । 'अच्' (५।१।४९) अच्प्र० → अ० ।

**[अनुव्यचलत्]** 'चल कम्पने' (९७२/१०५५) चल्, अनु-विपूर्व० । ह्यस्तन्या दिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङ' (४।४।२९) अडागमः ।

**[हे मुनयाचर]** मुनि आमंत्रणे 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः ए । 'चर भक्षणे च' (४१०) चर्, आङ्पूर्व० । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[हे साधवाचर]** साधु आमंत्रणे 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः ओ । 'चर भक्षणे च' (४१०) चर्, आङ्पूर्व० । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[नदी वहति]** नदी प्रथमैक० सि. । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'वहीं प्रापणे' (९९६) वह् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

**एदैतोऽयाय्** ।।१।२।२३।।

**[एदैतोऽयाय्]** एच्च ऐच्च = एदैत्, तस्य = एदैतः, षष्ठी ङस् । अय् च आय् च = अयाय्, प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[नयनम्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी । नीयते = नयनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ए । अनेन अय् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[नायकः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतीति नायकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । अनेन आय् ।

**[वृक्षयेव]** वृक्ष सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । एव अव्यउ । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन अय् ।

**[रायैन्द्री]** 'रांक् दाने' (१०६९) रा । राति = ददाति माहात्म्यमिति रै । 'रातेर्डैः' (उणा० ८६६) डिद् ऐप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आकारस्य लोपः । इन्द्रो देवताऽस्या सा = ऐन्द्री । 'देवता' (६।२।१०१) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अकारस्य लोपः । राया द्रव्येणोपलक्षिता ऐन्द्री = रायैन्द्री । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन आय् ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ओदौतोऽवाव्** ।।१।२।२४।।

**[ओदौतोऽवाव्]** ओच्च औच्च = ओदौत्, तस्य = ओदौतः, षष्ठी ङस् । अव् च आव् च = अवाव्, प्र० औ । सूत्रत्वात् लोपः ।

**[लवनम्]** 'लूग्श् छेदने' (१५१९) लू । लूयते = लवनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ओ । अनेन अव् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अकारस्य लोपः ।

**[लावकः]** 'लूग्श् छेदने' (१५१९) लू । लुनातीति लावकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । अनेन आव् । प्रथमैक० सि. ।

**[पटवोतुः]** पटु 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सिना सह गुणः ओ । ओतु प्रथमैक० सि । अनेन अव् ।

**[गावौ]** गो प्र०औ । 'ओत औः' (१।४।७४) औ । अनेन आव् ।

**[गोशृङ्गम्]** गवां शृङ्गं = गोशृङ्गम् ।

**[नौकाष्ठम्]** नावः काष्ठं = नौकाष्ठम् ।।छ।।

**य्यक्ये** ।।१।२।२५।।

**[य्यक्ये]** य् सप्तम्येक० ङि । न क्यः = अक्यः, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अक्ये, सप्तम्येक० ङि, 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए० ।

**[गव्यति]** 'गम्लृं गतौ' (३९६) गम् । गच्छतीति गौः । 'द्यु-गमिभ्यां डोः' (उणा० ८६७) ङिद् ओप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादेर्लोपः । गामिच्छतीति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेन अव् ।

**[गव्यते]** गौरिव आचरतीति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः ।

**[नाव्यति]** 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद् । नुद्यते = प्रेर्यते वायुना इति नौः । 'ग्ला-नुदिभ्यां डौः' (उणा० ८६८) डिद् औप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादेर्लोपः । नावमिच्छतीति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अनेन आव् ।

**[नाव्यते]** नौरिवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११४) अकारस्य लोपः । अनेन आव् ।

**[लव्यम्]** 'लूग्श् छेदने' (१५१९) लू । लूयते = लव्यम् । 'य एच्चातः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ओ । अनेन अव् । प्रथमैक० सि ।

**[पव्यम्]** 'पूग्श् पवने' (१५१८) पू । पूयते = पव्यम् । 'य एच्चातः' (५।१।२८) यप्र० । शेषं 'लव्यम्' वत् ।

**[अवश्यलाव्यम्]** अवश्यं लूयतेऽवश्यलाव्यम् । 'उवर्णादावश्यके' (५।१।१९) घ्यण्प्र० → य । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) अवश्यंशब्दस्य मकारस्य लोपः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । अनेन आव् । प्रथमैक० सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अवश्यपाव्यम्]** अवश्यं पूयतेऽवश्यपाव्यम् । 'उवर्णादावश्यके' (५।१।१९) घ्यण्प्र० → य । शेषं 'अवश्यलाव्यम्' वत् ।

**[गव्यम्]** गोभ्यो हितं = गव्यम् । 'तस्मै हिते' (७।१।३५) यप्र० ।

**[नाव्यम्]** नौभ्यो हितं = नाव्यम् । 'तस्मै हिते' (७।१।३५) यप्र० ।

**[उपोयते]** 'वेंग् तन्तुसन्ताने (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) आत्त्वे वा, उपपूर्व० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् उ । 'दीर्घश्च्वि०' (४।३।१०८) ऊ। 'अवर्णस्ये०' (१।२।६) ओ० ।

**[औयत]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) आत्त्वे वा । ह्यस्तनी० त । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् उ । 'दीर्घश्च्वि०' (४।३।१०८) ऊ । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः औ. ।

**[लौयमानिः]** 'लूग्श् छेदने' (१५१९) लू । लूयते = लूयमानः । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'अतो म आने' (४।४।११४) मागमः । 'क्यः शिति' (३।४।७०) क्यप्र० → य । लूयमानस्याऽपत्यं=लौयमानिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । प्रथमैक० सि ।

**[गोयूतिः]** गवां यूतिर्गोयूतिः ।

**[नौयानम्]** नावा यानं = नौयानम् ।

**[गव्यूतिः]** गवां यूतिर्गव्यूतिः ।

**[शरव्यम्]** शरुभ्यो हितम् । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । अथवा शर अग्रे 'व्ययी गतौ' (९१८) व्यय् । शरात् व्ययतीति । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अय्लोपः ॥ छ ॥

## ऋतो रस्तद्धिते ॥१।२।२६॥

**[ऋतो रस्तद्धिते]** ऋत् षष्ठी ङस् । र प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । तेभ्यो हितं = तद्धितं, अथवा ताभ्यः औपगवादिवृत्तिभ्यो हितं = तद्धितं, तस्मिन् ।

**[पित्र्यम्]** पितरि साधुः = पित्र्यम् । 'तत्र साधौ' (७।१।१५) यप्र० । अनेन र० । प्रथमैक० सि ।

**[भ्रात्र्यम्]** भ्रातरि साधुर्भ्रात्र्यम् । 'तत्र साधौ' (७।१।१५) यप्र० । अनेन र० । प्रथमैक० सि ।

**[कार्यम्]** 'डुकृंग् करणे' (८८८) कृ । क्रियते इति कार्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमैक० सि ॥ छ ॥

## एदोतः पदान्तेऽस्य लुक् ॥१।२।२७॥

**[एदोतः]** एच्च ओच्च = एदोत्, तस्मात् ।

**[पदान्तेऽस्य]** पदस्याऽन्तः पदान्तस्तस्मिन् = पदान्ते, सप्तम्येक० ङि, 'अवर्णस्ये०' (१।२।६) ए. । अ षष्ठ्येक० ङस्० । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य. ।

**[लुक्]** लुक् प्रथमा सि ।

**[तेऽत्र]** तद् प्रथमाबहु० जस् । 'आ द्वेरः' (२।१।४१) दकार० → अकारु । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । 'जस इः' (१।४।९) इ । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । अत्र अव्यउ । प्रथमैक० सि । 'अव्ययस्य'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३।२।७) सिलोपः ।

**[पटोऽत्र]** पटु 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सि सउं गुणुं ओकारु । अत्र पूर्ववत् ।

**[यजन्तेऽत्र]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । अत्र पूर्ववत् ।

**[नयनम्]** (१।२।२३) सूत्रवत् ।

**[लवनम्]** (१।२।२४) सूत्रवत् ॥ छ ॥

## गोर्नाम्न्यवोऽक्षे ॥१।२।२८॥

**[गोर्नाम्न्यवोऽक्षे]** गो षष्ठ्येक० ङस् । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । नमति = धावतीति नामन् । 'सात्मन्नात्मन्-वेमन्-रोमन्-क्लोमन्-ललामन्-नामन्-पाप्मन्-पक्ष्मन्-यक्ष्मन्निति' (उणा० ९१६) मन्प्र० निपात्यते । सप्तम्येक० ङि । 'ईङौ वा' (२।१।१०९) अनोऽस्य लोपः । अव प्रथमैक० सि । 'सो रुः' (२।१।७२) र० । अक्ष सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए. । 'अतोऽति रोरुः' (१।३।२०) उ । 'अवर्णस्ये' (१।२।६) ओ. ।

**[गवाक्षः]** गोरक्षीव = गवाक्षः । 'अक्ष्णोऽप्राण्यङ्गे' (७।३।८५) अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । अनेन अव । प्रथमैक० सि ।

**[गोऽक्षाणि]** गवामक्षाणि = गोऽक्षाणि । प्रथमाबहु० जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६३) नस्य णत्वम् । 'एदोतः पदान्तेऽस्य लुक्' (१।२।२७) अकारस्य लोपः ॥ छ ॥

## स्वरे वाऽनक्षे ॥१।२।२९॥

**[स्वरे]** स्वर सप्तम्येक० ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए. ।

**[वाऽनक्षे]** वा अव्यउ । न अक्षोऽनक्षः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् = अनक्षे, सप्तम्येक० ङि, 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए. ।

**[गवाग्रम्, गोऽग्रम्, गोअग्रम]** गवां अग्रं = गवाग्रम् । प्रथमैक० सि । अनेनाऽव । पक्षे 'एदोतः पदान्तेऽस्य लुक्' (१।२।२७) अकारस्य लोपः ।

**[गवाजिनम्, गोऽजिनम्, गोअजिनम्]** गवां अजिनं = गवाजिनम्, गोऽजिनम् ।

**[गवोष्ट्रः, गवुष्ट्रः]** गौश्चासौ उष्ट्रश्च = गवोष्ट्रः, गवुष्ट्रः ।

**[गवोदनः, गवौदनः]** गवां ओदनो = गवौदनः, गवोदनः ।

**[गवेश्वरः, गवीश्वरः]** गवां ईश्वरो = गवेश्वरः, गवीश्वरः ।

**[गोऽक्षम्, गोअक्षम्]** गवामक्षं = गोऽक्षम्, गोअक्षम् ।

**[चित्रग्वर्थः]** चित्रा गौर्यस्याऽसौ चित्रगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) गो० → गु० । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवद्भावः । चित्रगोरर्थश्चित्रग्वर्थः । 'इवर्णादेरस्वे०' (१।२।२१) व् । प्रथमैक० सि ।

**[द्योऽग्रम्]** द्योः अग्रं = द्योऽग्रम् । 'एदोतः पदान्ते०' (१।२।२७) अकारस्य लोपः ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## इन्द्रे ॥१।२।३०॥

**[इन्द्रे]** इन्द्र सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[गवेन्द्रः]** गवामिन्द्रो = गवेन्द्रः ॥ छ ॥

## वाऽत्यसन्धिः ॥१।२।३१॥

**[वाऽत्यसन्धिः]** वा अव्यउ । अत् सप्तम्येक० ङि । न सन्धिरसन्धिः । 'नञत्' (३।२।१२५) न० → अ० ।

**[गोअग्रम्, गोऽग्रम्, गवाग्रम्]** गवामग्रं = गोअग्रं, गोऽग्रम्, गवाग्रं । अनेनाऽसन्धिः । पक्षे 'स्वरे वाऽनक्षे' (१।२।२९) अव कीजइ ।

**[गवेङ्गितम्]** 'इगु गतौ' (८७) इग् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः इङ्ग् । इङ्गनमिङ्गितम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इडागमः । गवामिङ्गितं = गवेङ्गितम् । प्रथमैक० सि । 'स्वरे वाऽनक्षे' (१।२।२९) अव । 'अवर्णस्ये०' (१।२।६) ए. ।

**[गवाननम्]** गवामाननं = गवाननम् ।

**[चित्रग्वग्रम्-]** चित्रगोरग्रं = चित्रग्वग्रम् ॥ छ ॥

## प्लुतोऽनितौ ॥१।२।३२॥

**[प्लुतोऽनितौ]** प्लुत् षष्ठ्येक० ङस् । न इति = अनिति । 'अन् स्वरे' (३।२।१२९) अन् । तस्मिन् = अनितौ, सप्तम्येक० ङि, 'ङिर्डौ' (१।४।२५) ङि० → डौ → औ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[देवदत्त३ अत्र न्वसि ?]** देव अग्रे 'डुदांग्क् दाने' (११३८) दा । देवाय(देवाः) एनं देयासुर्देवदत्त३ । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र०-ददादेशः । 'आमन्त्र्ये' (२।२।३२) सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ।'दूरादामन्त्र्यस्य'० (७।४।९९) प्लुतसंज्ञा । अत्र अव्यउ । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । नु अव्यउ । प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'असक् भवे (भुवि)' (११०२) अस् । वर्त्त० सिव् । 'अस्तेः सि हस्त्वेति' (४।३।७३) सलोपः । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) व०।

**[जिनदत्त३ इदमानय]** जिन अग्रे 'डुदांग्क् दाने' (११३८) दा । जिनाय (जिनाः) एनं देयासुर्जिनदत्त ३ । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० - ददादेशः । 'आमन्त्र्ये' (२।२।३२) सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतसंज्ञा । इदम् प्रथमैक० सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, आङ्पूर्व० । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[सुश्लोक३ आगच्छ]** श्लोक सुपूर्व० । शोभनः श्लोको यस्याऽसौ सुश्लोकस्तस्य संवोधनं हे सुश्लोक ३ । प्रथमैक० सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतसंज्ञा । 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वं । 'अघोषे प्रथमोऽशिटः' (१।३।५०) आद्यछस्य च० । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[सुमङ्गल३ इदमानय]** शोभनानि मङ्गलानि यस्याऽसौ सुमङ्गलस्तस्य संवोधनं हे सुमङ्गल ३ । प्रथमैक० सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतसंज्ञा ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इ३ वा ॥१।२।३३॥

**[इ३ वा]** इ अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[लुनीहि३ इति, लुनीहीति]** 'लूग्श् छेदने' (१५१९) लू । पं० हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वत्वं । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'क्षिया-ऽऽशीः-प्रैषे' (७।४।९२) प्लुतः । अग्रे इति प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन ॥ छ ॥

ईदूदेद्द्विवचनम् ॥१।२।३४॥

**[ईदूदेद्द्विवचनम्]** ईच्च ऊच्च एच्च = ईदूदेत् । प्रथमैक० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । द्वावर्थौ वक्तीति द्विवचनम् । प्रथमैक० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[मुनी इह]** मुनि प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) इवर्णस्य औकारेण सह ई । इह प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[साधू एतौ]** 'साधंट् संसिद्धौ' (१३०५) साध् । साध्नोति रत्नत्रयमिति साधुः । 'कृ-वा-पा-जि-स्वदि-साध्य-ऽशौ- दृ -स्ना-जा-निरहीणूभ्य उण्' (उणा० १) उण्प्र० → उ । अथवा उत्तमक्षमादिभिस्तपोविशेषैर्भावितात्मा साध्नोतीति साधुः । अथवा साधयति परमपदमिति साधुः । प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) उवर्णस्य औकारेण सह ऊ। एतद् प्रथमा औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अकारस्य लोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[अमू इति]** अदस् प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) दस्य अकारस्य लोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । 'मादुवर्णोऽनु' (२।१।४७) ऊ० ।

**[कुण्डे अत्र]** कुण्ड प्रथमा औ । 'औरीः' (१।४।५६) औ० → ई० । 'अवर्णस्ये०' (१।२।६) ए. ।

**[माले इमे]** माला प्रथमा औ । 'औता' (१।४।२०) आकारस्य औकारेण सह ए. । इदम् प्रथमा औ । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) दस्याऽकारस्य लोपः । 'दो मः स्यादौ' (२।१।३९) द० → म० । 'आत्' (२।४।१८) आप् → आ । 'औता' (१।४।२०) ए. ।

**[पचेते इति]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० आते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्ये०' (१।२।६) ए. । इति प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पचेथे इति]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० आथे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्ये०' (१।२।६) ए. । इति प्रथमैक० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पचावहे आवाम्]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० वहे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) आ । अस्मद् प्रथमा औ । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) अस्म्० → आव्० । 'अमौ मः' (२।१।१६) औ → म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां तेन दीर्घः' (१।२।१) दीर्घत्वम् ।

**[अग्नी३ इति]** अग्नि आमंत्रणे 'आमन्त्र्ये' (२।२।३२) औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) इवर्णस्य औकारेण सह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ई । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतत्वं । इति अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[वायू३ इति]** वायु आमन्त्रणे 'आमन्त्र्ये' (२।२।३२) औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) उवर्णस्य औकारेण सह ऊ। 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतत्वं । इति अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[तवे आसाते]** तव अग्रे इ-इ मांडियइ । इश्च इश्च = ई । 'स्यादावसंख्येयः' (३।१।११९) एकशेष भणियइ, एक इ लोपः । प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) इवर्णस्य औकारेण सह ई क्रियते । 'अवर्णस्ये०' (१।२।६) ए. । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० आते ।।छ।।

### अदोमु-मी ।।१।२।३५।।

**[अदोमु-मी]** मुश्च मीश्च = मुमी, अदसो मुमी = अदोमुमी, प्रथमा औ, सूत्रत्वात् औलोपः । 'सो रुः' (२।१।७२) र० । 'घोषवति' (१।३।२१) र० ⟶ उ० । 'अवर्णस्ये०' (१।२।६) ओ. ।

**[अमुमुईचा]** अदस् अग्रे 'अञ्चू गतौ च' (१०५) अञ्च् । अमुमञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'सर्वादि-विष्वग्-देवाड्डद्रिः क्व्यञ्चौ' (३।२।१२२) डद्रिरागमोऽद्रिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लोपः । 'लोकात्' (१।१।३) इ विश्लेषियइ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । तृतीया टा । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० (?) 'वाऽद्रौ' (२।१।४६) अद्रितणा (?) (उभयोः) दकार ⟶ मकारु । 'मादुवर्णोऽनु' (२।१।४७) रकार० ⟶ उकारु-अकार० ⟶ उकारु । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच् इत्यस्य च् - पूर्वइकारस्य ई. ।

**[अमी अश्वाः]** अदस्, प्रथमाबहु० जस् । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) दस्याऽकारस्य लोपः । 'मोऽवर्णस्य' (२।१।४५) द०⟶म० । 'जस इः' (१।४।९) इ । 'अवर्णस्ये०' (१।२।६) ए । 'बहुष्वेरीः' (२।१।४९) ईकारु । 'अशौटि व्याप्तौ' (१३१४) अश् । अश्नुते व्याप्नोतीत्यश्वः । 'लटि-खटि-खलि-नलि-कण्यशौ-सृ-शृ-कृ-गृ-दृ-पृ- शपि-श्या-शाला-पदि-ह्रसीणुभ्यो वः' (उणा० ५०५) वप्र० । प्रथमा जस् । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) आ । 'समानानां०' (१।२।१) दीर्घः ।

**[अम्यत्र]** 'अम गतौ' (३९२) अम् । अमनं = अमः । अमोऽस्याऽस्तीति अमी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । अत्र अव्यउ ।।छ।।

### चादिः स्वरोऽनाङ् ।।१।२।३६।।

**[चादिः]** च आदिर्यस्याऽसौ चादिः । प्रथमा सि ।

**[स्वरोऽनाङ्]** स्वर प्रथमा सि । 'सो रुः' (२।१।७२) र० । न आङ् = अनाङ् । 'अन् स्वरे' (३।२।१२९) अन् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अ अपेहि]** अ अव्यउ । 'इंण्क् गतौ' (१०७५) इ, अपपू० । पं० हि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[आ एवं किल मन्यसे]** आ अव्यउ । बुधिं (१२६२) – 'मनिंच् ज्ञाने' (१२६३) मन् । वर्त्त० से । 'दिवादेः श्यः' (३।४।७२) श्यप्र० ⟶ य० ।

**[इ इन्द्रं पश्य]** इ अव्यउ । इन्द्र द्वितीया अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'दृशृं प्रेक्षणे' (४९५) दृश् । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) पश्य । 'लुगस्यादेत्यपदे' (२.१।११३) अलोपः । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ई ईदृशः संसारः]** ई अव्यउ । इदं पूर्व० 'दृशृं प्रेक्षणे' (४९५) दृश् । अयमिव दृश्यते = ईदृशः । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च' (५।१।१५२) टक्प्र० → अ । 'इदं-किमीत्-की' (३।२।१५३) इदं० → ई आदेशः ।

**[उ उत्तिष्ठ]** उ अव्यउ । उद्पूर्व० स्था (१।१।११) सूत्रवत् । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) तिष्ठ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[ओ ओश्रावय]** ओ अव्यउ । ओपूर्व० 'श्रुंट् श्रवणे' (१२९६) श्रु । शृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'नामिनोऽकलिहलेः' (४।३।५१) श्रौ । 'ओदौतोऽवाव्' (१।२।२४) आव् । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गुणः ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

**[एहि]** आङ्पूर्व० 'इंण्क् गतौ' (१०७५) इ । पं० हि । आ इहि = **एहि** ।

**[आ उदकान्तात् ओदकान्तात् प्रियप्रोथमनुव्रजेत्]** अनुपूर्व० 'व्रज गतौ' (१३७) व्रज् । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्ये०' (१।२।६) ए. ।।छ।।

**ओदन्तः ।।१।२।३७।।**

**[ओदन्तः]** ओत् अन्ते यस्याऽसौ ओदन्तः । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । ओ चादिगणु छइ ।

अहो इत्यादि सर्वत्र अव्यउ. ।

**[गवीश्वरः]** गो अग्रे ईश्वरः । गवामीश्वरो = गवीश्वरः । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[गोऽभवत्]** अगौर्गौः सम्पद्यते ।

**[तिरोऽभवत्]** अतिरे तिरोह (अतिरः तिरः) सम्पद्यते इति तिरोऽभवत् ।

**[नमोऽकरोत्]** अनमो नमोऽकरोत् ।

**[अदोऽभवत्]** अनदोऽदोऽभवत् । चतुर्षु उदाहरणेषु 'कृभ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।।छ।।

**सौ नवेतौ ।।१।२।३८।।**

**[सौ नवेतौ]** सि सप्तम्येक० ङि । 'ङिर्डौ' (१।४।२५) डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः । नवा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । इति सप्तम्येक० ङि । 'ङिर्डौ' (१।४।२५) डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[पटो ! इति, पटविति]** पटु 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सि सउं (सिना सह) गुणः । इति अव्यउ । अनेनाऽसन्धौ पटो ! इति, पक्षे 'ओदौतोऽवाव्' (१।२।२४) अव् ।। छ ।।

**ऊँ चोञ् ।।१।२।३९।।**

**[उँ चोञ्]** ऊँ अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । च-उञ् अव्यउ ।

**[उ इति, ऊँ इति, विति]** उञ् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । इति प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेनाऽसन्धौ "उ इति", तस्याऽपि वैकल्पिकत्वाद् ऊँ इति आदेशे "ऊँ इति", ऊँ आदेशोऽपि वैकल्पिकत्वाद् 'इवर्णादेरस्वे०' (१।२।२१) वकारे "विति" भवति ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अञ्वर्गात् स्वरे वोऽसन् ॥१।२।४०॥

**[अञवर्गात्]** न ञ् = अञ्, 'नञत्' (३।२।१२५) न० → अ० । अञ् चासौ वर्गश्च = अञ्वर्गः, तस्मात् = अञ्वर्गात्, पञ्चम्येक० ङसि, 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङसि० → आत् ।

**[स्वरे]** स्वर सप्तम्येक० ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[वोऽसन्]** वः इति प्रथमान्तमादेशपदम् । 'असक् भुवि' (११०२) अस् । अस्तीति सन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'श्नाऽस्त्योर्लुक्' (४।२।९०) धातोरकारस्य लोपः । न सन् = असन् । **'नञत्'** (३।२।१२५) न० → अ० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । **'पदस्य'** (२।१।८९) तलोपः ।

**[क्रुङ्ड्वास्ते, क्रुङ्ड्डु आस्ते]** 'क्रुञ्च च-कौटिल्याल्पीभावयोः' (१०२) क्रुञ्च् । क्रुञ्चतीति क्रुङ् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चकारलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० । अग्रे उ अव्यउ मांडियइ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । अनेन उकारस्य वकारे कृतेऽपि 'ह्रस्वान् ङ-ण-नो द्वे' (१।३।२७) द्वित्वं कीजइ ।

**[किम्वावपनम्, किमु आवपनम्]** किम् अग्रे उ 'डुवपीं बीजसन्ताने' (९९५) वप्, आङ्पूर्व०' । आवपते = आवपनं । 'अनट्' (५।३।१२४) अनट्प्र० → अन ॥ छ ॥

अ-इ-उवर्णस्यान्तेऽनुनासिकोऽनीदादेः ॥१।२।४१॥

**[अ-इ-उवर्णस्यान्तेऽनुनासिकोऽनीदादेः]** अश्च इश्च उश्च = अयव्, अयूनां वर्णः = अइउवर्णस्तस्य = अइउवर्णस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । अन्त सप्तम्येक० ङि, 'अवर्णस्ये०' (१।२।६) ए । विरामे इत्यर्थः । अनुनासिक प्रथमा सि । ईत् आदिर्यस्याऽसौ ईदादिः । न ईदादिरनीदादिः । 'अन् स्वरे' (३।२।१२९) अन् । तस्य = अनीदादेः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) इ० → एकारु । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[सामँ, साम]** सामन् २, प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[खट्वाँ, खट्वा]** खट्वा २, प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[दधिँ, दधि]** दधि २, प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[कुमारीँ, कुमारी]** कुमारी २, प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[वृक्षेणँ, वृक्षेण]** वृक्ष, तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) टा० → इन । 'अवर्णस्ये०' (१।२।६) ए । 'र-षृवर्णान्नो०' (२।३।६३) न० → ण० । सर्वत्र अनेनाऽनुनासिकाऽऽगमः ।

**[अग्नी]** अग्नि, प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) इवर्णस्य औकारेण सह ई० ।

**[वायू]** वायु, प्रथमा औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) उवर्णस्य औकारेण सह ऊ० ।

**[अमू]** अदस्, प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे (२।१।११३) अलोपः । **'मोऽवर्णस्य'** (२।१।४५) द० → म० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । 'मादुवर्णोऽनु' (२।१।४७) ऊ० ।

**[अमी]** (१।२।३५) सूत्रवत् ॥ छ ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ प्रथमस्याऽध्यायस्य द्वितीयः पादः समाप्तः ॥छ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

|| अर्हम् ||

# || अथ प्रथमाऽध्यायस्य तृतीयः पादः ||

**तृतीयस्य पञ्चमे** ||१|३|१||

**[तृतीयस्य]** त्रि । त्रयाणां पूरणस्तृतीयः । 'त्रेस्तृ च' (७|१|१६६) तीयप्र० त्रि० → तृ०, तस्य=तृतीयस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१|४|५) स्य ।

**[पञ्चमे]** पञ्चन् । पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७|१|१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२|१|९१) नलोपः । सप्तम्येक० ङि । 'अवर्णस्ये०' (१|२|६) ए० ।

वेति पदान्त इति अनुनासिक इति च अनुवर्त्तते । प्रथम-द्वितीय-तृतीयादित्वं वर्गस्यैव धर्म्मो नाऽन्यस्य इति सूत्रेऽनुक्तस्याऽपि वर्गस्य तृतीय-पञ्चमौ गृह्येते । स्थान्यासन्नः किमित्युच्यते-यद्वर्गसत्कस्तृतीयस्तद्वर्गसत्क एव अनुनासिक इत्यर्थः ।

**[वाङ्ङवते, वागङवते]** 'वचंक् भाषणे' (१०९६) वच् । वक्तीत्येवंशीला वाक् । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्०' (५|२|८३) क्विपप्र०-वाच् निपात्यते । 'अप्रयोगीत्' (१|१|३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१|४|४५) सिलोपः । 'च-जः क-गम्' (२|१|८६) च० → क० । 'धुटस्तृतीयः' (२|१|७६) क० → ग० । अनुनासिका ङ-ञ-ण-न-मा इत्युक्ताः । उंङ् (५८९) - कुंङ् (५९०) - गुंङ् (५९१) - घुंङ् (५९२) - 'ङुंङ् शब्दे' (५९३) ङु । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३|४|७१) शव् । 'नामिनो गुणोऽक्ङिति' (४|३|१) ओ । 'ओदौतोऽवाव्' (१|२|२४) अव् । अनेन. ।

**[वाङ्ञकारः, वागञकारः]** ञ एव = ञकारः । 'वर्णाऽव्ययात् स्वरूपे कारः' (७|२|१५६) कारप्र० । वाचो ञकारः ।

**[वाङ्णकारीयति, वागणकारीयति]** ण एव = णकारः । 'वर्णा-ऽव्ययात् स्वरूपे कारः' (७|२|१५६) कारप्र० । णकारमिच्छति । 'अमाव्ययात् क्यन् च' (३|४|२३) क्यन्प्र० → य । 'क्यनि' (४|३|११२) अ० → ई० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३|४|७१) शव् । 'लुगस्यादेत्यपदे' (२|१|११३) अलोपः ।

**[वाङ्नयति, वागनयति]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२|३|९७) नी । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३|४|७१) शव् । 'नामिनो गुणोऽक्ङिति' (४|३|१) गुणः ए । 'एदैतोऽयाय्' (१|२|२४) अय् ।

**[वाङ्मधुरा, वाग्मधुरा]** वाग् चासौ मधुरा च = वाग्मधुरा । प्रथमा सि । 'दीर्घङ्याब्०' (१|४|४५) सिलोपः ।

**[षण्नयाः, षड्नयाः]** षष्(ड्) च ते नयाश्च = षण्णयाः(?) (षण्नयाः) ।

**[तन्नयनम्, तद्नयनम्]** तद् अग्रे नयनम् (१|२|२३) सूत्रवत् ।

**[ककुम्मण्डलम्, ककुब्मण्डलम्]** ककुभां मण्डलं = ककुब्मण्डलं । 'धुटस्तृतीयः' (२|१|३७) भ० → ब० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ककुम्मण्डलमित्यत्र असदधिकारानुवर्त्तनाल्लाक्षणिकत्वात् 'तौ मुमो०' (१।३।१४) इत्यनेन मकारस्याऽनुस्वारो न भवति ।

**[हल्मात्रम्]** हल् च मात्रश्च (हल् च तन्मात्रं च) ।

**[विद्मः]** 'विदक् ज्ञाने' (१०९९) विद् । वर्त्त० मस् ।

**[श्वलिणूँ इति, श्वलिड्ँ इति]** श्वन् अग्रे 'लिहींक् आस्वादने' (११२९) लिह् । श्वानं लेढि = श्वलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'विरामे वा' (१।३।५१) ढ० → ट० । अग्रे उञ् उ अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । इति अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[हल्मात्रम्, हलँमात्रम्]** मात्रमवधारणे । हल् च तन्मात्रं च, हल् मात्राऽस्येति वा हल्मात्रमित्यत्र लकारस्य सानुनासिको लकारः ।

**[षण्ण् नयाः, षड्ड् नयाः]** षण्ण् नया इत्यत्र पश्चाद् द्वित्वमिति 'अदीर्घाद्०' (१।३।३२) इत्यत्राऽनु इत्यधिकाराऽनुवर्त्तनादनेनाऽनुनासिके कृते द्वित्वमित्यर्थस्तेन षण्ण् नयाः ।। छ ।।

**प्रत्यये च ।।१।३।२।।**

**[प्रत्यये]** 'इंण्क् गतौ' (१०७५) इ, प्रतिपूर्व० । प्रतीयते येनाऽर्थः स = प्रत्ययस्तस्मिन् = प्रत्यये, सप्तम्येक० ङि, 'अवर्णस्ये०' (१।२।६) ए ।

**[च]** च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[वाङ्मयम्]** वाच् (१।३।१) सूत्रवत् । वाचां विकारोऽवयवो वा । 'एकस्वरात्' (६।२।४८) मयट्प्र० → मय । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । अनेन ङ् कीजइ ।

**[गुडलिण्मान्]** 'लिहींक् आस्वादने' (११२९) लिह्, गुडपूर्व० । गुडं लेढीति गुडलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । गुडलिहो विद्यन्ते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'हो धुट्०' (२।१।८२) ह० → ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । अनेन ।

**[षण्णाम्]** षष् । षष्ठी आम् । 'संख्यानां र्ष्णाम्' (१।४।३३) आम्० → नाम्० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । अनेन डस्य णत्वं कीजइ । 'तवर्गस्य श्ववर्ग०' (१।३।६०) न० → ण० ।

**[यज्ञः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजतीति यज्ञः । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० । 'तवर्गस्य०' (१।३।६०) न०→ञ० ।

**[सद्म]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । सीदतीति सद्म । 'मन्' (उणा० ९११) मन्प्र० ।

'प्रत्यये च' अत्र सूत्रे किं निमित्तं "च" कृतः ? वाऽनुवृत्त्यर्थः ।। छ ।।

**ततो हश्चतुर्थः ।।१।३।३।।**

**[ततः]** तद् । तस्मात्ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित्तस्० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[हश्चतुर्थः]** ह् षष्ठी ङस् । चतुर्णां पूरणश्चतुर्थः । 'चतुरः' (७।१।१६३) थट्प्र० → थ । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वाग्घीनः, वाग्हीनः]** वाच्-हीन । वाचा हीनः । **प्रथमा सि** । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । अनेन ।

**[अज्झलौ, अज्हलौ]** अच् च हल् च । 'धुटस्तृतीयः' (२।१।७६) च० → ज० । अनेन ।

**[षड्ढलानि, षड्हलानि]** षष्-हल् । षट् च हलानि च । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । अनेन ।

**[तद्धितम् तद्हितम्]** तद्-हितं । तेभ्यो हितं । अनेन ।

**[ककुब्भासः, ककुब्हासः]** ककुभां हासः । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० । अनेन ।

**[प्राङ् हसति]** 'अञ्चू गतौ च' (१०५) अञ्चू, **प्रपूर्व०** । प्राञ्चतीति प्राङ् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमा सि । **'अचः'** (१।४।६९) नोऽन्तः । 'दीर्घङ्याव्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० । 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[भवान् हरति]** 'हृंग् हरणे' (८८५) हृ । वर्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ॥ छ ॥

**प्रथमादधुटि शश्छः** ॥१।३।४॥

**[प्रथमादधुटि]** 'प्रथिष् प्रख्याने' (१००३) प्रथ् । प्रथते आद्यतया इति प्रथमः । 'सृ-पृ-प्रथि-चरि-कडि-कर्देरमः' (उणा० ३४७) अमप्र० । पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङसि० → आत् । न धुट् = अधुट्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अधुटि ।

**[शश्छः]** श् षष्ठी ङस् । छ प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'च-ट-ते-स-द्वितीये' (१।३।७) र० → श० ।

**[वाक्छूरः, वाक्शूरः]** वाच्-शूर । वाचा शूरः । **प्रथमा सि** । **'च-जः क-गम्'** (२।१।८६) च० → क० । **'धुटस्तृतीयः'** (२।१।७६) क० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) **ग० → क०** । अनेन ।

**[उच्छ्मश्रुः, उच्श्मश्रुः]** उद्गतं श्मश्रुर्यस्य । अनेन ।

**[तच्छ्मीलति, तच्श्मीलति]** तद् अग्रे मील (४१५) - **'श्मील निमेषणे'** (४१६) श्मील् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन ।

**[त्रिष्टुप्छ्रुतम्, त्रिष्टुप्श्रुतम्]** त्रिष्टुभ्(प्)-श्रुत । त्रिष्टुभां **श्रुतं** । **प्रथमा सि** । **'धुटस्तृतीयः'** (२।१।७६) भ० → ब० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ब० → प० । अनेन ।

**[वाक् श्च्योतति]** वाच् अग्रे चुतृ (२८१) - स्चुतृ(२८२)-**'स्च्युतृ क्षरणे'** (२८३) स्च्युत् । 'सस्य श-षौ' (१।३।६१) सस्य शकारु कीजइ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । अपञ्चमान्तस्थो धुट् (१।१।११) धुट् (व्यञ्जनं) २४, चकार छइ, अधुटि परि होइ, धुट्-परु होइ ॥ छ ॥

**रः कख-पफयोः ≍क- ≍पौ** ॥१।३।५॥

**[रः कख-पफयोः]** र् षष्ठी ङस् । कश्च खश्च = कखं, पश्च फश्च = पफं, कखं च पफं च = कखपफौ, तयोः, सप्तमीद्वि० ओस्, 'एद् बहुस्भोसि' (१।४।४) अ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[≍क- ≍पौ]** ≍कश्च ≍पश्च = ≍क ≍पौ, प्रथमा औ, 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[क×करोति, कः करोति]** किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) किम् → क आदेशः । 'सो रुः' (२।१।७२) र० । अग्रे 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृग् तनादेरुः' (३।४।८३) उ० । 'नामिनो गुणोऽक्डिति' (४।३।१) अर् । 'उ-श्नोः' (४।३।२) ओ । अनेन ।

**[क×खनति, कःखनति]** कर् पूर्ववत् । अग्रे 'खनूग् अवदारणे' (९१३) खन् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन ।

**[क ×पचति, कः पचति]** कर् पूर्ववत् । अग्रे 'डुपचींष् पाके' (८९२) पच् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन ।

**[क×फलति, कः फलति]** कर् पूर्ववत् । अग्रे पल (९८२) - 'फल गतौ' (९८३) फल् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन. ।। छ ।।

**श-ष-से श-ष-सं वा** ।।१।३।६।।

**[श-ष-से]** शश्च षश्च सश्च = शषसं, तस्मिन् ।

**[श-ष-सं वा]** शश्च पश्च सश्च = श-प-सं, प्रथमा सि । वा प्रथमा सि ।

**[कश्शेते, कः शेते]** कर् (१।३।५) सूत्रवत् । 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्त० ते ।' 'शीङ एः शिति' (४।३।१०४) ए । अनेन ।

**[कष्षण्ढः, कः षण्ढः]** कर् (१।३।५) सूत्रवत् । षण्ढ २ । प्रथमा सि । 'सो रुः' (२।१।७२) र० । अनेन ।

**[कस्साधुः, कः साधुः]** कर् (१।३।५) सूत्रवत् । साधु २ । प्रथमा सि । 'सो रुः' (२।१।७२) र० । अनेन ।

**[गीर्षु]** 'गृत् निगरणे' (१३३५) गृ ।[1] गिरन्तीत्येवंशीला गिरः । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।८३) क्विपप्प्र० - तेपु । अथवा गिरन्तीति । 'गृ-पृ-दुर्वि-धुर्विभ्यः क्विप्' उणा० (९४३) क्विपप्र० ।'अप्रयोगीत्' (१।१।३७) क्विप्लोपः। 'ॠतां क्ङितीर्' (४।४।११६) इर्० → गिर्० । सप्तमी सुप् । 'पदान्ते' (२।१।६४) गीर् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[धूर्षु]** उर्वै (४७०) - तुर्वै (४७१) - थुर्वै (४७२) - दुर्वै (४७३) - 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वतीति । 'गृ-पृ-दुर्वि-धुर्विभ्यः क्विप्' (उणा० ९४३) क्विपप्र० । 'राल्लुक्' (४।१।११०) वलोपः । सप्तमी सुप् । 'पदान्ते' (२।१।६४) धूर् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[अद्भिः प्सातम्]** अप् तृतीया भिस् । 'अपोऽद्रे' (२।१।४) प० → द० । अदं (१०५९) - 'प्सांक् भक्षणे' (१०६०) प्सा । प्साति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । प्रथमा सि ।।छ।।

**च-ट-ते सद्वितीये** ।।१।३।७।।

**[च-ट-ते]** चश्च टश्च तश्च = चटतं, तस्मिन् ।

**[सद्वितीये]** सह द्वितीयेन वर्त्तते = सद्वितीयस्तस्मिन् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) स० ।

**[कश्चरति]** कर् (१।३।५) सूत्रवत् । 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१)

---

१. बृहन्न्यासे श० म० न्यासानुसंधाने-'क्विप्' (५।१।१४८) सूत्रे 'गृत् निगरणे' निगरणं भोजनम्, गिरतीति गीः ।
बृहन्न्यासे 'क्रुत्संपदादिभ्यः क्विप्' (५।३।११४) सूत्रे श० म० न्यासानुसंधाने-'गृत् निगरणे'-'गृश् शब्दे' अतः क्विपि 'ऋतां० (४।४।११६) इत्तीरादेशे 'पदान्ते' (२।१।६४) इति दीर्घे विसर्गे च गीः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शव् । अनेन ।

**[कश्छादयति]** कर् ।ℙ 'छदण् अपवारणे' (१९६४) छद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः छाद् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन र० → श० ।

**[कष्टीकते, पुनष्टीकते]** कर्-पुनर् । ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५) - श्लकुङ् (६२६) - ढौकृङ् (६२७) - त्रौकृङ् (६२८) - ष्वष्कि (६२९) - वस्कि (६३०) - मस्कि (६३१) - तिकि (६३२) - टिकि (६३३) 'टीकृङ् गतौ' (६३४) टीक् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन र० → ष० ।

**[कस्तरति, अन्तस्तरति]** कर्-अन्तर् । 'तृ प्लवन-तरणयोः' (२७) तृ । वर्त्त० तिव् । 'कर्त्तयनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन र० → स० ।

**[कस्थुडति, अन्तस्थुडति]** कर् - अन्तर् । लुड (१४४८) - 'थुड संवरणे' (१४४९) थुड् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० । अनेन र० → स० ॥ छ ॥

### नोऽप्रशानोऽनुस्वाराऽनुनासिकौ च पूर्वस्याऽधुट्परे ॥१।३।८॥

**[नोऽप्रशानोऽनुस्वाराऽनुनासिकौ]** न् षष्ठी ङस् । न प्रशान् = अप्रशान्, 'नञत्' (३।२।१२५) न० → अ०, तस्य । अनुस्वारश्च अनुनासिकश्च = अनुस्वाराऽनुनासिकौ, प्रथमा औ, 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[च पूर्वस्याऽधुट्परे]** च अव्यउ । पूर्व षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । धुट् एव परो यस्मादसौ धुट्परः, न धुट्परः = अधुट्परः, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् । अनुस्वारागम-अनुनासिकादेश्च पूर्वक्रमिहिं हुंहि ।

**[भवांश्चरति, भवाँश्चरति]** 'भांक् दीप्तौ' (१०६१) भा । भातीति । 'भातेर्डवतुः' (उणा० ८८६) डवतुप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादेर्लोपे भवत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः । 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन ।

**[भवांश्छादयति, भवाँश्छादयति]** भवान् पूर्ववत् । छादयति (१।३।७) सूत्रवत् । अनेन

**[भवांष्टीकते, भवाँष्टीकते ]** भवान् पूर्ववत् । टीकते (१।३।७) सूत्रवत् । अनेन ।

**[भवांस्तरति, भवाँस्तरति]** भवान् पूर्ववत् । तरति (१।३।७) सूत्रवत् । अनेन

**[भवांस्थुडति, भवाँस्थुडति]** भवान् पूर्ववत् । थुडति (१।३।७) सूत्रवत् । अनेन ।

**[भवान् त्सरुकः]** त्सरु । त्सरौ कुशलः = त्सरुकः । 'कोऽश्मादेः' (६।३।९७) कप्र० ॥ ॥

**[प्रशाञ् चरति]** 'शमू उपशमे' (१२३०) शम्, प्रपूर्व० । प्रशाम्यतीति प्रशान् । 'क्विप' (५।१।१४८) क्विप्प्र० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः शा । 'मो नो म्वोश्च' (२।१।६७) म० → न० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनदभ्यः शव्' (३।४।७१) शव् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) न० → ञ० ।

**[प्रशाण् टीकते]** प्रशान् पूर्ववत् । टीकते (१।३।७) सूत्रवत् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) न० → ण० ।

---

P. ℙ 'छदण् संवरणे' (१६५५) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रशान् तरति]** प्रशान् पूर्ववत् । तरति (१।३।७) सूत्रवत् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) न० → न ।।छ।।

**पुमोऽशिट्यघोषेऽख्यागि रः ।।१।३।९।।**

**[पुमोऽशिट्यघोषेऽख्यागि रः]** पुम् षष्ठी ङस् । न शिट् = अशिट्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् । न विद्यते घोषो ध्वनिर्यस्य स = अघोषः । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् । न ख्याग् = अख्याग्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् । र प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

पुमइ स भणियइ हुंतइ पुंस । पद संयोगि लोपियइ हुंतइ अनुकरणं ।

**[पुंस्कामा, पुँस्कामा]** पुम्स्पूर्व० 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पुमांसं कामयते = पुंस्कामा । 'शीलि-कामि-भक्ष्याचरीक्षि-क्षमो णः' (५।१।७३) णप्र० → अ । 'णेरनिटि' (४।३।८३) णिङ्लोपः । 'पदस्य' (२।१।८९) सलोपः । अनेन मस्य रेफोऽनुस्वाराऽनुनासिकौ च पूर्वस्य । 'पुंसः' (२।३।३) र० → स० । 'आत्' (२।४।१८) आप् । समानानां० (१।२।१) दीर्घः ।

**[पुंस्कोकिलः, पुँस्कोकिलः]** पुमांश्चासौ कोकिलश्च = पुंस्कोकिलः ।

**[पुंस्खातम्, पुँस्खातम्]** पुंसः खातं । अत्र रस्तपनीय(?) (रस्य ≍ क) इति कृते विधानसामर्थ्याच्च रुत्वाऽभावे पुम्स् इत्यादि न सिद्ध्यति । पुम्स्पूर्व० 'खनूग् अवदारणे' (९१३) खन् । पुंसा खायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) आ । 'समानानां तेन०' (१।२।१) दीर्घः ।

**[पुंश्चली, पुँश्चली]** पुम्स्पूर्व० 'चल कम्पने' (९७२) चल् । चलन्तं प्रयुङ्क्ते ।' 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । पुमांसं चा(च)लयति = पुंश्चली । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० ।

**[पुंश्छत्रम्, पुँश्छत्रम्]** पुंसः छत्रम् ।

**[पुंष्टिट्टिभः, पुँष्टिट्टिभः]** पुमांश्चासौ टिट्टिभश्च = पुंष्टिट्टिभः ।

**[पुंस्पुत्रः, पुँस्पुत्रः]** पुंसः पुत्रः ।

**[पुंस्फलम्, पुँस्फलम्]** पुंसः फलम् ।

[पुंशरः] पुंसः शरः । कृ (१५२९) - मृ (१५३०) 'शृश् हिंसायाम्' (१५३१) शृ । शीर्यते परपक्षोऽनेनेति शरः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । प्रथमा सि । 'पदस्य' (२।१।८९) सलोपः । 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) मस्याऽनुस्वारः ।

**[पुंदासः]** पुंसो दासः = पुंदासः । अघोषु नथी ईहां, घोष छइ ईहां ।

[पुंगवः] पुमांश्चासौ गौश्च = पुंगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

[पुंक्षुरः] पुंसः क्षुरः ।

[पुंक्षारः] पुम्स् 'क्षर संचलने' (९७१) क्षर् । क्षरणं = क्षारः । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'ञ्णिति' (४।३।५०) वृद्धिः । प्रथमा सि । 'पदस्य' (२।१।८९) सलोपः । 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) मस्याऽनुस्वारः । पुंसः क्षारः = पुंक्षारः । अघोषु छइ, धुट् छइ, क-ष (संयोगे) क्ष । षकारु धुट् (२४) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पुंख्यातः]** पुम्स् 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष् । 'चक्षो वाचि क्शांग्' ख्यांग् (४।४।४) चक्ष्० → ख्यांग्० कीजइ । ख्यायते स्म ।''क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । प्रथमा सि । 'पदस्य' (२।१।८९) सलोपः । 'तौ मुमो०' (१।३।१४) मस्याऽनुस्वारः । पुंसः ख्यातः = पुंख्यातः ।

**[पुंख्यातिः]** पुंसः ख्यातिः ॥ छ ॥

**नॄनः पेषु वा ॥१।३।१०॥**

**[नॄनः पेषु वा]** नॄन् षष्ठी ङस् । प सप्तमी सुप् । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । पेषु इत्यत्र बहुवचन धुट्परे यथा स्यादित्यर्थः ।

**[नॄ)(पाहि, नॄँ)(पाहि, नॄंःपाहि, नॄँःपाहि, नॄन्पाहि]** नृ द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) शसोऽकारेण दीर्घत्वं नृ-सस्य च न् । 'पांक् रक्षणे' (१०६७) पा । पं० हि । अनेन विकल्पेन नस्य र्-अनुस्वारु-अनुनासिकु । कलाबिंदु 'रः कख-पफयोः' ≍ क-)(पौ' (१।३।५) सूत्रेण कीजइ ।

**[नॄं)(प्रीणीहि, नॄँ)(प्रीणीहि, नॄंःप्रीणीहि, नॄँःप्रीणीहि, नॄन्प्रीणीहि]** नृ द्वितीया शस् । 'शसोऽता सश्च०' (१।४।४९) शसोऽकारेण दीर्घत्वं नृ-सस्य च न् । 'प्रींग्श् तृप्ति-कान्त्योः' (१५१०) प्री० । पं० हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ईकारे नी, णत्वे प्रीणीहि । अनेन नस्य र् अनुस्वार-अनुनासिकु । कलाबिंदु 'रः कख-पफयोः ≍क-)(पौ' (१।३।५) सूत्रेण कीजइ ॥ छ ॥

**द्विः कानः कानि सः ॥१।३।११॥**

**[द्विः]** द्वि । द्वौ वारावस्येति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० । प्रथमा सि । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लोपः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[कानः कानि सः]** कान् षष्ठी ङस् । कान् सप्तमी ङि । स प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[कांस्कान्, काँस्कान्]** किम् । द्वितीया शस् । 'किमः कस्तसादौ च' (२।१।४०) क० ।' 'शसोऽता सश्च नः पुंसि' (१।४।४९) अकारि सउ दीर्घः- स०→न० । 'वीप्सायाम्' (७।४।८०) कान् सउं द्वित्वं । अनेन न० → स० अनुस्वारु-अनुनासिकु ।

**[कान् कान् पश्यति]** किम् । द्वितीया शस् इत्यादि ।

**[कांस्कान् पश्यति]** कांस्कान् पश्यतीत्यत्र सकारे कृते 'सो रुः' (२।१।७२) इति रुत्वं कथं न भवतीत्याह - रस्येत्यादि अयमर्थो यदि सस्य रुत्वं स्यात्तदा रेफाधिकारेणैव सिद्धं, किं सविधानेन ? प्रक्रियागौरवं च परिहृतं भवति ॥छ॥

**स्सटि समः ॥१।३।१२॥**

**[स्सटि समः]** सकारादिः सट् = स्सट्, तस्मिन् । अथवा सः सट् = स्सट्, तस्मिन् । सम् षष्ठी ङस् ।

**[संस्कर्त्ता, सँस्कर्त्ता]** 'डुकृंग् करणे' (८८८) कृ, संपूर्व० । श्वस्तनी ता । 'संपरेः कृगः स्सट्' (४।४।९१) सडागमः । अनेन म० → स० । यद्वा संस्करोतीति संस्कर्त्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋकारस्य लोपः । अनेन मस्य अनुस्वारु-अनुनासिकु क्रियते । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) तकारस्य द्वित्वम् ।

**[संस्कर्त्तुम्, सँस्कर्त्तुम्]** संस्करणाय = संस्कर्त्तुम् । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[संकृतिः]** संकरणं = संकृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । गर्गादिपाठसामर्थ्यात् सडभावोऽप्रधानवर्णाश्रयो विधिरिति न भवति ।

**[उपस्कर्त्ता]** 'डुकृंग् करणे' (८८८) कृ, उपपूर्व० । 'उपाद् भूषा-समवाय-प्रतियत्न-विकार-वाक्याऽध्याहारे' (४।४।९२) सट् । उपस्करोतीति उपस्कर्त्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० । शेषं पूर्ववत् ॥ छ ॥

**लुक् ॥१।३।१३॥**

**[लुक्]** लुक् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

'विरामे वा' (१।३।५१) ग० → क० ।

**[सस्कर्त्ता]** सटि सति अनेन मस्य लुक् ।

**[सस्कर्त्तुम्]** अत्र सटि सति अनेन मकारलोपः ॥ छ ॥

**तौ मुमो व्यञ्जने स्वौ ॥१।३।१४॥**

**[तौ]** तद् प्रथमा औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[मुमः]** मुश्च म् च = मुम्, तस्य = मुमः ।

**[व्यञ्जने]** व्यञ्जन सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए० ।

**[स्वौ]** स्व प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[चंक्रम्यते, चङ्क्रम्यते]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । कुटिलं क्रामति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) क्रम् सउ द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मुरागमः । अनेन ।

**[चंचूर्यते, चञ्चूर्यते]** 'चर भक्षणे च' (४१०) चर् । भृशं पुनः पुनर्वा चरति' । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'चर-फलाम्' (४।१।५३) मोन्तः । 'ति चोपान्त्याऽतोऽनोदुः' (४।१।५४) अ० → उ० । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[दंद्रम्यते, दन्द्रम्यते]** अम (३९२) - 'द्रम गतौ' (३९३) द्रम् । भृशं पुनः पुनर्वा द्रमति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोन्तः ।

**[बंभण्यते, बम्भण्यते]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - 'भण शब्दे' (२६४) भण् । अत्यर्थं भणति । शेषं पूर्ववत् साध्यः ।

**[यंयम्यते, यय्यँम्यते]** 'यमूं उपरमे' (३८६) यम् । भृशं पुनः पुनर्वा यमति (यच्छति) । शेषं पूर्ववत् साध्यः ।

**[वंवम्यते, वव्वँम्यते]** 'टुवमू उद्गिरणे' (९६९) वम् । भृशं पुनः पुनर्वा वमति । शेषं पूर्ववत् साध्यः । अनेन मस्य वकारोऽनुनासिकीभूतः सकलः । परगमने सत्यपि पूर्वस्य वस्याऽनुनासिको लभ्यते । यतो तुल्यस्थानप्रस्तावे य-ल-वानां सानुनासिक-निरनुनासिकभेदौ प्रतिपादितौ ।

**[वहंलिहः गौः, वहल्लिँहः गौः]** 'लिहींक् आस्वादने' (११२९) लिह्, वहपूर्व० । वहं लेढीति वहंलिहः । 'वहा-ऽभ्राल्लिहः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५।१।१२३) खश्प्र० → अ० । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः ।

**[त्वं करोषि, त्वङ्करोषि]** युष्मद् प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) सि सउं त्वम् । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० सिव् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) ओ । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । सूत्रकार्यम् ।

**[संयतः, सय्यँतः]** 'यमूं उपरमे' (३८६) यम्, संपूर्व० । संयच्छति स = संयतः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि०' (४।२।५५) मलोपः ।

**[संवत्सरः, सव्वँत्सरः]** 'वसं निवासे' (९९९) वस्, संपूर्व० । संवसन्ति ऋतवोऽत्रेति' । 'मी-ज्यजि-मा-मद्य-शौ-वसि-किभ्यः सरः' (उणा० ४३९) सरप्र० । 'सस्तः सि' (४।३।९२) स० → त० ।

**[कंवः, कव्वँः]** कं विद्यते यस्याऽसौ कंवः । 'कं-शंभ्यां युस्-ति-यस्- तु-त-व-भम्' (७।२।१८) बप्र० । प्रथमा सि । सूत्रकार्यम् ।

**[किंतराम्, किन्तराम्]** किम् । किमेव = किंतराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) आम् ।

**[गम्यते]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[रम्यते]** 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[रंरम्यते]** 'रमिं क्रीडायाम्' (९८९) रम् । अत्यर्थं रमते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[शंशम्यते]** 'शमू उपशमे' (१२३०) शम् । भृशं पुनः पुनर्वा शाम्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । शेषं 'रंरम्यते' वत् ।

**[त्वं हससि]** 'हसे हसने' (५४५) हस् । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ॥ छ ॥

**म-न-य-व-लपरे हे ॥१।३।१५॥**

**[म-न-य-व-लपरे]** मश्च नश्च यश्च वश्च लश्च = मनयवलाः । मनयवलाः परे यस्मादसौ मनयवलपरः, तस्मिन् ।

**[हे]** ह सप्तमी ङि ।

**[किं ह्मलयति, किम् ह्मलयति]** किम् । द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । ह्वल (१०५६) - 'ह्मल चलने' (१०५७) ह्मल् । ह्मलन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'ज्वल-ह्वल-ह्मल-ग्ला-स्ना-वनू-वम-नमोऽनुपसर्गस्य वा' (४।२।३२) ह्रस्वत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[किं ह्नुते, किन् ह्नुते]** किम् । द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । 'ह्नुंङ्क् अपनयने' (११०६) ह्नु ।वर्त्त० ते ।

**[किं ह्यः, किय्ँ ह्यः]** किम् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।' ह्यस् सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[किं ह्वलयति, किवँ् ह्वलयति]** किम् । द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । 'ह्वल चलने' (१०५६) ह्वल् । ह्वलन्तं प्रयुङ्क्ते । शेषं 'किं ह्वलयति' वत् ।

**[किं ह्लादते, किलँ् ह्लादते]** 'ह्लादैङ् सुखे च' (७३८) ह्लाद् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[किं हसति]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । शव् ।

**[किं ज्वलयति]** ज्वल दीप्तौ च (१०५८) ज्वल् । वर्त्त० तिव् । शव् ।। छ ।।

## सम्राट् ।।१।३।१६।।

**[सम्राट्]** सम्राज् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'यज-सृज-मृज-राज०' (२।१।८७) ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[सम्राट्]** 'राजृग् दीप्तौ' (८९३) राज्, संपूर्व० । समन्ताद्राजते । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० । अनेन ।

**[सम्राजौ]** समन्ताद्राजेते । 'क्विप्' (५।१।१४८) क्विप्प्र०। 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ।

**[सम्राजः]** समन्ताद्राजन्ते । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ।। ।।

## ङ्-णोः क-टावन्तौ शिटि नवा ।।१।३।१७।।

**[ङ्-णोः]** ङ् च ण् च = ङ्णौ, तयोः = ङ्णोः, षष्ठी ओस् ।

**[क-टावन्तौ]** कश्च टश्च = कटौ । प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । अन्त प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[शिटि नवा]** शिट् सप्तमी ङि । नवा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[प्राङ्क् शेते, प्राङ्क् छेते, प्राङ् शेते]** 'अञ्चू गतौ च' (१०५) अञ्च्, प्रपूर्व० । प्राञ्चतीति । शेषं (१।३।३) सूत्रवत् । शेते अनेन क् विकल्पेन । 'प्रथमादधुटि शश्छः' (१।३।४) श० → छ० ।

**[सुगणट् शेते, सुगणट् छेते, सुगण् शेते]** 'गणण् संख्याने' (१८७४) गण, सुपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । 'अतः' (४।३।८२) अलोपः । सुष्ठु गणयतीति सुगण् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । शेते । अनेन ट् विकल्पेन । 'प्रथमादधुटि शश्छः' (१।३।४) श० → छ० ।

**[वण्ट् षण्डे, वण् षण्डे]** अण (२५९) - रण (२६०) - 'वण शब्दे' (२६१) वण् । वणतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । षण्डे अनेन ट् ।

**[भवाञ् शेते]** भवत् । प्रथमा सि । शेषं (१।३।८) सूत्रवत् । 'तवर्गस्य०' (१।३।६०) न० → ञ० ।

**[महान् षण्डे]** महत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[बम्भणिष]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - 'भण शब्दे' (२६४) भण् । भृशं पुनः पुनर्वा भणसि । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विर्वचनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'वहुलं लुप्' (३।४।१४) यङ्लोपः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।।छ।।

**ङ्नः सः त्सोऽश्चः ।।१।३।१८।।**

**[ङ्नः सः त्सोऽश्चः]** ङ् च न् च = ङ्न्, तस्मात् = ङ्नः, पञ्चमी ङसि । स् षष्ठी ङस् । त्स प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । न श्च् = अश्च् । 'नञत्' (३।२।१२५) न० → अ० । तस्य = अश्चः, षष्ठी ङस् ।

**[षड् त्सीदन्ति, षट् सीदन्ति]** षष् । प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) सीद् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन ।

**[भवान् त्साधुः, भवान् साधुः]** भवान् (१।३।८) सूत्रवत् । साधु प्रथमा सि । अनेन ।

**[षट् श्च्योतन्ति]** षड् पूर्ववत् । चुतृ (२८१) - स्चुतृ (२८२) - 'श्च्युतृ क्षरणे' (२८३) स्च्युत् । 'सस्य श-षौ' (१।३।६१) स० → श० । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु. ओ । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ड० → ट० ।

**[भवान् श्च्योतति]** चुतृ (२८१) -स्चुतृ (२८२) 'स्च्युतृ क्षरणे' (२८३) स्च्युत् । 'सस्य श-षौ' (१।३।६१) स० → श० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) ओ ।। छ ।।

**नः शि ञ्च् ।।१।३।१९।।**

**[नः शि ञ्च्]** न् षष्ठी ङस् । श् सप्तमी ङि । ञ्च् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[भवाञ्च् छूरः, भवाञ्च् शूरः, भवाञ् शूरः]** भवान् (१।३।८) सूत्रवत्, अग्रे शूर । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अनेन ञ्च् वा । 'प्रथमादधुटि शश्छः' (१।३।४) शस्य छ वा । 'तवर्गस्य०' (१।३।६०) न० → ञ० ।

**[कुर्व्वञ्च् छेते, कुर्व्वञ्च् शेते, कुर्व्वञ् शेते]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कुर्व्वन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'र्हादर्हस्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'पदस्य' (२।१।८९) तलोपः । 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्त० ते । 'शीङ एः शिति' (४।३।१०४) ए । अनेन ञ्च् वा । 'प्रथमादधुटि शश्छः' (१।३।४) शस्य छ वा । 'तवर्गस्य०' (१।३।६०) न० → ञ० ।।

**अतोऽति रोरुः ।।१।३।२०।।**

**[अतोऽति]** अत् पञ्चमी ङसि । अत् सप्तमी ङि ।

**[रोरुः]** रु षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र० । उ प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । सूत्रेऽप्यत्र सूत्रकार्यं विधीयते - रेफतणइ स्थानि अकारि निमित्तभूति उ नित्यहिं होइ ।

**[कोऽत्र]** किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) क आदेशः । 'सो रुः' (२।१।७२) र० । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन ।

**[कोऽर्थः]** किम् प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) किम किहइं क आदेशः । 'सो रुः' (२।१।७२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र० । अर्थ प्रथमा सि । अनेन ।

**[सुश्रोत३ यत्र न्वसि]** शोभनानि श्रोतांसि यत्र तत् = सुश्रोतस्तस्य संबोधनं क्रियते । 'आमन्त्र्ये' (२।२।३२) सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतत्वम् ।

**[पय अ३श्वदत्त!]** 'आमन्त्र्ये' (२।२।३२) सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ॥ छ ॥

### घोषवति ॥१।३।२१॥

**[घोषवति]** घोषो ध्वनिर्विद्यते यस्याऽसौ घोषवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ⟶ मत् । 'मावर्णान्तोपान्ताऽपञ्चमवर्गान् मतोर्मो वः' (२।१।९४) म० ⟶ व० । तस्मिन् ।

**[धर्मो जयति]** धर्म । प्रथमा सि । 'सो रुः' (२।१।७२) स० ⟶ र० । 'जिं अभिभवे' (८) जि । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन ।

**[अहोभ्याम्]** अहन् । तृतीया भ्याम् । 'अह्नः' (२।१।७४) रु । अनेन उत्वे 'अवर्णस्ये०' (१।२।६) ओ ॥ छ ॥

### अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः ॥१।३।२२॥

**[अवर्ण-भो-भगो-अघोः]** अकारेणोपलक्षितो वर्णोऽवर्णः, अवर्णश्च भोश्च भगोश्च अघोश्च = अवर्णभोभगोऽघोः, तस्मात्, पञ्चमी ङसि । सूत्रत्वात् ङसिलोपः । अत्र भोस्-भगोस्-अघोस् एते लुप्तसकारा आमन्त्र्यार्थद्योतका अव्ययी(या) अनुकृताः ।

**[लुगसन्धिः]** लुक् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) क० ⟶ ग० । सन्धानं = सन्धिः । न सन्धिरसन्धिः । 'नञत्' (३।२।१२५) न० ⟶ अ० । प्रथमा सि । 'सो रुः' (२।१।७२) स० ⟶ र० ।

**[श्रमणा गच्छन्ति]** 'श्रमूच् खेद-तपसोः' (१२३३) श्रम् । श्राम्यन्ति तपस्तपस्यन्तीति श्रमणाः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । प्रथमाबहु०-जस् । 'अत आःस्यादौ० (१।४।१) आ । 'र-षृवर्णान्नो ण०' (२।३।६३) न०⟶ण० । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - गम्लृं गतौ (३९६) गम् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० ⟶ छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वं । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० ⟶ च० ।

**[धार्मिका जयन्ति]** धर्म मांडियइ । धर्मेण चरन्ति = धार्मिकाः । 'चरति' (६।४।११) इकण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः धा कीजइ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । जिं अभिभवे (८) जि । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[भो गच्छसि, भगो हससि, अघो यासि]** भोस्-भगोस्-अघोस्, प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[कुमाराः क्रीडन्ति]** कुमार प्रथमा जस् । 'क्रीड़ृ विहारे' (२४३) क्रीड् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ॥ छ ॥

### व्योः ॥१।३।२३॥

**[व्योः]** व् च य् च = व्यौ, तयोः ।

**[वृक्ष गच्छति]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० ⟶ श० । वृक्षपूर्व० वृक्षं वृश्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् वृ । 'अप्रयोगीत्' (१।१।३७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्विप्लोपः । वृक्षवृश्चमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वृक्षवयतीति वृक्षव् । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) विज्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[माला हसति]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । मालां वृश्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ग्रह व्रस्च्-भ्रस्ज्-प्रच्छः' (४।१।८४) य्वृत् वृ । मालावृश्चमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । मालावयतीति मालाव् । 'क्विप्' (५।१।१४८) क्विप्प्र० (?) ('मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र०) । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) विज्लोपः ।

**[अव्य गच्छति]** अव्यय मांडियइ । अव्ययमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अव्य(य)तीति अव्यय् । 'क्विप्' (५।१।१४८) क्विप्प्र०(?) ('मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) विज्लोपः ।

**[भव्यम्]** 'भू सत्तायाम्' (१) भू । भूयते = भव्यम् । 'भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा' (५।१।७) भव्य निपात्यते ।

**[जय्यम्]** 'जिं अभिभवे' (८) जि । जीयते = जय्यम् । 'क्षय्य-जय्यौ शक्तौ' (४।३।९०) जय्य इति निपात्यते ॥छ॥

## स्वरे वा ॥१।३।२४॥

**[स्वरे वा]** स्वर सप्तमी ङि । वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पट इह, पटविह, पटविँह]** पटु । 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सि सउं गुणः ओ । इदम् । अस्मिन्निह । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) त्रप्प्र० इह निपात्यते । 'ओदौतोऽवाव्' (१।२।२४) अव् । अनेन

**[वृक्ष अत्र, वृक्षवत्र, वृक्षवँत्र]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । वृक्षपूर्व० वृक्षं वृश्चतीति वृक्षवृट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ग्रह-व्रस्च्-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् वृ । वृक्षवृश्चमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वृक्षवयतीति वृक्षव् । 'क्विप्० (५।१।१४८) क्विप्प्र० (?) ('मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्? (विच्) लोपः । अत्र अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन ।

**[वृक्षा इह, वृक्षाविह, वृक्षाविँहः]** वृक्ष । प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । इदम् - अस्मिन्निह । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) त्रप्प्र०-इह निपात्यते । 'ओदौतोऽवाव्' (१।२।२४) आव् । अनेन ।

**[त आहुः, तयाहुः, तयाँहुः]** तद् प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० अन्ति । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) अन्ति० → उस्, तद्योगे ब्रूग आह । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन ।

**[तस्मा इदम्, तस्मायिदम्, तस्मायिँदम्]** तद् । चतुर्थी ङे । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै । इदम् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'एदैतोऽयाय्' (१।२।२३) आय् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[देवा आहुः, देवायाहुः, देवायॅाहुः]** देव । प्रथमा जस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य० । आहुः पूर्ववत् । अनेन । अस्य विकल्पे 'अस्पष्टाववर्णात्त्वनुञि वा' (१।३।२५) इति सूत्रेण अस्पष्टौ व्योर्भवतः ।

**[भो अत्र, भोयॅत्र]** भोस् अत्र । अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य० । अनेन । विकल्पे 'अस्पष्टाववर्णात्त्वनुञि वा' (१।३।२५) अस्पष्टो यकारः ।

**[भगो अत्र, भगोयॅत्र]** भगोस् अत्र । अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य० । अनेन । विकल्पे 'अस्पष्टाववर्णात्त्वनुञि वा' (१।३।२५) अस्पष्टो यकारः ।

**[अघो अत्र, अघोयॅत्र]** अघोस् अत्र । अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य० । अनेन । विकल्पे 'अस्पष्टाववर्णात्त्वनुञि वा' (१।३।२५) अस्पष्टो यकारः ।

**[लवनम्]** 'लूगृश् छेदने' (१५१९) लू । लूयते = लवनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[नयनम्]** (१।२।२३) सूत्रवत् ॥ छ ॥

**अस्पष्टाववर्णात्त्वनुञि वा** ॥१।३।२५॥

**[अस्पष्टाववर्णात्त्वनुञि वा]** न स्पष्टौ = अस्पष्टौ । 'नञत्' (३।२।१२५) न० → अ० । अकारेणोपलक्षितो वर्णोऽवर्णस्तस्मात् । 'ओदौतोऽवाव्' (१।२।२४) आव् । तु अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । न उञ् = अनुञ् । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् । वा प्रथमा सि ।

**[पटवॅु]** पटु । 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सि सउं गुणः । उञ् अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'ओदौतोऽवाव्' (१।२।२४) अव् । अनेन ।

**[असावॅु]** अदस् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अदसो दः सेस्तु डौ' (२।१।४३) द० → स०, सि० → डौ । उञ् 'ओदौतोऽवाव्' (१।२।२४) आव् । अनेन ।

**[असावॅिन्दुः, असाविन्दुः]** असौ पूर्ववत् । इन्द्रः (१।२।१) सूत्रवत् । (इन्दुः) । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'सो रुः' (२।१।७२) र० । अनेन ।

**[तयॅिह, तयिह]** ते । इह अव्यउ । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन ।

**[तस्मायॅिदम्, तस्मायिदम्]** तद् । चतुर्थी ङे । शेषं (१।३।२४) सूत्रवत् । अनेन

**[कयॅिह, कयिह]** किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) क० । 'सो रुः' (२।१।७२) र० । इह अव्यउ । 'रोर्यः' (१।३।२६) य० । अनेन ।

**[देवायॅाहुः, देवायाहुः]** देव । प्रथमा जस् । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) आ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) र० । आहुः (१।३।२४) सूत्रवत् । 'रोर्यः' (१।३।२६) य० । अनेन ।

**[क उ आगतः]** किम् । प्रथमा सि । उञ् अव्यउ । प्रथमा सि । आगतः ।

**[भो उ एहि]** भोस् अव्यउ । प्रथमा सि ।

**[भगो उ एहि]** भगोस् अव्यउ । प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अघो उ याहि] अघोस् अव्यउ । प्रथमा सि ॥ छ ॥

रोर्यः ॥१।३।२६॥

[रोर्यः] रु षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) गु० ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । य प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

[कयास्ते] किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) क० । 'सो रुः' (२।१।७२) स० → र० । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । अनेन ।

[देवायासते] देव । प्रथमा जस् । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० अन्ते । 'अनतोऽन्तोऽदात्मने' (४।२।११४) नलोपः । अनेन ।

[भोयत्र] भोस् । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) र० । अनेन ।

[भगोयत्र] भगोस् । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) र० । अनेन ।

[अघोयत्र] अघोस् । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः' । 'सो रुः' (२।१।७२) र० । अनेन ।

[कः करोति] किम् । प्रथमा सि । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'उ-श्नोः' (४।३।२) गु० ओ. ।

[भोः करोषि] भोस् । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० सिव् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ॥ छ ॥

ह्रस्वान् ङ-ण-नो द्वे ॥१।३।२७॥

[ह्रस्वान् ङ-ण-नः] एकमात्र(त्रि)कतया उच्चार्यत इति ह्रस्वस्तस्मात्, पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । ङश्च णश्च न् च = ङणन्, तस्य = ङणनः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

[द्वे] द्वि । प्रथमा औ । 'आ द्वेरः' (२।१।४१) इ० → अ० । 'औरीः' (१।४।५६) ई । 'अवर्णस्ये०' (१।२।६) ए. ।

[क्रुङ्ङास्ते] 'क्रुञ्च च कौटिल्याऽल्पीभावयोः' (१०२) क्रुञ्च् । क्रुञ्चतीति । शेषं (१।२।४०) सूत्रवत् । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । अनेन ।

[सुगण्णिह] 'गणण् संख्याने' (१८७४) गण, सुपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । 'अतः' (४।३।८२) (४।३।८२) अलोपः । सुष्ठु गणयतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८४) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । इह अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन ।

[पचन्नास्ते] 'डुपचींष् पाके' (८९२) पच् । 'पचतीति पचन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

[कुर्व्वन्नास्ते] 'डुकृंग् करणे' (८८८) कृ । करोतीति कुर्वन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः । आस्ते पूर्ववत् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कृषन्नास्ते]** 'कृषींत् विलेखने' (१३१९) कृष् । कृषतीति कृषन् । 'शत्रानशा०' (५।२।२०) शतृप्र० → अत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः । आस्ते पूर्ववत् । अनेन ।

**[प्राङास्ते]** प्राङ् आस्ते ।

**[वाणास्ते]** अण (२५९) - रण (२६०) - 'वण शब्दे' (२६१) वण् । वणतीति । क्विप्प्र० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घत्वं । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । आस्ते पूर्ववत् ।

**[राज३निह]** राज३निह इत्यत्र परत्वात् प्रथमप्लुत 'नाऽऽमन्त्र्ये' (२।१।९२) नस्य न लोपः ।

**[प्रत्यङ् शेते]** 'अञ्चू गतौ च' (१०५) अञ्चू, प्रतिपूर्व० । प्रत्यञ्चतीति क्विप् । शेषं (१।३।३) सूत्रवत् ।

**[गच्छन् भुङ्क्ते]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीति गच्छन् । 'शत्रानशावेष्यति तु सस्यौ (५।२।२०) शतृप्र० → अत् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वं । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गे०' (१।३।३९) न० → ङ० ।

**[वृत्रहणौ]** वृत्रं हतवन्तौ = वृत्रहणौ । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) न०→ण० ।

**[दण्डिनौ]** दण्डो विद्यते यस्य । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा औ ।।छ।।

### अनाङ् - माङो दीर्घाद् वा छः ।।१।३।२८।।

**[अनाङ्-माङः]** आङ् च माङ् च = आङ्-माङ्, न आङ्-माङ् = अनाङ्-माङ्, 'अन् स्वरे' (३।२।१२९) अन् । तस्मात् अनाङ्-माङः ।

**[दीर्घात्]** दृणाति = विदारयति उच्चार्यमाणे इति दीर्घस्तस्मात् = दीर्घात् ।

**[वा छः]** वा प्रथमा सि । छ् षष्ठी ङस् ।

**[कन्याच्छत्रम्, कन्याछत्रम्]** 'कनै दीप्ति-कान्ति-गतिषु' (३३१) कन् । कन्यते = अभिलष्यते वरैरिति कन्या । 'स्था-छा-मा-सा-सू-मन्यनि-कनि-षसि-पलि-कलि-शलि-शकीर्ष्य-सहि-बन्धिभ्यो यः' (उणा० ३५७) यप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'छदण् संवरणे' (१६५५) छद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । छादयत्यातपमिति छत्रम् । 'हु-या-मा-श्रु-वसि-भसि-गु-वी-पचि-वचि-धृ-यम्यमि-मनि-तनि-सदि-छादि-क्षि-क्षदि-लुपि-पति-धूभ्यस्त्रः' (उणा० ४५१) त्र० । 'छदेरिस्-मन्-त्रट्-क्वौ' (४।२।३३) ह्रस्व छ कीजइ । 'णेरनिटि' (४।३।८३) णिच्लोपः । कन्यायाः छत्रं = कन्याच्छत्रम् । अनेन द्वित्वं । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[कुटीच्छाया, कुटीछाया]** कुट्याः छाया ।

**[जम्बूच्छाया, जम्बूछाया]** जम्ब्वाः छाया । 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायते = जम्बूः । 'कमि-जनिभ्यां बूः' (उणा० ८४७) बूप्र० । 'म्नां धुड्वर्गे०' (१।३।३९) न० → म० । 'छोंच् छेदने' (११४९) छो । 'आत् सन्ध्यक्षरस्य' (४।२।१) छा । छयति आतपमिति छाया । 'स्था-छा-मा-सा-सू०' (उणा० ३५७) यप्र० । 'आत्' (२।४।१८) आप्प्र० → आ० ।

Jain Education International                For Private & Personal Use Only                www.jainelibrary.org

**[रैच्छाया, रैछाया]** रै-द्रव्यस्य छाया ।

**[गोच्छाया, गोछाया]** गोश्छाया ।

**[नौच्छाया, नौछाया]** नावश्छाया ।

**[आच्छाया]** आङ् अग्रे छाया । आ = ईषत् छाया = आच्छाया । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[आच्छिनत्ति]** आङ् 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । वर्त्त० तिव् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'अघोषे०' (१।३।५०) द० → त० । एवमग्रेऽपि ।

**[मा च्छिदत्]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद्, माङ्पूर्व० । अद्यतनी दि । 'ऋदिच्छ्वि-स्तम्भू-मुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू ञो वा' (३।४।६५) अङ्प्र० → अ । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । 'विरामे वा' (१।३।५१) द० → त० ।

**[मा च्छिन्धि, मा छिन्धि]** मा 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । पं० हि । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० ।

**[प्रमाच्छन्दः, प्रमाछन्दः]** 'मांङ्क् मान-शब्दयोः' (११३७) मा, प्रपूर्व० । प्रमीयते इति प्रमा । 'उपसर्गादातो डोऽश्यः' (५।१।५६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । प्रमायाश्छन्दः = प्रमाच्छन्दः । अथवा प्रमा चासौ छंदश्च = प्रमाच्छन्दः ।

**[प्रमाच्छात्रः, प्रमाछात्रः]** प्रमायाश्छात्रः = प्रमाच्छात्रः ।

**[श्वेतच्छत्रम्]** श्वेतं च तच्छत्रं च ।

**[वाक्छत्रम्]** वाचा छत्रम् ।

**[ह्रीच्छति]** 'ह्रीछ लज्जायाम्' (१२४) ह्रीछ् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

आङ्-माङ्वर्जनादेव दीर्घादिति पदे लब्धे किमर्थं दीर्घादित्यूचे ? सत्यं-आङ्-माङा च व्यर्थौ नञ्पर्युदासात् अप्यस्मादपि अव्यया दीर्घादित्यपि प्रसंगः स्यादिति ।।छ।।

## प्लुताद् वा ।।१।३।२९।।

**[प्लुताद् वा]** प्लुत पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[आगच्छ भो इन्द्रभूते३ च्छत्रमानय, आगच्छ भो इन्द्रभूते३ छत्रमानय]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । आङ्पूर्व०। पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः । भोस् अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । इन्द्र+'भू सत्तायाम्' (१) भू । इन्द्रो भूयादित्याशास्यमान = इन्द्रभूतिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । प्रथमा सि । 'ह्रस्वस्य गुणः' (१।४।४१) सि सउं गुणः । 'दूरादामन्त्रयस्य गुरुर्वैकोऽनन्त्योऽपि लनृत्' (७।४।९९) प्लुतत्वम् । छत्र द्वितीया अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी-आङ्पूर्व० । पं० हि । 'कर्त्तर्यनद्भ्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः । अनेन ।

ननु किमर्थं इदं सूत्रं ? यतो दीर्घमाश्रित्य पूर्वेणैव द्वित्वं वा भविष्यति, सत्यं-इदमेव ज्ञापकं दीर्घापदिष्टं कार्यं न प्लुतस्य । ['ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य' न्यायसंग्रहः-द्वितीयो वक्षस्कारः । सूत्र-१६] ।।छ।।

**स्वरेभ्यः ।।१।३।३०।।**

**[स्वरेभ्यः]** स्वर । पञ्चमी भ्यस् । 'एद् बहुस्भोसि' (१।४।४) ए ।

**[इच्छति]** 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'गमिषद्यमश्छः' (४।२।१०६) ष० → छ० । अनेन द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[गच्छति]** 'गम्लृं गतौ' (३९६) गम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । अनेन द्वित्वम् । 'अघोषे०' (११।३।५०) छ० → च० ।

**[ह्रीच्छति]** 'ह्रीछ लज्जायाम्' (१२४) ह्रीछ् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[म्लेच्छति]** 'म्लेछ अव्यक्तायां वाचि' (११९) म्लेछ् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[चाच्छायते]** 'छोंच् छेदने' (११४९) छो । 'आत् सन्ध्यक्षरस्य' (४।२।१) छा । भृशं पुनः पुनर्वा छयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) छ० → च० । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[चोच्छुप्यते]** 'छुपंत् स्पर्शे' (१३७५) छुप् । भृशं पुनः पुनर्वा छुपति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) छ० → च० । 'आ-गुणावन्यादेः' (४।१।४८) गु० चो । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० ।

**[वृक्षच्छाया]** वृक्षस्य छाया ।

**[वाक्छत्रम्]** वाचा छत्रं । प्रथमा सि ।। छ ।।

**र्हादर्हस्वरस्याऽनु नवा ।।१।३।३१।।**

**[र्हादर्हस्वरस्याऽनु नवा]** र् च हश्च = र्हम्, तस्मात् = र्हात्, पञ्चमी ङसि, 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । र् च हश्च स्वरश्च = र्हस्वरम्, न र्हस्वरं = अर्हस्वरम्, 'नञत्' (३।२।१२५) न० → अ०, तस्य = अर्हस्वरस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । अनु अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । नवा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अर्क्कः, अर्कः]** 'अर्च पूजायाम्' (१०४) अर्च् । अर्च्यते = पूज्यते सामान्यजनैरित्यर्कः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । अनेन द्वित्वं । अथवा 'ऋंक् गतौ' (११३५) ऋ । इयर्त्ति = गच्छति नभस्थाले इत्यर्कः । 'भीण्-शलि-वलि-कल्यति-मर्च्यर्चि-मृजि-कु-तु-स्तु-दा-धा-रा-त्रा-का-पा-निहा-नञ्शुभ्यः कः' (उणा० २१) कप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[मूर्क्खः, मूर्खः] 'मुहौच् वैचित्ये' (१२३८) मुह् । मुह्यति कार्ये । 'पू-मुहोः पुन्मूरौ च' (उणा० ८६) खप्र०-मूरादेशेऽनेन द्वित्वम् ।

[स्वर्ग्गः, स्वर्गः] 'औस्वृ शब्दोपतापयोः' (२१) स्वृ । स्वर्यते = शब्दाय्यते धार्मिकैरिति स्वर्गः । 'गम्यमि-रम्यजि-गद्यदि-छाग-डि-खडि-गृ-भृ-वृ-स्वृभ्यो गः' (उणा० ९२) गप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन द्वित्वम् ।

[अर्च्चा, अर्चा] 'अर्च पूजायाम्' (१०४) अर्च् । अर्चनं = अर्चा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० —> आ । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन द्वित्वम् ।

[ब्रह्म्म, ब्रह्म] बृहू (५५९) - 'बृहु शब्दे च' (५६०) बृह् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । बृंहति अभ्यासवशादिति ब्रह्मन् । 'बृंहेर्नोऽच्च' (उणा० ९१३) मन्प्र० - नकारस्य अकारो भवति । अनेन द्वित्वम् ।

[वह्य्यम्, वह्यम्] 'वहीं प्रापणे' (९९६) वह् । उह्यते इति वह्यम् । 'वह्यं करणे' (५।१।३४) यप्र० । अनेन द्वित्वम् ।

[पद्मह्रदः] पद्मानां ह्रदः = पद्मह्रदः ।

[अर्हः] 'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हतीत्यर्हः । 'अच्' (५।१।४९) अच्प्र० —> अ । प्रथमा सि ।

[करः] 'डुकृंग् करणे' (८८८) कृ । कुर्वन्त्यनेन = करः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० —> अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि ।

[अभ्र्यते] 'अभ्र गतौ' (४०७) अभ्र् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० —> य ।

[प्रोर्ण्णुनाव] 'ऊर्णुग्क् आच्छादने' (११२३) ऊर्णु, प्रपूर्व० । परोक्षा णव् । 'लोकात्' (१।१।३) ऊर् पाठउ विश्लेषियइ । 'निमित्ताऽभावे नैमित्तिकस्याऽप्यभावः' (न्यायसंग्रहः १।२९) नु । 'स्वरादेर्द्वितीयः' (४।१।४) नु सउं द्विर्वचनु । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिर्नौ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० —> ण० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ । अनेन द्वित्वम् ॥ छ ॥

**अदीर्घाद् विरामैकव्यञ्जने ॥१।३।३२॥**

[अदीर्घाद्] न दीर्घोऽदीर्घः । 'नञत्' (३।२।१२५) न० —> अ०, तस्मात् = अदीर्घात् । पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

[विरामैकव्यञ्जने] 'रमिं क्रीडायाम्' (९८९) रम्, विपूर्व० । विरमणं = विरामः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० —> अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । एकं च तद् व्यञ्जनं च = एकव्यञ्जनं, विरामश्च एकव्यञ्जनं च = विरामैकव्यञ्जनं, तस्मिन् = विरामैकव्यञ्जने, सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. ।

[त्वक्क्, त्वक्, त्वग्ग्, त्वग्] 'त्वचत् संवरणे' (१३३९) त्वच् । त्वचतीति त्वक् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० —> क० । अनेन ।

[षट्ट्, षट्, षड्ड्, षड्] षष् । प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लोपः । 'धुटस्तृतीयः' (२।१।७६) ष० —> ड० । 'विरामे वा' (१।३।५१) ड० —> ट० । अनेन ।

[दद्ध्यत्र, दध्यत्र] दधि । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र अव्यउ । 'इवर्णादेरस्वे०' (१।२।२१) य० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० —> द० । अनेन ।

[पत्थ्यदनम्, पथ्यदनम्] पथि मा अदनं = पथ्यदनं । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'समानादमोऽतः' (१।४।४६) अलोपः । 'इवर्णादे०' (१।२।२१) य० । अनेन ।

**[पित्त्रर्थः, पित्रर्थः]** पितुरर्थः । 'इवर्णादिरस्वे०' (१।२।२१) र० । अनेन ।

**[सय्ँय्यतः, सय्ँयतः]** 'यमूं उपरमे' (३८६) यम्, संपूर्व० । संयच्छति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) अनुनासिक यकारु शिरसि अर्द्धी कला य्यं । अनेन ।

**[उरᳲᳲकः, उरᳲकः]** उरस् 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । उरः कायति = उरःकः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । अनेन ।

**[उरᳲᳲपः, उरᳲपः]** उरस् 'पां पाने' (२) पा । उरः पिवतीति उरःपः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अनेन ।

**[गो३त्त्रात!, गो३त्रात!]** देंङ् (६०४) - 'त्रैंङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा ।* गोभिः त्रायते स्म = गो३त्रात! । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतः । अनेन । अथवा गाव एनं त्रायीरन् । 'तिक्कृतौ०' (५।१।७१) क्तप्र० ।

**[नौ३त्त्रात!, नौ३त्रात!]** नौभिः त्रायते स्म = नौ३त्रात! । 'क्षिया-ऽऽशीः-प्रैषे' (७।४।९२) प्लुतसंज्ञा । अनेन ।

**[सूत्रम्]** 'षूत् प्रेरणे' (१३३२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू । सूते(सुवति)ऽर्था(र्थ)मिति सूत्रम् । 'सू-मू-खन्युषिभ्यः कित्' (उणा० ४४९) कित् त्रट्प्र० । अथवा सूत्रयतीति सूत्रम् । 'पुत्रादयः' (उणा० ४५५) त्रप्र० ।

**[पात्रम्]** 'पां पाने' (२) पा । पिवत्यनेनेति पात्रम् । 'नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट्' (५।२।८८) त्रट्प्र० → त्र० ।

**[नेत्रम्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । 'नी-दाव्-शसू-यु-युज०' (५।२।८८) त्रट्प्र० → त्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ने. ।

**[होत्रम्]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । हूयतेऽनेनेति होत्रम् । 'हु-या-मा-श्रु०' (उणा० ४५१) त्रप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० हो ।

**[कृत्स्नम्]** 'कृतैत् छेदने' (१३२५) कृत् । कृन्तति सामस्त्यमिति कृत्स्नम् । 'कृत्यशौभ्यां स्नक्' (उणा० २९४) स्नक्प्र० → स्न ।

**[मृत्स्ना]** प्रशस्ता मृत् = मृत्स्ना । 'स-स्नौ प्रशस्ते' (७।२।१७२) स्नप्र० । 'आत्' (२।४।१८) आप् ।

**[उष्ट्रः]** 'उषू दाहे' (५२९) उष् । ओषति = दहति (इति) उष्ट्रः । 'सू-मू-खन्युषिभ्यः कित्' (उणा० ४४९) कित् त्रट्प्र० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) त्र० → ट्र० ।

**[मधु]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मन्यते माधुर्यतयेति मधु । 'मनि-जनिभ्यां धतौ च' (उणा० ७२१) उप्र०-नस्य धत्वम् ।

**[प्रत्त्तम्, प्रत्तम्]** 'डुदांगृक् दाने' (११३८) दा, प्रपूर्व० । प्रदातुमारब्धं = प्रत्तम् । 'आरम्भे' (५।१।१०) क्तप्र० → त । 'प्राद् दागस्त आरम्भे क्ते' (४।४।७) त्त० । अनेन । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[वर्या]** 'वृग्ट् वरणे' (१२९४) वृ । व्रियते इति वर्या । 'वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये' (५।१।३२)

---

P. * गोभिः त्रातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[वह्यम्]** 'वहीं प्रापणे' (९९६) वह् । उह्यतेऽनेनेति वह्यं । 'वह्यं करणे' (५।१।३४) यप्र० - वह्यं निपातनं । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[तितउ]** 'तनूयी विस्तारे' (१४९९) तन् । तनोतीति । 'तनेर्डउः' (उणा० ७४८) डिद् अउप्र० - **स च सन्वद्भवति** । 'सन्-यङश्च' (४।१।३) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'सन्यस्य' (४।१।५९) अ० → इ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । तितउ चालनिकेत्यर्थः ॥ छ ॥

### अञ्वर्गस्याऽन्तस्थातः ॥१।३।३३॥

**[अञ्वर्गस्याऽन्तस्थातः]** न ञ् = अञ्, अञ् चासौ वर्गश्च = अञ्वर्गस्तस्य, अथवा ञ् चासौ वर्गश्च = ञ्वर्गः, न ञ्वर्गः = अञ्वर्गस्तस्य = अञ्वर्गस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । अन्तस्थाया = अन्तस्थातः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० ।

**[उल्क्का, उल्का]** 'ज्वल दीप्तौ' (९६०) ज्वल् । ज्वलतीति । 'निष्क-तुरुष्कोदर्का-ऽलर्क-शुल्क-श्वफल्क-किञ्जल्कोल्का-वृक्क-छेक-केका-यस्काऽऽदयः' (उणा० २६) कप्र० - ज्वलेरुलादेशश्च । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन द्वित्वं वा ।

**[वल्म्मीकः, वल्मीकः]** 'वलि संवरणे' (८०७) वल् । वलते = संवृणीते मृत्तिकामिति वल्मीकः । 'सृणीका-स्तीक-प्रतीक-पूतीक-समीक-वाहीक-वाह्लीक-वल्मीक-कल्मलीक-तिन्तिडीक-कङ्कणीक-किङ्किणीक-पुण्डरीक-चञ्चरीक-फर्फरीक-झर्झरीक-घर्घरीकाऽऽदयः' (उणा० ५०) किद् ईकप्र० - वलेर्मोऽन्तश्च । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[वृक्षव् क्करोति, वृक्षव् करोति]** वृक्षव् पूर्ववत् साध्योऽग्रे करोति । अनेन द्वित्वं वा ।

**[सव्य्यम्]** सव्य । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' **(१।४।४६) अलोपः ।**

**[हल्ज्ञौ]** हल् च जश्च = हल्ज्ञौ । प्रथमा औ । 'ऐदौत्०' (१।२।१२) औ । व्यञ्जनस्य **हल्संज्ञा ॥ ॥**

### ततोऽस्याः ॥१।३।३४॥

**[ततोऽस्याः]** तद् । तस्मात्ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित्तसुप्र० । **'आ द्वेरः'** (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । इदम् । षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङस् → यास्० । 'अनक्' (२।१।३६) अकारु क्रियते । 'सर्वादेर्डस्पूर्वाः (१।४।१८) डस् आगमः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । एदोतः पदान्तेऽस्य लुक्' (१।२।२७) अलोपः ।

**[दध्य्यत्र, दध्यत्र]** दधि । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'इवर्णादेरस्वे०' (१।२।२१) य् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मध्व्वत्र, मध्वत्र]** मधु । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'इवर्णादेरस्वे०' (१।२।२१) व् । अनेन ।

**[बाल्यम्]** बाल्य । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[वाग् जयति]** वाच् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'जिं अभिभवे ।' (८) जि । वर्त्त० तिव् । शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

**शिटः प्रथम-द्वितीयस्य** ।।१।३।३५।।

**[शिटः प्रथम-द्वितीयस्य]** शिट् पञ्चमी ङसि । प्रथमश्च द्वितीयश्च = प्रथमद्वितीयं, तस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[त्वं क्करोषि, त्वं करोषि]** युष्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) त्वं । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० सिव् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'उ-श्नोः' (४।३।२) गु० ओ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । अनेन द्वित्वम् ।

**[त्वं क्खनसि, त्वं खनसि]** युष्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) त्वं । 'खनूग् अवदारणे' (९१३) खन् । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द्वित्वे सति 'अघोषे प्रथमोऽशिटः' (१।३।५०) ख० → क० ।

**[क≍क्खनति, क≍खनति, कः क्खनति, कः खनति]** किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) किमहुंतइ क क्रियते । 'सो रुः' (२।१।७२) स० → र० । 'रः कख-पफयोः ≍क-≍पौ' (१।३।५) ≍ । अनेन ।

**[क≍प्पचति, क≍पचति, कः प्पचति, कः पचति]** कर् पूर्ववत् । 'रः कख-पफयोः ≍क- ≍पौ' (१।३।५) ≍ । अनेन ।

*[क≍प्फलति, क≍फलति] कर् पूर्ववत् । 'रः कख-पफयोः ≍क-≍पौ' (१।३।५) ≍ । अनेन ।*

**[कश्च्चरति, कश्चरति, कश्च्छादयति, कश्छादयति, कष्ट्टीकते, कष्टीकते, कष्ठ्ठकारः, कष्ठकारः]** कर् पूर्ववत् । चरत्यादौ 'च-ट-ते सद्वितीये' (१।३।७) श-ष-सा यथाक्रमेण ज्ञेयाः ।

**[स्त्थाली, स्थाली]** स्थाली २ । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ।

**[स्प्फीता, स्फीता]** 'स्फायैङ् वृद्धौ' (८०४) स्फाय् । स्फायते स्म । 'गत्यर्था-ऽकर्मक-पिव-भुजेः' (५।१।११) क्तप्र० → त । 'स्फायः स्फी वा' (४।१।९४) स्फाय० → स्फी आदेशः । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।। छ ।।

**ततः शिटः** ।।१।३।३६।।

**[ततः]** तद् । ताभ्याम् = ततः । 'किमद्वयादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित् तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे (२।१।११३) अलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[शिटः]** शिट् षष्ठी ङस् ।

**[तच् श्शेते, तच् शेते]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । शेते 'धुटस्तृतीयः' (२।१।७६) द० → द० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) द० → ज० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ज० → च० । अनेन द्वित्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वत्स्सः, वत्सः]** 'वत्सः' (१।२।७) सूत्रवत् । अनेन ।

**[क्ष्षीरम्, क्षीरम्]** 'घस्लृं अदने' (५४४) घस् । अद्यते तदिति क्षीरम् । 'घसि-वशि-पुटि-कुरि-कुलिकाभ्यः कित्' (उणा० ४१९) किद् ईरप्र० । 'घस्-वसः' (२।३।३६) षत्वं । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अस्य लुक् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) घस्य कत्वं । अनेन । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अप्स्सराः, अप्सराः]** अप्+'सृं गतौ' (२५) सृ । अद्भ्यः सरन्ति स्म । 'आपोऽपाप्ताप्सराब्जाश्च' (उणा० ९६४) असप्र० - अप्सरादेशे प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ।

अमीषु चतुर्षु उदाहरणेषु 'शिट्याद्यस्य द्वितीयो वा' (१।३।५९) इति सूत्रेण शिटि परे प्रथमस्य द्वितीयो वा भवति ।

**[मथ्नाति]** 'मन्थश् विलोडने' (१५४७) मन्थ् । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[ख्याति]** ख्यांक् प्रकथने (१०७१) ख्या । वर्त्त० तिव् ॥ छ ॥

**न रात् स्वरे** ॥१।३।३७॥

**[न रात् स्वरे]** न अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । र पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । स्वर सप्तमी ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[दर्शनम्]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दृश्यतेऽनेनेति दर्शनं । 'करणा-ऽऽधारे (५।३।१२९) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) अर् । अनेन ।

**[विमर्शः]** 'मृशंत् आमर्शने' (१४१६) मृश्, विपूर्व० । विमर्शनं = विमर्शः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) अर् ।

**[कर्षति]** 'कृषं विलेखने' (५०६) कृष् । वर्त्त० तिव् । कर्त्तर्यनद्भ्यः शव् (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) अर् ।

**[वर्षति]** जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६)[卐] 'वृषू सहने च' (५२७) वृष् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) अर् ।

**[वार्सम्]** 'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । ब्रुवन्तं (न्तः) सीदन्ति अस्यामिति वृसी, पृषोदरादित्वान्निपात्यते । वृस्या इदं = वार्सम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् ।

**[कार्सरम्]** 'डुकृंग् करणे' (८८८) कृ । क्रियते पर्वदिने कृसरा । 'कृ-धू-तन्यृषिभ्यः कित्' (उणा० ४४०) कित् सरप्र० । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । कृसराया इदं = कार्सरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् ।

**[तच् श्शेते]** तद् शेते । पूर्वसूत्रेण द्वित्वम् ।

**[षट् ष्षण्डे]** षष् षण्डे । पूर्वसूत्रेण द्वित्वम् ।

**[वत्स्सः]** वत्सः । पूर्वसूत्रेण द्वित्चम् ।

**[वर्च्चः]** 'वर्चि दीप्तौ' (६५३) वर्च् । वर्च्यते । 'अस्' (उणा० ९५२) अस्प्र० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।।छ।।

---

卐 उक्तं च धातुपारायण-क्रियारत्नसमुच्चययोः 'वृषू सेचने' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पुत्रस्याऽऽदिन्-पुत्रादिन्याक्रोशे ॥१।३।३८॥

**[पुत्रस्याऽऽदिन्-पुत्रादिन्याक्रोशे]** पुत्र षष्ठी ङस् । 'टा-ङसोरिनस्यौ' (१।४।५) स्य । आदिन् च पुत्रादिन् च = आदिन्पुत्रादिन्, तस्मिन् = आदिन्पुत्रादिनि । 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रोशनं = आक्रोशः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । तस्मिन् = आक्रोशे ।

**[पुत्रादिनी त्वमसि पापे!]** 'अदं भक्षणे' (१०५९) अद्, पुत्रपूर्व० । पुनः पुनः पुत्रानत्तीति । 'व्रताऽऽभीक्ष्ण्ये' (५।१।१५७) णिन्प्र० । अथवा पुत्रानत्तीत्येवंशीला । 'अजातेः शीले' (५।१।१५४) णिन्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङीप्र० → ई । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । युष्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) त्वं । 'असक् भुवि' (११०२) अस् । वर्त्त० सिव् । 'अस्तेः सि हस्त्वेति' (४।३।७३) सलोपः । पापमस्याऽस्तीति पापा । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप् । 'आमन्त्र्ये' (२।२।३२) सि । 'एदापः' (१।४।४२) सिना सह ए ।

**[पुत्रपुत्रादिनी भव]** पुत्राणां पुत्राः = पुत्रपुत्राः, पुत्रपुत्रानत्तीत्येवंशीला । 'अजातेः शीले' (५।१।१५४) णिन्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङीप्र० । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'भू सत्तायाम्' (१) भू । पं० हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः । अनेन ।

**[पुत्त्रहती, पुत्रहती]** 'हनंक् हिंसा-गत्योः' (११००) हन्, पुत्रपूर्व० । पुत्रान् हन्ति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) विकल्पे द्वित्वम् ।

**[पुत्त्रजग्धी, पुत्रजग्धी]** 'अदं भक्षणे' (१०५९) अद्, पुत्रपूर्व० । पुत्रानत्ति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यपि चाऽदो जग्ध्' (४।४।१६) अद्० → जग्ध्० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'धुटो धुटि स्वे वा' (१।३।४८) दलोपः । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) विकल्पे द्वित्वम् ।

**[पुत्त्रादिनी शिशुमारी, पुत्रादिनीति वा]** पुत्रादिनी पूर्ववत् । 'मृंत् प्राणत्यागे' (१३३३) मृ, शिशुपूर्व० । म्रियमाणान् प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । शिशून् मारयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) विकल्पे द्वित्वम् ।

**[पुत्त्रपुत्रादिनी नागी, पुत्रपुत्रादिनीति वा]** पुत्रपुत्रादिनी पूर्ववत् । नाग मांडियइ् । 'भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश-कामुक-कट-कवरात् पक्वा-ऽऽवपन-स्थूला-ऽकृत्रिमा-ऽमत्र-कृष्णा-ऽऽयसी-रिरंसु-श्रोणि-केशपाशे' (२।४।३०) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) विकल्पे द्वित्वम् ॥ छ ॥

## म्नां धुड्वर्गेऽन्त्योऽपदान्ते ॥१।३।३९॥

**[म्नां]** म् च न् च = म्नस्तेषां = म्नाम् ।

**[धुड्वर्गेऽन्त्योऽपदान्ते]** धुट् चासौ वर्गश्च = धुड्वर्गस्तस्मिन् । अन्त्य प्रथमा सि । 'सो रुः' (२।१।७२) स० →

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र० । पदस्याऽन्तः = पदान्तः, न पदान्तोऽपदान्तः, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अपदान्ते ।

**[गन्ता]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अथवा श्वस्तनी ता । अनेन ।

**[गन्तुम्]** गमनाय = गन्तुम् । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० । अनेन ।

**[शङ्किता]** रेकृङ् (६१६) - 'शकुङ् शङ्कायाम्' (६१७) शक् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नागमु । श्वस्तनी ता । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इडागमः । अनेन कार्यम् ।

**[शङ्कितुम्]** शङ्कनाय = शङ्कितुम् । 'क्रियायां क्रियार्थायां तुम् णकच्०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इडागमः । अनेन कार्यम् ।

**[अञ्चिता]** 'अञ्चू गतौ च' (१०५) अञ्चू । श्वस्तनी ता । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इडागमः । अनेन ।

**[अञ्चितुम्]** अञ्चनाय = अञ्चितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

**[कुण्ठिता]** 'कुठु आलस्ये च' (२२४) कुठ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । श्वस्तनी ता । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[कुण्ठितुम्]** कुण्ठनाय = कुण्ठितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[नन्दिता]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । श्वस्तनी ता । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[नन्दितुम्]** नन्दनाय = नन्दितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[कम्पिता]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । श्वस्तनी ता. । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[कम्पितुम्]** कम्पनाय = कम्पितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितो०' (४।४।३२) इडागमः । अनेन ।

**[कुर्व्वन्ति]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० अन्ति । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'इवर्णादेरस्वे०' (१।२।२१) व् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[कृषन्ति]** 'कृषींत् विलेखने' (१३१९) कृष् । वर्त्त० अन्ति । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[विस्रम्भः]** 'स्रम्भूङ् विश्वासे' (९५१) स्रम्भ्, विपूर्व० । विस्रम्भणं = विस्रम्भः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० ।

**[संरम्भः]** 'रभिं राभस्ये' (७८५) रभ्, संपूर्व० । संरम्भणं = संरम्भः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । **'रभोऽपरोक्षा-शवि'** (४।४।१०२) नोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[क्रान्त्वा]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । क्रमणं पूर्वं = क्रान्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'क्रमः क्त्वि वा' (४।१।१०६) दीर्घः । अनेन ।

**[भ्रान्त्वा]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमणं पूर्वं = भ्रान्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घत्वं । अनेन ।

**[आहन्महे]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । वर्त्त० महे ।

**[प्रहन्मः]** हन्, प्रपूर्व० । वर्त्त मस् । 'व-मिवा' (२।३।८३) विकल्पे णत्वम् ।

**[गम्यते]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ- (३९५) 'गम्लृं गतौ' (३९६) गम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य. ।

**[हन्यते]** 'हनंक् हिंसा-गत्योः' (११००) हन् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[भवान् करोति]** भवान् (१।३।८) सूत्रवत् । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृग्-तनादेरुः' (३।४।८३) उ. । 'उ-श्नोः' (४।३।२) गु० ओ । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । अनेन न. ।

**[व्यङ्क्ता]** 'अञ्जौप् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज्, विपूर्व० । श्वस्तनी ता । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । अनेन ।

**[व्यङ्क्तुम्]** व्यञ्जनाय = व्यङ्क्तुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । अनेन ॥ छ ॥

शिड्-हेऽनुस्वारः ॥१।३।४०॥

**[शिड्-हेऽनुस्वारः]** शिट् च हश्च = शिड्हं, तस्मिन् = शिड्हे, सप्तमी ङि, 'धुटस्तृतीयः' (२।१।७६) ट० → ड० । अनुस्वार प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

ननु हस्य शिट्संज्ञां कृत्वा ''शिय्यनुस्वारः' इत्येवोच्यताम्, सत्यम् - यदि हग्रहणं न क्रियते तदा 'औजढद्'' इत्यत्र 'अघोषे शिटः' (४।१।४५) इति हस्य लोपेऽनिष्टं रूपं स्यात् ।

**[पुंसि]** 'पांक् रक्षणे' (१०६७) पा । पाति = रक्षति पुरुषार्थचतुष्टयमिति पुमान् । 'पातेर्डुम्सुः' (उणा० १००२) डिद् उम्सुप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११३) आलोपः । सप्तमी ङि ।

**[गंस्यते]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । भविष्यन्ती स्यते ।

**[दंशः]** 'दंशं दशने' (४९६) दंश् । दंशनं = दंशः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । प्रथमा सि ।

卐**[सुदंशि कुलानि]** 'दंशं दशने' (४९६) दंश्, सुपूर्व० । सुष्ठु दशन्ति यानि कुलानि तानि = सुदंशि कुलानि । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० ।

**[वपूंषि]** वपुस् मांडियइ । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

---

卐 बृहन्न्यासे श० न्यासानुसन्धाने - शोभना दिशो येषां कुलानामिति बहुव्रीहौ जसो 'नपुंसकस्य शिः' (१।४।५५) इति शौ । 'धुटां प्राक्' (१।४।६६) इति नागमेऽनेनानुस्वारे **सुदिंशि कुलानि** ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[धनूंषि]** धनुस् मांडियइ । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वं । एवमग्रेऽपि ।

**[गुडलिंहि]** 'लिहींक् आस्वादने' (११२९) लिह्, गुडपूर्व० । गुडं लिहन्तीति गुडलिंहि । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः ।

**[स्वनड्वांहि कुलानि]** शोभना अनड्वाहो येषु कुलेषु तानि = स्वनड्वांहि कुलानि । प्रथमा जस् । नपुंसकस्य शिः' (१।४।५५) शि० । 'वाः शेषे' (१।४।८२) उ० → वा० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । अनेन ।

**[बृंहणम्]** 'बृहु शब्दे च' (५६०) बृह् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । बृंह्यते = बृंहणं । 'अनट्' (५।३।१२४) अनट्प्र० → अन । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अनेन ।

**[सुदंशि]** 'दृशृं प्रेक्षणे' (४९५) दृश्, सुपूर्व० । सुष्ठु पश्यन्ति यानि तानि = सुदंशि । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । शेषं पूर्ववत् ।

**[भवान् साधुः]** भवान् (१।३।८) सूत्रवत् ।

**[श्रेयान् हेतुः]** श्रेयस् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घत्वं । 'पदस्य' (२।१।८९) सलोपः ।

**[पिण्ड्ढि]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पं० हि । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न० । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ष० → ड० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धि० → ढि० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ण० कीजइ ।

**[शिण्ड्ढि]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । पं० हि । शेषं सर्वं 'पिण्ड्ढि' वत् ।

ननु ''पिण्ड्ढि'' इत्यादौ श्नस्यालुकः स्थानिवत्त्वादकारेण षस्य व्यवधानाद् अनुस्वारो न प्राप्नोति, किमन्वित्याश्रयणेन ? नैवम्- 'न सन्धि-ङी-य-क्वि -द्वि-दीर्घा-ऽसद्विधावस्क्लुकि' (७।४।१११) इति सन्धिविधौ स्थानित्वनिषेधात् ॥ ॥

### रो रे लुग् दीर्घश्चादिदुतः ॥१।३।४१॥

**[रो रे लुग् दीर्घश्चादिदुतः]** र् षष्ठी ङस् । र सप्तमी ङि, 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । 'लुञ्च अपनयने' (१०३) लुञ्च् । लुञ्चनं = लुक् । क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । दीर्घ प्रथमा सि । च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अत्-इत्-उत् मांडियइ । अच्च इच्च उच्च = अदिदुत्, तस्य = अदिदुतः, षष्ठी ङस् ।

**[पुना रमते]** पुनर् अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[प्राता रौति]** प्रातर् अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । वर्त्त० तिव् । 'उत और्विति व्यञ्जनेऽद्वेः' (४।३।५९) औ ।

**[अग्नी रथेन]** 'अग कुटिलायां गतौ' (१०२२) अग् । अगति = कुटिलं गच्छति वायुवशादित्यग्निः । 'वी-यु-सु-वह्यगिभ्यो निः' (उणा० ६७७) निप्र० । प्रथमा सि । 'रमिं क्रीडायाम्' (९८९) रम् । रमते जनोऽनेनेति रथः । 'नी-नू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमि-तृ-तुदि-वचि-रिचि-सिचि-श्वि-हनि-पा-गो-पा- वोद्गाभ्यः कित्' (उणा० २२७) कित् थप्र० । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलोपः । तृतीया टा । 'टा ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

[नीरक्तम्] निर्-रक्तं । निर्गतं रक्तं यत्र तत् = नीरक्तम् ।

[पटू राजा] पटु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'राजृग् दीप्तौ' (८९३) राज् । राजते=शोभते छत्र-चामरादिभिश्चिह्नैरिति राजा । 'उक्षि-तक्ष्यक्षीशि-राजि-धन्वि-पश्चि-पूषि-क्लिदि-स्निहि-नु-मरजेरन्' (उणा० ९००) अन्प्र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

[अहोरूपम्] अहन् मांडियइ । प्रशस्तमहः = अहोरूपम् । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'अह्नः' (२।१।७४) न० → र० । 'घोषवति' (१।३।२१) र० → उ० । 'अवर्णस्ये०' (१।२।६) ओ. ।

यदि पदान्त इति ग्रहणं स्यात्तदा "अजर्धाः, अपास्पाः, अचाकूः, अचाकाः, अपापाः" इत्यादिष्वेव प्राप्नोति, न तु स्व(वा)राज्यं (इत्यादाविति), नैवम् - अदिदुत इति इद्ग्रहणादपदान्त इति नानुवर्तते. यत इकारात् परस्य रेफस्य रेफेऽपदान्ते संभवो नास्तीति, भिन्नस्थानिनिमित्तभणनाद्वा ॥छ॥

ढस्तड्ढे ॥१।३।४२॥

[ढस्तड्ढे] ढ् षष्ठी ङस् । तड्ढ मांडियइ । तन्निमितो ढस्तड्ढः, तस्मिन् = तड्ढे, सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । 'धुटस्तृतीयः' (२।१।७६) द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ड० ।

[माढिः] अर्ह (५६४) 'मह पूजायाम्' (५६५) मह् । महनं = माढिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । सूत्रकार्यम् । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[लीढम्] 'लिहींक् आस्वादने' (११२९) लिह् । लेहनं = लीढम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । सूत्रकार्यम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

[मीढम्] 'मिहं सेचने' (५५१) मिह् । मेहनं = मीढम् । शेषं 'लीढम्' वत् ।

[गूढम्] 'गुहौग् संवरणे' (९३५) गुह् । गूहनं = गूढम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । सूत्रकार्यम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

[मधुलिड् ढौकते] 'लिहींक् आस्वादने' (११२९) लिह्, मधुपूर्व० । मधु लेढीति मधुलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५) - श्लकुङ् (६२६) - 'ढौकृङ् गतौ' (६२७) ढौक् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[चकृड्ढ्वे] 'डुकृंग् करणे' (८८८) कृ । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः' (४।१।१) द्वित्वं । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तात् परोक्षाद्यतन्याशिषो धो ढः' (२।१।८०) ध० → ढ० । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) द्वित्वं । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ढ० → ड० ।

[लुलुविड्ढ्वे] 'लूग्श् छेदने' (१५१९) लू । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनं । 'ह्रस्वः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।३९) लु । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्त्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । 'हान्तस्थाञ्जीड्भ्यां वा' (२।१।८१) धस्य ढत्वं । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) द्वित्वं । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ढ० → ड० ।

**[आतृढम्]** 'तृहौ हिंसायाम्' (१४२२) तृह्, आङ्पूर्व० । आतृह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'हो धुट् पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः ।

**[आवृढम्]** 'वृहौत् उद्यमे' (१४२१) वृह, आङ्पूर्व० । आवृह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः ।

ननु 'ण-षमसत्परे स्यादिविधौ च' (२।१।६०) इति ढस्य लोपस्याऽसिद्धत्वाद् गुणो भविष्यति, किं अन्वित्यधिकारेण ? उच्यते – 'असिद्धं बहिरङ्गमन्तरङ्गे' (न्यायसंग्रहः १।२०) इति तत्र पूर्वपदाश्रितमन्तरङ्गं, परपदाश्रितं बहिरङ्गं, अल्पाश्रितमन्तरङ्गं, बह्वाश्रितं बहिरङ्गं, प्रकृत्याश्रितमन्तरङ्गं, प्रत्ययाश्रितं बहिरङ्गं इति न्यायात् अन्तरङ्गे दीर्घत्वे बहिरङ्गो गुणे(णो)ऽसिद्धः स्यात्, तेनाऽन्विति वाच्यमेव ।

**[लेढा]** 'लिहींक् आस्वादने' (११२९) लिह् । श्वस्तनी ता । शेषं (१।३।४२) सूत्रवत् साध्यः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[मोढा]** 'मुहौच् वैचित्ये' (१२३८) मुह् । श्वस्तनी ता । शेषं (१।३।४२) सूत्रवत् साध्यः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ० ।।छ।।

### सहि-वहेरोच्चाऽवर्णस्य ।।१।३।४३।।

**[सहि-वहेरोच्चाऽवर्णस्य]** सहिश्च वहिश्च = सहिवहि, तस्य = सहिवहेः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र० । ओत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । च अव्यउ । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → च० । अकारेणोपक्षितो वर्णोऽवर्णस्तस्य = अवर्णस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[सोढा]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) ष० → स० । सहति(ते)इति सोढा । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह०→ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) ध० → ढ० । सूत्रकार्यम् ।

**[वोढा]** 'वहीं प्रापणे' (९९६) वह् । वहतीति वोढा । शेषं 'सोढा' वत् ।

**[उदवोढाम्]** 'वहीं प्रापणे' (९९६) वह्, उद्पूर्व० । अद्यतनी ताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः । सूत्रकार्यम् ।

**[ऊढः]** 'वहीं प्रापणे' (९९६) वह् । उह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्विला दीर्घः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उदः स्था-स्तम्भः सः ॥१।३।४४॥**

**[उदः स्था-स्तम्भः सः]** उद् पञ्चमी ङसि । स्थाश्च स्तम्भ् च = स्थास्तम्भ्, तस्य = स्थास्तम्भः, षष्ठी ङस् । स् षष्ठी ङस् ।

**[उत्थाता]** उद् स्था (१।१।११) सूत्रवत् । उत्तिष्ठतीति उत्थाता । 'णक-तृचौ' (५।१।४८) तृच्प्र० ⟶ तृ ।

**[उत्थातुम्]** उत्त्था(त्था)नाय = उत्थातुम् । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० ।

**[उत्तम्भिता]** 'स्तम्भू स्तम्भे' (१९८५) स्तम्भ् (सौत्रधातुः) उद्पूर्व० । उत्तम्भतीति (उत्तभ्नाति) । 'णक-तृचौ' (५।१।४८) तृच्प्र० ⟶ तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । अनेन सलोपः ।

**[उत्तम्भितुम्]** उत्त(त्तम्)भनाय = उत्तम्भितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[संस्थाता]** सं स्था (१।१।११) सूत्रवत् । श्वस्तनी ता ।

**[उत्स्तोता]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे०' (न्यायसंग्रहः- प्रथमो वक्षस्कारः/२९) स्तु- उद्पूर्व० । श्वस्तनी ता । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[उत्स्कन्नः]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द्, उद्पूर्व० । उत्स्कद्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० ⟶ त० । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) द०-त० ⟶ न० ।

**[उत्तिष्ठति]** उद् स्था (१।१।११) सूत्रवत् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा०' (४।२।१०८) स्था० ⟶ तिष्ठ आदेशः ।

**[उदस्थात्]** स्था उद्पूर्व० । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिचो लुप् । 'अड् धातोरादिर्ह्यस्तन्यां०' (४।४।२९) अडागमः ।

**[उदस्तभत्]** 'स्तम्भू स्तम्भे' (१९८५) स्तम्भ् (सौत्रधातुः) उद्पूर्व० । अद्यतनी दि । 'ॠदिच्छ्वि-स्तम्भू-म्रुचु-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ज्रो वा' (३।४।६५) अङ्प्र० । नो व्यञ्जनस्याऽनुदितः (४।२।४५) नलोपः । 'अड् धातोरादिर्ह्यस्तन्यां०' (४।४।२९) अट् ।

**[उत्तिस्तम्भिषति]** 'स्तम्भू स्तम्भे' (१९८५) स्तम्भ् (सौत्रधातुः) उद्पूर्व० । उत्तभि(म्भि)तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० ⟶ स० । 'सन्-यङश्च' (४।१।३) स्तम्भ् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'अघोषे शिटः' (४।१।४५) सलोपः । 'सन्यस्य' (४।१।५९) इकारु । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[उत्कन्दको रोगः]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द्० उद्पूर्व० । उत्स्कन्दतीति उत्कन्दकः । 'णक-तृचौ' (५।१।४८) णकप्र० ⟶ अक । 'पृषोदरादयः' (३।२।१५५) निपातः ॥ छ ॥

**तदः सेः स्वरे पादार्था ॥१।३।४५॥**

**[तदः सेः स्वरे पादार्था]** तद् पञ्चमी ङसि । सि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । स्वर सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । पादोऽर्थो यस्याः सा पादार्था । तदित्यनेन तदादेशस्य ग्रहणं, अन्यथा व्यञ्जनात् सिलोपः सिद्ध एव, अनुकरणत्वात् त्यदादित्वाभावः, तदिति पादार्था अथवा पादाय इयं = पादार्थ(र्था) । 'आत्' (२।४।१८) आप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । एतसि पादपूरणी होइ, तसि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोप होइ, ससि पादपूरणी न होइ तत होइ ।

**[सैष दाशरथी रामः]** तद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । एतद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । अनेन सिलोपः । 'एतदश्च व्यञ्जनेऽनग्-नञ्समासे' (१।३।४६) सिलोपः । दशरथस्याऽपत्यं = दाशरथिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः दा । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रमिं क्रीडायाम्' (९८९) रम् । रमते = क्रीडतीति रामः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० (?) ] ('वा ज्वलादि०' (५।१।६२) णप्र०) । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'रो रे लुग् दीर्घश्चादिदुतः' (१।३।४१) रस्य लोपः-इदीर्घः ।

**[सैष राजा युधिष्ठिरः]** तद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'आत्' (२।४।१८) आप् । एतद् । प्रथमा सि । राजन् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । युध् । सप्तमी ङि । युधि स्थिरः = युधिष्ठिरः, समासकालेऽलुप्समास एषः । 'गवि-युधेः स्थिरस्य' (२।३।२५) स० → ष० । 'तवर्गस्य०' (१।३।६०) थ० → ठ० ।

**[सौषधीरनुरुध्यते]** सा पूर्ववत् । 'उषू दाहे' (५२९) उष् । ओषति रोगात् (न्) । 'उषेरधिः' (उणा० ६७५) अधिप्र० । प्रथमा सि । 'रुधूंपी आवरणे' (१४७३) रुध्, अनुपूर्व० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ॥छ॥

**एतदश्च व्यञ्जनेऽनग्-नञ्समासे** ॥१।३।४६॥

**[एतदश्च व्यञ्जने]** एतद् पञ्चमी ङसि । च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । व्यञ्जन सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. ।

**[अनग्-नञ्समासे]*** नञा समासः = नञ्समासः, अक् च नञ्समासश्च = अक्नञ्समासः, न अक्नञ्समासः = अनक्नञ्समासः, तस्मिन्, सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. ।

**[एष ददाति]** एतद् । प्रथमा सि । 'डुदांग्क् दाने' (११३८) दा । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) दा सउं द्विर्वचनु । 'ह्रस्वः' (४।१।३९) दा० → द० ।

**[परमैष करोति]** परम अग्रे एतद् । परमश्चासावेषश्च = परमैषः । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[परमस ददाति]** परमश्चासौ सश्च = परमसः ।

**[को दाता]** किम् । प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) क० । 'डुदांग्क् दाने' (११३८) दा । श्वस्तनी ता ।

**[यो धन्यः]** धनं लब्धा = धन्यः । 'धन-गणाल्लब्धरि' (७।१।९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[एतौ गच्छतः]** एतद् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

P. * नञ् चासौ समासश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) तौ । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । वर्त्त० तस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वं । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[तौ तिष्ठतः]** तद् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) द०→अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) तौ । स्था (१।१।११) सूत्रवत् । वर्त्त० तस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) तिष्ठ आदेशः ।

**[एतेषु चरति]** एतद् । सप्तमी सुप् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । अत्र 'स्वाङ्गमव्यवधायि' (न्यायसं. २।११) इति न्यायात् व्यञ्जनस्य निमित्तत्वं परत्वादेत्वे षत्वे च कृते सकारस्याऽभावाल्लोपो न भविष्यति, सत्यम्- विशेषविहितत्वादेत्व-षत्वाभ्यां पूर्वमेव लोपः स्यादिति । किञ्च, एतत् स्कुभ्नातीत्यादावपि स्यात् । 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तेषु याति]** तद् । सप्तमी सुप् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । 'यांक् प्रापणे' (१०६२) या । वर्त्त० तिव् ।

**[एषकः करोति]** एतद् । कुत्सितोऽल्पोऽज्ञातो वा एषः = एषकः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[सको याति]** तद् । कुत्सितोऽल्पोऽज्ञातो वा सः = सकः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० ।

**[अनेषो गच्छति]** एतद् । न एषो = अनेषः । 'अन् स्वरे' (३।२।१२९) अन् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त०→स० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[असो याति]** तद् । न सः = असः । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'सो रुः' (२।१।७२) स० → र० ॥ छ ॥

**व्यञ्जनात् पञ्चमाऽन्तस्थायाः सरूपे वा** ॥१।३।४७॥

**[व्यञ्जनात्]** व्यञ्जन । पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङसि० → आत्. ।

**[पञ्चमाऽन्तस्थायाः]** पञ्चम-अन्तस्था । पञ्चमाश्च अन्तस्थाश्च=पञ्चमाऽन्तस्था, तस्याः = पञ्चमाऽन्तस्थायाः । समाहारेऽपि सूत्रत्वात् ह्रस्वाऽभावः । षष्ठी ङस् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङस्० → यास् ।

**[सरूपे वा]** समान-रूप । समानं रूपं यस्याऽसौ सरूपः । 'समानस्य धर्मादिषु' (३।२।१४९) मानलोपः, तस्मिन् = सरूपे, सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. । वा ।

**[क्रुङ्ङौ, क्रुङ्ङ्ङौ]** 'क्रुञ्च च कौटिल्याऽल्पीभावयोः' (१०२) क्रुञ्च् । क्रुञ्चतीति क्विप् । 'अप्रयोगीत्' (१।१।३७)

क्विप्लोपः । ङ् च ङश्च=ङ्ङौ, क्रुञ्चो ङङौ=क्रुङ्ङ्ङौ, प्रथमा औ । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० । अनेन ।

**[आदित्यः, आदित्य्यः]** अदिति । अदितेरयं = आदित्यः । 'अनिदम्यणपवादे च दित्यदित्यादित्य- यमपत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । आदित्यो देवता अस्य = आदित्य्यः । 'अनिदम्यणपवादे च०' (६।१।१५) ञ्यप्र० → य । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । अनेन । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अन्नम्]** 'अन प्राणने' (१०८९) अन् । अनिति = जीवति प्राणी अनेन । 'प्या-धा-पन्यनि-स्वदि-स्वपि-वस्यज्यति-सिविभ्यो नः' (उणा० २५८) नप्र० । अद्यते तदा 'अदोऽनन्नात्' (५।१।१५०) निर्देशाद् न जग्ध् । 'अदं भक्षणे' (१०५९) अद् । अत्ति स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त० । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) द०-त० → न० ।

**[भिन्नम्]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्ति स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त० । 'रदादमूर्च्छ०' (४।२।६९) द०-त० → न० ।

**[वर्ण्यते]** 'वर्णण् वर्णक्रिया-विस्तार-गुणवचनेषु' (१८७०) वर्ण् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[बभ्यते, बभ्र्यते]** अभ्र (४०७) - 'बभ्र गतौ' (४०८) बभ्र् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । (केचित्तु पञ्चमाऽन्तस्थायाः पञ्चमाऽन्तस्थामात्रे लोपमिच्छन्ति, न तु सरूप एव) तन्मते विकल्पे रलोपः ।

**[मभ्यते, मभ्र्यते]** अभ्र (४०७) बभ्र (४०८) - 'मभ्र गतौ' (४०९) मभ्र् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[अब्धिः]** 'अभ्र गतौ (४०७) अभ्र्' । अभ्रादिन्याशास्यमानोऽब्धिः' । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० ।

**[वावब्धि]** 'वभ्र गतौ' (४०८) वभ्र् । भृशं पुनः पुनर्वा वभ्रति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य० । 'सन्-यङश्च' (४।१।३) वभ्र् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) भ्र्लोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । अग्रे पूर्ववत् ।

**[मामब्धि]** मभ्र गतौ (४०९) मभ्र् । भृशं पुनः पुनर्वा मभ्रति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य० । 'सन्-यङश्च' (४।१।३) मभ्र् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) भ्र्लोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । अग्रे पूर्ववत् ॥ छ ॥

## धुटो धुटि स्वे वा ॥१।३।४८॥

**[धुटो धुटि स्वे वा]** धुट् षष्ठी ङस् । धुट् सप्तमी ङि । स्व सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[प्रत्तम्, प्रत्त्तम्]** 'डुदांग्क् दाने' (११३८) दा, प्रपूर्व० । प्रदीयते स्म । 'आरम्भे' (५।१।१०) क्तप्र० → त० । 'प्राद् दागस्त्त आरम्भे क्ते' (४।४।७) त्तादेशः ।

**[अवत्तम्, अवत्त्तम्]** 'डुदांग्क् दाने' (११३८) दा, अवपूर्व० । अवदीयते स्म । 'आरम्भे' (५।१।१०) क्तप्र०→त० । 'नि-वि-स्वन्ववात्' (४।४।८) त्तादेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शिण्ढि, शिण्ड्ढि]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । पं० हि । शेषं (१।३।४०) सूत्रवत् । अनेन ।

**[पिण्ढि, पिण्ड्ढि]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पं० हि । शेषं (१।३।४०) सूत्रवत् । अनेन ।

**[भिन्थः, भिन्त्थः]** 'भिदृंपी विदारणे' (१४७७) भिद् । वर्त्त० थस् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न० । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'अघोषे प्रथमो०' (१।३।५०) द० → त० ।

**[शाङ्गर्म्]** शृङ्ग । शृङ्गस्येदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[भाङ्गर्म्]** भृङ्ग । भृङ्गस्येदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[सक्थ्ना, सक्थ्ने]** सक्थि । तृतीया टा । चतुर्थी ङे । 'दध्यस्थिसक्थ्यक्ष्णोऽन्तस्याऽन्' (१।४।६३) अन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[तर्प्ता]** 'तृपौच् प्रीतौ' (११८९) तृप् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) अर् ।

**[दर्प्ता]** 'दृपौच् हर्ष-मोहनयोः' (११९०) दृप् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) अर् ।

**[बोद्धा]** 'बुधिं ज्ञाने' (१२६२) बुध् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० (?) । ('तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द०)।

**[योद्धा]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० (?) । (तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । ।।छ।।

### तृतीयस्तृतीय-चतुर्थे ।।१।३।४९।।

**[तृतीयस्तृतीय-चतुर्थे]** त्रि मांडियइ । त्रयाणां पूरणस्तृतीयः । 'त्रेस्तृ च' (७।१।१६६) तीयप्र० - तृ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । चतुर् । चतुर्णां पूरणश्चतुर्थः । 'चतुरः' (७।१।१६३) थट्प्र० । तृतीयश्च चतुर्थश्च = तृतीयचतुर्थम्, तस्मिन्, सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. ।

**[मज्जति]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'सस्य श-षौ' (१।३।६१) स० → श० । अनेन शकारस्य जकारः ।

**[भृज्जति]** 'भ्रस्जींत् पाके' (१३१६) भ्रस्ज् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'सस्य श-षौ' (१।३।६१) स० → श० । अनेन शकारस्य जकारः । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ।

**[दोग्धा]** 'दुहींक् क्षरणे' (११२७) दुह् । दोग्धीति दोग्धा । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । अनेन ।

**[दोग्धुम्]** 'दुहींक् क्षरणे' (११२७) दुह् । दोहनाय = दोग्धुम् । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुमप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । अनेन ।

**[पिण्ड्ढि]** १।३।४० सूत्रवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शिण्ढि]** १।३।४० सूत्रवत् ।

**[योद्धुम्]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । योधनाय = योद्धुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । अनेन ।

**[लब्धा]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभते इति लब्धा । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । अनेन ।

**[लब्धुम्]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभनाय = लब्धुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'अधश्चतुर्थात्'० (२।१।७९) त० → ध० । अनेन ।

**[लिख्यते]** लिख्यत इत्यत्र स्वस्य ग० आसन्नः प्राप्नोति ।

**[वल्भते]** वल्भत इत्यत्र लस्य द० आसन्नः प्राप्नोतिः ॥ छ ॥

**अघोषे प्रथमोऽशिटः ॥१।३।५०॥**

**[अघोषे प्रथमोऽशिटः]** अघोष सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. । प्रथम प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । न शिट् = अशिट्, 'नञत्' (३।२।१२५) न० → अ०, तस्य = अशिटः ।

**[वाक्पूता]** 'वचंक् भाषणे' (१०९६) वच् । वक्तीत्येवंशीला वाक् । शेषं (१।३।१) सूत्रवत् । 'पूङ् पवने (६००) पू । पूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'आत्' (२।४।१८) आप् → आ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन । अथवा 'पूग्श् पवने' (१५१८) पू । पुनातीति पूता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । वाचा पूता = वाक्पूता ।

**[देवच्छत्रम्]** देवस्य छत्रम् ।

**[दृषत्कल्पः]** ईषदपरिसमाप्तो दृषद् = दृषत्कल्पः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० ।

**[ककुप्सु]** ककुभ् । सप्तमी सुप् ।

**[कण्ठः]**卐 'कमूङ् कान्तौ' (७८९) कम् । काम्यते स्वरेणेति कण्ठः । 'वनि-कणि-काश्युषिभ्यष्ठः' (उणा० १६२) ठप्र० । 'म्नां धुड्वर्गे०' (१।३।३९) म० → ण० ।

**[कन्था]** 'कमूङ् कान्तौ' (७८९) कम् । काम्यते शीतार्त्तिप्राणिभिरिति कन्था । 'कमि-पु-गार्त्तिभ्यस्थः' (उणा० २२५) थप्र० । 'आत्' (२।४।१८) आप् । 'म्नां धुड्वर्गे०' (१।३।३९) म० → न० ।

**[पयस्सु]** पयस् । सप्तमी सुप् । 'श-ष-से श-ष-सं वा' (१।३।६) स० । ॥छ॥

**विरामे वा ॥१।३।५१॥**

**[विरामे वा]** 'रमिं क्रीडायाम्' (९८९) रम्, विपूर्व० । विरमणं = विरामः । 'भावा-ऽकर्त्रोः (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिस्तस्मिन् । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[वाक्, वाग्]** वाच् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । अनेन ।

**[कुङ्, सुगण्, भवान्, त्वम्]** क्रुङित्यादिचतुष्टये क-ट-त-पाः स्युः, अधुटि ॥ छ ॥

卐 उणादौ-वृहन्न्यासे श० न्यासानुसन्धाने 'कण शब्दे' (१०३८) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न सन्धिः ॥१।३।५२॥**

**[न सन्धिः]** न प्रथमा सि । 'डुधांग्क् धारणे च' (११३९) धा । 'धातोः पूजार्थस्वति०' (३।१।१) सम् । संधानं = सन्धिः । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥

**[दधि अत्र]** दधि । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अत्र । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[तत् लुनाति]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'लूग्श् छेदने' (१५१९) लू । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वत्वं । अनेन ॥ छ ॥

**रः पदान्ते विसर्गस्तयोः ॥१।३।५३॥**

**[रः पदान्ते विसर्गस्तयोः]** र् षष्ठी ङस् । पदस्य अन्तः = पदान्तस्तस्मिन्, सप्तमी ङि, 'अवर्णस्ये०' (१।२।६) ए. । विसर्ग प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । तद् सप्तमी ओस् । 'आ द्वेरः' (२।१।४१) द०→अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'एद् बहुस्भोसि' (१।४।४) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[वृक्षः]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । वृश्चति = छिनत्ति आतपं = घर्म्ममिति वृक्षः । 'ऋजि-रिषि-कुषि-कृति-व्रश्च्युन्दि-शृभ्यः कित्' (उणा० ५६७) कित् सप्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८९) सलोपः । 'यज-सृज-मृज०' (२।१।८७) च० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ईर्त्ते]** 'ईरिक् गति-कम्पनयोः' (१११५) ईर् । वर्त्त० ते । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[शूर्प्पः]** 'शूर्पण् माने' (१६७२) शूर्प् । शूर्प्यते = मीयतेऽनेनेति शूर्प्पः । 'भावा-ऽकर्त्रो' (५।३।१८) घञ्प्र०→ अ । 'र्हादर्हस्वर०' (१।३।३१) द्वित्वम् ।

**[सर्प्पः]** 'सृप्लृं गतौ' (३४१) सृप् । कुटिलं सर्पतीति सर्प्पः ।卐 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[नार्पत्यः]** नृपतेरपत्यं = नार्पत्यः । 'अनिदम्यणपवादे च दित्यदित्यादित्य-यमपत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् । 'अवर्णवर्णस्य' (७।४।६८) इलोपः ।

**[नार्कुटः]** नृकुट्यां भवो नार्कुटः । 'भवे' (६।३।१२३) अण् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् । 'अवर्णवर्णस्य' (७।४।६८) ईलोपः ।

**[गीः]** 'गृत् निगरणे' (१३३५) गृ । गिरणं = गीः । 'क्रुध्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप् । 'ॠतां क्ङितीर्' (४।४।११६) गिर् कीजइ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

**[धूः]** उर्वै (४७०) - तुर्वै (४७१) - थुर्वै (४७२) - दुर्वै (४७३) - 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वतीति । 'गृ-पृ-दुर्वि-धुर्विभ्यः क्विप्' (उणा० ९४३) क्विप्प्र० । 'राल्लुक्' (४।१।११०) वलोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

**[सजूःषु]** 'जुषैति प्रीति-सेवनयोः' (१४७२) जुष् । सह जुषन्ति(न्ते) इति क्विप् । 'सहस्य सोऽन्यार्थे (३।२।१४३)

---

卐 धातुपारायणे-बृहन्न्यासे श० न्यासानुसन्धाने 'लिहादिभ्यः' (५।१।५०) अच्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सभावः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी सुप् ।

**[आशीःषु]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, आङ्पूर्व० । आशासनमाशीः । 'क्रुत्संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) आ० → इ० । सप्तमी सुप् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः(?) ('पदान्ते' (२।१।६४) दीर्घः) ।।छ।।

**रव्यागि ।।१।३।५४।।**

**[रव्यागि]** रव्याग् सप्तमी ङि ।

'सिद्धे सत्यारम्भो नियमाय' (न्यायसंग्रहः-१/२५) इति न्यायात् कार्यान्तरबाधनार्थमिदमित्याह-पूर्वेणैव सिद्धे नियमार्थमिदम्, तेन जिह्वामूलीयो न भवति ।

**[कः ख्यातः]** कर् (१।३।३५) सूत्रवत् । 'ख्यांक् प्रकथने' (१०७१) ख्या । ख्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'रः कख-पफयोः' ≍क- ≍पौ ' (१।३।५) ≍क न भवति ।

**[नमः रव्यात्रे]** नमस् अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । ख्यातीति रव्याता । 'णक-तृचौ' (५।१।४८) तृच्प्र० । तस्मै = रव्यात्रे, चतुर्थी ङे, 'इवर्णादे०' (१।२।२१) र० ।।छ।।

**शिट्यघोषात् ।।१।३।५५।।**

**[शिट्यघोषात्]** शिट् सप्तमी ङि । अघोष पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

**[पुरुषः त्सरुकः]** पुरुष । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । त्सरु । त्सरौ कुशलः = त्सरुकः । 'कोऽश्मादेः' (६।३।९७) कप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अघोष तकारु, शिट् भणियइ सकारु, विसर्ग हुइ रेफतणइ स्थानि, सकारु पावइ 'च-ट-ते स-द्वितीये' (१।३।७) प्राप्तिपूर्वको हि प्रतिषेधः ।

**[सर्पिः प्साति]** सर्पिस् । द्वि० अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । 'सो रुः' (२।१।७२) स० → र० । अदं (१०५९) - 'प्सांक् भक्षणे' (१०६०) प्सा । वर्त्त० तिव् ।

**[सर्पिः प्सातम्]** सर्पिस् । द्वितीया अम् । 'अनतो लुप्' (१।४।५९) । अम्लोपः । अदं (१०५९) - 'प्सांक् भक्षणे' (१०६०) प्सा । प्साति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० ।

**[वासः क्षौमम्]** वासस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । क्षुमा मांडियइ । क्षुमा = अतसी, तस्या विकारः = क्षौमम् । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । द्वि० अम् । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अद्भिः प्सातम्]** अप् । तृतीया भिस् । 'अपोऽद्भे' (२।१।४) अद् । अदं (१०५९) - 'प्सांक् भक्षणे' (१०६०) प्सा । प्सायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । प्रथमा सि ।।छ।।

**व्यत्यये लुग् वा ।।१।३।५६।।**

**[व्यत्यये]** 'इंण्क् गतौ' (१०७५) इ, वि+अतिपूर्व० । व्यत्ययनं = व्यत्ययः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । तस्मिन् = व्यत्यये, 'अवर्णस्ये०' (१।२।६) ए. ।

**[लुग् वा]** लुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । वा । अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चक्षु श्च्योतति, चक्षुश्श्च्योतति, चक्षुः श्च्योतति]** चक्षुस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । चुतृ (२८१) - 'स्चुतृ क्षरणे' (२८२) स्चुत् । 'सस्य श-षौ' (१।३।६१) स० → श० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गुणः ओ । अनेन ।

**[चेत स्खलति, चेतस्स्खलति, चेतः स्खलति]** चेतस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'स्खल चलने' (४४८) स्खल् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन ।।छ।।

## अरोः सुपि रः ।।१।३।५७।।

**[अरोः सुपि रः]** न रुः = अरुः । 'नञत्' (३।२।१२५) न० → अ० । तस्य = अरोः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । सुप् सप्तमी ङि । र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[गीर्षु]** 'गॄत् निगरणे' (१३३५) गॄ । गृणातीति-(गिरतीति) । 'गॄ-पॄ-दुर्वि-धुर्विभ्यः क्विप्' (उणा० ९४३) क्विप्प्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी सुप् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः(?) । ('पदान्ते' (२।१।६४) दीर्घः) । 'नाम्यन्तस्था०' (२।३।१५) स०→ष० ।

**[धूर्षु]** 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वतीति । 'गॄ-पॄ-दुर्वि-धुर्विभ्यः क्विप्' (उणा० ९४३) क्विप्प्र० । 'राल्लुक्' (४।१।११०) वलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी सुप् । 'भ्वादेर्नामिनो०' (२।१।६४) दीर्घः(?) । ('पदान्ते' (२।१।६४) दीर्घः) । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[पयःसु, पयस्सु]** पयस् । सप्तमी सुप् । 'सो रुः' (२।१।७२) स० → र० । 'श-ष-से श-ष-सं वा' (१।३।६) र० → स० । ननु 'पयःसु' इत्यादौ 'सो रुः' (२।१।७२) इति कृते अन्तस्थाद्वारेण रेफात् परः षत्वं कथं न प्राप्नोति ? सत्यम्–नित्यत्वात्, 'रः पदान्ते०' (१।३।५३) इत्यादयो भवन्ति ।

**[अहःसु, अहस्सु]** अहन् । सप्तमी सुप् । 'अह्नः' (२।१।७४) न० → र० । 'श-ष-से श-ष-सं वा' (१।३।६) र० → स० ।।छ।।

## वाऽहर्पत्यादयः ।।१।३।५८।।

**[वाऽहर्पत्यादयः]** वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अहर्पति(ः) आदिर्येषां ते = अहर्पत्यादयः । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) इ०→ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[अहर्पतिः, अहःपतिः, अह≍पतिः]** अहन् अग्रे पति । अह्नां पतिः = अहर्पतिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'अह्नः' (२।१।७४) न० → र० । सूत्रकार्यं विकल्पेन क्रियते ।

**[गीर्पतिः, गीःपतिः, गी≍पतिः]** गिर् अग्रे पति । गिरां पतिः = गीर्पतिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० र० । 'पदान्ते' (२।१।६४) दीर्घः । सूत्रकार्यम् ।

**[धूर्पतिः, धूःपतिः, धू≍पतिः]** धुर् अग्रे पति । धुरां पतिः = धूर्पतिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घः । सूत्रकार्यम् ।

**[हे प्रचेता राजन् !, हे प्रचेतो राजन् !]** चेतस् प्रपूर्व० । प्रकृष्टं चेतो यस्याऽसौ । तस्य संबोधनं क्रियते, 'आमन्त्र्ये' (२।२।३२) सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । राजन् । 'आमन्त्र्ये' (२।२।३२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सि । 'दीर्घङ्याव्०' (१।४।४५) सिलोपः । 'रो रे लुग् दीर्घश्चाऽदिदुतः' (१।३।४१) रलोपः-अकारदीर्घः । पक्षे 'घोषवति' (१।३।२१) र० → उ० । 'अवर्णस्येο' (१।२।६) ओ ॥ छ ॥

## शिटयाद्यस्य द्वितीयो वा ॥१।३।५९॥

**[शिटयाद्यस्य द्वितीयो वा]** शिट् सप्तमी ङि । आदौ भवः = आद्यस्तस्य = आद्यस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । द्वयोः पूरणः = द्वितीयः । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । वा ।

**[ख्षीरम्, क्षीरम्]** क्षीर । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । अनेन क० → ख० क्रियते. ।

**[तछ् शोभनम्, तच् शोभनम्]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । शोभन । प्रथमा सि । 'धुटस्तृतीयः' (२।१।७२) द० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ज० → च० । अनेन च० → छ० ।

**[अफ्सराः, अप्सराः]** 'सृं गतौ' (२५) सृ, अप्पूर्व० । अद्भिः सरन्ति स्म । 'आपोऽपाप्ताप्सराव्जाश्च' (उणा० ९६४) अस्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याव्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अनेन ।

**[सत्यम्]** सत् । सतो भावः (सत्सु भवं) = सत्यम् । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० (?) । प्रथमा सि ॥ छ ॥

## तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ ॥१।३।६०॥

**[तवर्गस्य]** तकारेणोपलक्षितो वर्गस्तवर्गस्तस्य = तवर्गस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[श्चवर्ग-ष्टवर्गाभ्यां]** श्-चवर्ग । ष्-टवर्ग ।* श् च चवर्गश्च = श्चवर्ग, ष् च टवर्गश्च = ष्टवर्ग, श्चवर्ग च ष्टवर्ग च = श्चवर्गष्टवर्गे, ताभ्यां = श्चवर्गष्टवर्गाभ्यां, तृतीया भ्याम्, 'अत आ स्यादौ०' (१।४।१) अ० → आ० ।

**[योगे]** योग । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[च-टवर्गौ]** च-टवर्ग । चश्च टश्च = चटौ, चटयोर्वर्गौ = चटवर्गौ, प्रथमा औ, 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[तच् शेते]** तत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अग्रे शेते । अनेन ।

**[भवाञ् शेते]** भवान् १।३।८ सूत्रवत् । अग्रे शेते । अनेन ।

**[तच् चारु]** तत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । चारु । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अनेन ।

**[तज् झाषयति]** तद् । कष (५०७) - शिष (५०८) - जष (५०९) - 'झष हिंसायाम्' (५१०) झष् । झषन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन ।

**[याच्ञा]** 'डुयाचृग् याच्ञायाम्' (८९१) याच् । याचनं = याच्ञा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्धा' (५।३।१०१) नप्र० । 'आत्' (२।४।१८) आप् । अनेन ।

---

P. * श् च चवर्गश्च = श्चवर्गः । ष् च टवर्गश्च = ष्टवर्गः, श्चवर्गश्च ष्टवर्गश्च = श्चवर्गष्टवर्गौ, ताभ्याम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यज्ञः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजनं = यज्ञः । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० । अनेन ।

**[राज्ञः]** राजन् । पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलोपः । अनेन ।

**[पेष्टा]** 'पिष्लृंप संचूर्णने' (१४९३) पिष् । पिनष्टीति पेष्टा । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए० । अनेन ।

**[पेष्टुम्]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पेषणाय = पेष्टुम् । क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए० । अनेन ।

**[पूष्णः]** पूषन् । षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[वृष्णः]** वृषन् । षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[पूष्णा]** पूषन् । तृतीया टा । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[दोष्णा]** दोस् । तृतीया टा । 'दन्त-पाद-नासिका०' (२।१।१०१) दोषन्नादेशः । 'अनोऽस्य' (२।१।१०८) अलोपः ।

卐**[तट् टक्के]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । टक्क । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए० ।

+**[तण् णकारे]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । णकार । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० । अनेन ।

**[अड्डति]** 'अद्ड अभियोगे' (२५७) अद्ड् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द० → ड० ।

**[अट्टते]** 'अद्टि हिंसा-ऽतिक्रमयोः' (६७४) अद्ट् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द० → ड० । 'अघोषे०' (१।३।५०) ड० → ट० ।

**[ईट्टे]** 'ईडिक् स्तुतौ' (१११४) ईड् । वर्त्त० ते । अनेन त० → ट० । 'अघोषे० (१।३।५०) ड० → ट० ।

अत्र स्थान्यासन्न इति कोऽर्थः ? अत्र तवर्गस्य प्रथमस्थाने चवर्गप्रथमयोगे प्रथमो भवति, द्वितीययोगे द्वितीयः, तृतीययोगे तृतीय इत्यादि ॥ छ ॥

**सस्य श-षौ** ॥१।३।६१॥

**[सस्य श-षौ]** स । षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । शश्च षश्च = शषौ । प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[श्च्योतति]** चुतृ (२८१) - स्चुतृ (२८२) - 'स्च्युतृ क्षरणे' (२८३) स्च्युत् । अनेन स० → श० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ. ।

**[वृश्चति]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । अनेन स० → श० । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् वृ ।

·**[सज्जति]** 'षस्ज गतौ' (१३८) षस्ज् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) सस्ज् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन स० → श० । 'तृतीय० (१।३।४९) श० → ज० ।

卐 बृहद्वृत्तौ-तट् टीकते । + बृहद्वृत्तौ-तण् णकारेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सर्पिष्षु]** सर्पिस् । सप्तमी सुप् । 'सो रुः' (२।१।७२) स० → र० । 'श-ष-से श-ष-सं वा' (१।३।६) र० → स० । 'नाम्यन्तस्था०' (२।३।१५) सु० → षु० । अनेन स० → ष० ।

**[धनुष्षु]** धनुस् । सप्तमी सुप् । शेषं 'सर्पिष्षु' वत् ।

**[दोष्षु]** दोस् । सप्तमी सुप् । शेषं 'सर्पिष्षु' वत् ।

**[पापट्षि]** अट (१९४) - 'पट गतौ' (१९५) पट् । कुटिलं पटसि । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य० । 'सन्-यङश्च' (४।१।३) पट् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० सिव् । अनेन षत्वम् ।

**[बम्भण्षि]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) 'भण शब्दे' (२६४) भण् । अत्यर्थं भणसि । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य० । अग्रे (१।३।१७) सूत्रवत् साध्यः ॥ छ ॥

**न शात् ॥१।३।६२॥**

**[न शात्]** न । श पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

**[अश्नाति]** 'अशश् भोजने' (१५५८) अश् । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना० ।

**[अश्नुते]** 'अशौटि व्याप्तौ' (१३१४) अश् । वर्त्त० ते । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु ।

**[विश्नः]** 'विछत् गतौ' (१३४३) विछ् । विछनं = विश्नः । 'विच्छो नङ्' (५।३।८६) नङ्प्र० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) छ० → श० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रश्नः]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । प्रच्छनं = प्रश्नः । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) च्छ० → श० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥ छ ॥

**पदान्ताट्टवर्गादनाम्-नगरी-नवतेः ॥१।३।६३॥**

**[पदान्तात्]** पदस्य अन्तः = पदान्तः, तस्मात् = पदान्तात्, पञ्चमी ङसि, 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

**[टवर्गात्]** टकारेणोपलक्षितो वर्गष्टवर्गः, तस्मात् = टवर्गात्, पञ्चमी ङसि ।

**[अनाम्-नगरी-नवतेः]** नाम् च नगरी च नवतिश्च = नाम्नगरीनवति, न नाम्नगरीनवति अनाम्नगरीनवति, 'नञत्' (३।२।१२५) न० → अ०, तस्य = अनाम्नगरीनवतेः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[षट्तयम्]** षष् । षट् अवयवा यस्य तत् = षट्तयम् । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ड० → ट० ।

**[मधुलिड् दुनोति]** मधु 'लिहींक् आस्वादने' (११२९) लिह् । मधु लेढीति क्विप् मधुलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'धुटस्तृतीयः' (२।१।७६) ह०→ड० ?। ('हो धुट्-पदान्ते') (२।१।८२) ह० → ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'टुदुंट् उपतापे' (१२९७) दु । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र०→नु० । 'उ-श्नोः' (४।३।२) ओ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मधुलिड् धुनोति]** मधुलिड् पूर्ववत् । 'धूगट् कम्पने' (१२९१) धू । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु० । 'उ-श्नोः' (४।३।२) ओ० ।

**[षण्नयाः]** षष्-नय । षट् च ते नयाश्च = षण्नयाः । षष् । प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । नय । प्रथमा जस् । 'अत आः स्यादौ०' (१।४।१) अ० → आ० । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'तृतीयस्य पञ्चमे' (१।३।१) ड० → ण० ।

**[मधुलिट्सु]** मधुलिह् । सप्तमी सुप् । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ष-ढोः कस्सि' (२।१।६२) ढ० → क० । 'नाम्यन्तस्था०' (२।३।१५) सस्य षत्वं प्राप्नोति तन्न भवति । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'अघोषे०' (१।३।५०) ड० → ट० ।

**[चतुष्टयम्]** चतुर् । चत्वारोऽवयवा यस्य तत् । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० । 'ह्रस्वान्नाम्नस्ति' (२।३।३४) स० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[सर्पिष्ट्वम्]** सर्पिस् । सर्पिषो भावः = सर्पिष्ट्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० । 'ह्रस्वान्नाम्नस्ति' (२।३।३४) स० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[षण्णाम्]** षष् । षष्ठी आम् । 'संख्यानां र्णाम्' (१।४।३३) नाम् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'प्रत्यये च' (१।३।२) ड० → ण० । 'तवर्गस्य०' (१।३।६०) न० → ण० ।

**[षण्णगरी]** षष्-नगर । षण्णां नगराणां समाहारः = षण्णगरी । 'द्विगोः समाहारात्' (२।४।२२) ङीप्र० → ई० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'तवर्गस्य०' (१।३।६०) न० → ण० । 'तृतीयस्य पञ्चमे' (१।३।१) ड० → ण० ।

**[षण्णवतिः]** षष्-नवति । षड्भिरधिका नवतिः = षण्णवतिः ॥ छ ॥

## षि तवर्गस्य ॥१।३।६४॥

**[षि तवर्गस्य]** ष् सप्तमी ङि । तवर्ग षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[तीर्थकृत् षोडशः शान्तिः]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । तीर्यतेऽनेनेति तीर्थः । 'नी-नू-रमि-तृ-तुदि-वचि-रिचि-सिचि-श्रि-हनि-पा-गो-पा-वोद्गाभ्यः कित्' (उणा० २२७) कित् थप्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः तीर् । 'डुकृंग् करणे' (८८८) कृ । तीर्थं करोतीति तीर्थकृत् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । षष्-दशन् । षड्भिरधिका दश = षोडशः । 'एकादश-षोडश-षोडन्-षोढा-षड्ढा' (३।२।९१) षोडशः निपात्यते । षोडशानां पूरणः = षोडशः । 'प्रमाणी-संख्याड्डः' (७।३।१२८) डप्र० (?) । ('संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ०) । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । तीथकृतां षोडशः = तीर्थकृत् षोडशः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) प्राप्नोति । 'शमू उपशमे' (१२३०) शम् । शम्यादित्याशास्यमानः = शान्तिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) शा कीजइ । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**लि लौ ॥१।३।६५॥**

**[लि लौ]** ल् सप्तमी ङि । लश्च लश्च = लौ । 'स्यादावसंख्येयः' (३।१।११९) एकुशेषयइ रहावियइ । प्रथमा औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[तल् लुनाति]** तद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'लूगृश् छेदने' (१५१९) लू । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना० । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वत्वं । 'धुटस्तृतीयः' (२।१।७६) द० → द० । सूत्रकार्यम् ।

**[भवाल्ँ लुनाति]** भवान् (१।३।८) सूत्रवत् । 'लुनाति' पूर्ववत् । सूत्रकार्यम् । य-ल-वानामनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥ छ ॥

*इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ प्रथमाऽध्यायस्य तृतीयः पादः विवरणाः समाप्ताः ॥छ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

# ॥ अथ प्रथमाऽध्यायस्य चतुर्थः पादः ॥

**अत आ स्यादौ जस्-भ्याम्-ये ॥१।४।१॥**

**[अत आ]** अत् षष्ठी ङस् । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) र० → य० । 'स्वरे वा' (१।३।२४) यलोपः । आ प्रथमा सि । सूत्रत्वात् लोपः ।

**[स्यादौ]** सि(:) आदिर्यस्याऽसौ स्यादिस्तस्मिन् = स्यादौ, सप्तमी ङि, 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[जस्-भ्याम्-ये]** जस् च भ्याम् च यश्च = जस्भ्याम्यम्, तस्मिन् ।

**[वृक्षाः]** वृक्ष । प्रथमा जस् । अनेन अ० → आ० । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[आभ्याम्]** इदम् । तृतीया भ्याम् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अनक्' (२।१।३६) इद० → अ० । अनेन ।

**[श्रमणाय]** श्रमण । चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङे० → य० । अनेन ।

**[बाणजः]** 'जसूच् मोक्षणे' (१२२३) जस्, बाणपूर्व० । बाणान् जस्यतीति क्विप् बाणजः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

बाणसंबंधि अकारस्य अनेन आत्वं तदा प्राप्नोति यदा स्यादेर्जस् स्यात्, अत्र धातुसत्को जस् विद्यते ॥छ॥

**भिस ऐस ॥१।४।२॥**

**[भिस ऐस्]** भिस् । षष्ठी ङस् । ऐस् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य० । 'स्वरे वा' (१।३।२४) यलोपः ।

**[अतिजरसैः]** जरा अतिपूर्व० । जरामतिक्रान्तानि यानि कुलानि तानि = अतिजरांसि, तैः = अतिजरसैः । यो यमाश्रित्य समुत्पद्यते स तस्य न बाधक इति सन्निपातलक्षणो विधिरनित्यः । 'प्रथमोक्तं प्राक्' (३।१।१४८) अतिपूर्व० । 'क्लीबे' (२।४।९७) ह्रस्वत्वं । तृतीया भिस् । अनेन भिस्० → ऐस्० । 'जराया जरस् वा' (२।१।३) जरस् क्रियते ।

**[चैत्रभिस्सा]** चैत्रस्य भिस्सा = ओदनः ।

**[ओदनभिस्सटा]** ओदनस्य भिस्सटा = दग्धिका ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### इदमदसोऽक्येव ॥१।४।३॥

**[इदमदसः]** इदम् च अदस् च = इदमदस्, तस्य = इदमदसः ।

**[अकि]** अक् सप्तमी ङि ।

**[एव]** एव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[इमकैः]** इदम् । कुत्सितैरल्पैरज्ञातैर्वा एभिरिमकैः । 'लोकात्' (१।१।३) अम् विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । तृतीया भिस् । 'आ द्वेरः' (२।१।४१) मकारस्याऽकारः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'दो मः स्यादौ' (२।१।३९) द० → म० । अनेन. ऐस् ।

**[अमुकैः]** अदस् । कुत्सितैरल्पैरज्ञातैर्वा अमीभिरमुकैः । 'लोकात्' (१।१।३) अस् विश्लेषियइ । तृतीया भिस् । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । 'आ द्वेरः' (२।१।४१) सकारस्याऽकारः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द०→म० । 'मादुवर्णोऽनु' (२।१।४७) अकारस्य उकारु । अनेन ऐस् ।

**[एभिः]** इदम् । तृतीया भिस् । 'अनक्' (२।१।३६) अ० । 'एद् बहुस्भोसि' (१।४।४) अ० → ए० ।

**[अमीभिः]** अदस् । तृतीया भिस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'एद् बहुस्भोसि' (१।४।४) अ० → ए० । 'बहुष्वेरीः' (२।१।४९) ए० → ई० ॥छ॥

### एद् बहुस्भोसि ॥१।४।४॥

**[एद् बहुस्भोसि]** एत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । धुटस्तृतीयः (२।१।७६) त० → द० । स् च भ् च = स्भौ, बहुत्वे स्भौ = बहुस्भौ, बहुस्भौ च ओस् च = बहुस्भोस्, तस्मिन् । बह्वर्थविषयिणी स्यादिसकारादि-भकारादि ।

**[एषु]** इदम् । सप्तमी सुप् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अनक्' (२।१।३६) इद० → अ० । अनेन ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[एषाम्]** इदम् । षष्ठी आम् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'अनक्' (२।१।३६) इद० → अ० । अनेन ए. । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[अमीषाम्]** अदस् । षष्ठी आम् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । अवर्णस्याऽऽमः साम् (१।४।१५) साम् । अनेन ए. । 'बहुष्वेरीः' (२।१।४९) ए० → ई० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[सर्वेषाम्]** सर्व । षष्ठी आम् । 'अवर्णस्याऽऽमः साम्' (१।४।१५) साम् । अनेन ए० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[एभिः]** इदम् । तृतीया भिस् । 'अनक्' (२।१।३६) अ० । अनेन ए० ।

**[एभ्यः]** इदम् । चतुर्थीबहु० भ्यस् । 'अनक्' (२।१।३६) अ० । अनेन ए. ।

**[अग्न्योः]** अग्नि । षष्ठीद्विवचनं ओस् । 'इवर्णादि०' (१।२।२१) य० ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**टा-ङसोरिन-स्यौ** ।।१।४।५।।

**[टा-ङसोरिन-स्यौ]*** टाश्च ङस् च = टाङसी, तयोः = टाङसोः । इनश्च स्यश्च = इनस्यौ, प्रथमा औ, 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[वृक्षेण]** वृक्ष । तृतीया टा । अनेन टा० → इन० । 'अवर्णस्ये०' (१।२।६) ए० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[वृक्षस्य]** वृक्ष । षष्ठी ङस् । अनेन ङस्० → स्य० ।।छ।।

**ङे-ङस्योर्याऽऽतौ** ।।१।४।६।।

**[ङे-ङस्योर्याऽऽतौ]** ङेश्च ङसि च = ङेङसी, तयोः = ङेङस्योः । यश्च आच्च = याऽऽतौ ।

**[अतिजराय]** जरा अतिपूर्व० । जरामतिक्रान्तं यत् कुलं तत् = अतिजरम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मै = अतिजराय ।

**[अतिजरात्]** जरा अतिपूर्व० । जरामतिक्रान्तं यत् कुलं तत् अतिजरम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् = अतिजरात् ।।छ।।

**सर्वादेः स्मै-स्मातौ** ।।१।४।७।।

**[सर्वादेः]** सर्व आदिर्यस्याऽसौ सर्वादिस्तस्य = सर्वादेः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[स्मै-स्मातौ]** स्मैश्च स्माच्च = स्मैस्मातौ ।

**[सर्वस्मै]** सर्व । चतुर्थी ङे । अनेन स्मै ।

**[परमसर्वस्मै]** परम-सर्व । परमश्चासौ सर्वश्च = परमसर्वस्तस्मै = परमसर्वस्मै । चतुर्थी ङे । अनेन स्मै ।

**[सर्वस्मात्]** सर्व । पञ्चमी ङसि । अनेन स्मात् ।

**[परमसर्वस्मात्]** परम-सर्व । परमश्चासौ सर्वश्च = परमसर्वस्तस्मात् = परमसर्वस्मात् । पञ्चमी ङसि । अनेन स्मात् ।

**[असर्वस्मै]** न सर्वः = असर्वस्तस्मै = असर्वस्मै ।

**[किंसर्वस्मै]** कुत्सितः सर्वः = किंसर्वस्तस्मै = किंसर्वस्मै ।

**[अन्यतमाय]** अन्य । प्रकृष्टोऽन्यः = अन्यतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । तस्मै = अन्यतमाय ।

**[कतरस्मै]** किम् । द्वयोर्मध्ये कः = कतरः । 'यत्-तत् किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । तस्मै = कतरस्मै ।

**[कतमस्मै]** बहूनां मध्ये कः = कतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । तस्मै = कतमस्मै ।

**[यतरस्मै]** द्वयोर्मध्ये यः = यतरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । तस्मै = यतरस्मै ।

**[यतमस्मै]** बहूनां मध्ये यः = यतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । तस्मै =

P. * टा च ङस् च = टाङसौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतमस्मै ।

[ततरस्मै] द्वयोर्मध्ये प्रकृष्टः सः = ततरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० —> अतर । तस्मै = ततरस्मै ।

[ततमस्मै] वहूनां मध्ये प्रकृष्टः सः = ततमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० —> अतम । तस्मै = ततमस्मै ।

[युवकाभ्याम्] युष्मद् लिख्यते । कुत्सिताभ्यां अन्यताभ्यां युवाभ्यां = युवकाभ्यां । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् । तृतीया भ्याम् । 'आ द्वेरः' (२।१।४१) द० —> अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'युष्मदस्मदोः' (२।१।६) द० —> आ० ।

[युष्मादृशः] युष्मद् 'दृशृं प्रेक्षणे' (४९५) दृश् । युष्मानिव दृश्यते = युष्मादृशः । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च' (५।१।१५२) टक्प्र० । 'अन्य-त्यदादेराः' (३।२।१५२) आ० ।

[भवकान्] कुत्सितोऽन्यतो वा भवान् = भवकान् । 'लोकात्' (१।१।३) अत् विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् ।

[भवादृशः] भवत् 'दृशृं प्रेक्षणे' (४९५) दृश् । भवानिव दृश्यते = भवादृशः । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) टक्प्र० । 'अन्य-त्यदादेराः' (३।२।१५२) आ. ।

[भवद्रयङ्] भवत् 'अञ्चू गतौ च' (१०५) अञ्च् । भवन्तमञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'सर्वादि-विष्वग्-देवाड्डदिः क्व्यञ्चौ' (३।२।१२२) डद्रिरागमः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अल्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमा सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः ।

[त्र्यन्याय] त्रीण्यन्यान्यस्याऽसौ = त्र्यन्यस्तस्मै = त्र्यन्याय ॥छ॥

**ङेः स्मिन्** ॥१।४।८॥

[ङेः] ङि । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) इ० —> ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[स्मिन्] स्मिन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[सर्वस्मिन्] सर्व । सप्तमी ङि । अनेन स्मिन् ।

[प्रियसर्वे] प्रियाः सर्वे यस्याऽसौ = प्रियसर्वस्तस्मिन् ।

[अतिविश्वे] विश्वमतिक्रान्तोऽसौ = अतिविश्वस्तस्मिन् ॥छ॥

**जस इः** ॥१।४।९॥

[जस इः] जस् । षष्ठी ङस् । 'सो रुः' (२।१।७२) स० —> र० । 'रोर्यः' (१।३।२६) र० —> य० । 'स्वरे वा' (१।३।२४) यलोपः । इ । प्रथमा सि । 'सो रुः' (२।१।७२) स० —> र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[सर्वे] सर्व । प्रथमा जस् । अनेन इ । 'अवर्णस्ये०' (१।२।६) ए. ।

[प्रियसर्वाः पुमांसः] प्रियाः सर्वे येषां ते = प्रियसर्वाः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नेमा-ऽर्ध-प्रथम-चरम-तया-ऽया-ऽल्प-कतिपयस्य वा ।।१।४।१०।।**

**[नेमाऽर्धप्रथमचरमतयाऽयाऽल्पकतिपयस्य]** नेमश्च अर्धश्च प्रथमश्च चरमश्च तयश्च अयश्च अल्पश्च कतिपयश्च = नेमाऽर्धप्रथमचरमतयाऽयाऽल्पकतिपयम्, तस्य ।

**[वा]** वा अव्यउ ।

**[द्वितये, द्वितयाः]** द्वि । द्वौ अवयवौ येषां ते = द्वितये - द्वितयाः । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय० । प्रथमा जस् ।

**[त्रितये, त्रितयाः]** त्रि । त्रयोऽवयवा येषां ते = त्रितये-त्रितयाः । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय० । प्रथमा जस् ।

**[द्वये, द्वयाः]** द्वि । द्वौ अवयवा(वौ) येषां ते = द्वये-द्वयाः । 'द्वि-त्रिभ्यामयट् वा' (७।१।१५२) अयट्प्र० → अय० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा जस् ।

**[त्रये, त्रयाः]** त्रि । त्रयोऽवयवा येषां ते = त्रये-त्रयाः । 'द्वि-त्रिभ्यामयट् वा' (७।१।१५२) अयट्प्र० → अय० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा जस् ।

**[अल्पे, अल्पाः]** 'अली भूषण-पर्याप्ति-वारणेषु' (९१९) अल् । अलते = भूषयति स्तो(स्तो)कतामित्यल्पं । 'भा-पा-चणि-चमि-विषि-सृ-पृ-तृ-शी-तल्यलि-शमि-रमि-वपिभ्यः पः' (उणा० २९६) पप्र० । प्रथमा जस् ।

**[कतिपये, कतिपयाः]** अयि (७९०) - वयि (७९१) - 'पयि गतौ' (७९२) पय्, कतिपूर्व० । कति पयन्ते = कतिपये-कतिपयाः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० । प्रथमा जस् ।

**[परमनेमे, परमनेमाः]** परम-नेम । परमाश्च ते नेमे च = परमनेमे – परमनेमाः । सर्वत्र अनेन इर्वा ।

**[अतिनेमाः]** नेममतिक्रान्तास्तेऽतिनेमाः ।

**[अर्धकाः]** अर्धा एव = अर्धकाः । स्वार्थे कप्र० ।

विभाषेति व्यवस्थितं मर्यादानतिक्रान्तं प्रयोगजातं विशेषेण भाषते ।।छ।।

**द्वन्द्वे वा ।।१।४।११।।**

**[द्वन्द्वे]** द्वि मांडणीयइ । द्वे द्वे = द्वन्द्वं । 'द्वन्द्वं वा' (७।४।८२) द्वन्द्वं निपात्यते, तस्मिन् ।

**[वा]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पूर्वोत्तरे, पूर्वोत्तराः]** पूर्वे च उत्तरे च = पूर्वोत्तरे-पूर्वोत्तराः ।

**[कतरकतमे, कतरकतमाः]** कतरे च कतमे च = कतरकतमे-कतरकतमाः ।

**[दन्तकतमे, दन्तकतमाः]** दन्ताश्च कतमे च = दन्तकतमे-दन्तकतमाः ।

**[परमकतरकतमे, परमकतरकतमाः]** कतरे च कतमे च = कतरकतमे । परमाश्च ते कतरकतमे च = परमकतरकतमे-परमकतरकतमाः ।

**[प्रियकतरकतमाः]** प्रियाः कतरकतमे येषां ते = प्रियकतरकतमाः ।

**[वस्त्रान्तर-वसनान्तराः]** वस्त्रमन्तरं येषां ते, वसनमन्तरं येषां ते, वस्त्रान्तराश्च वसनान्तराश्च = वस्त्रान्तर-वसनान्तराः । उष्यतेऽस्मिन्निति वसनं = गृहं-वस्त्रवाचकत्वे हि समानार्थे हि एकशेषः स्यात् । अथवा अन्तर् शब्द एकत्र बहिर्योगो(गे)ऽन्यत्र च उपसंख्याने इत्यनयोर्भेदः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## न सर्वादिः ॥१।४।१२॥

**[न सर्वादिः]** न प्रथमा सि । सर्व । आदि । सर्व आदिर्यस्याऽसौ सर्वादिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पूर्वाऽपराय, पूर्वाऽपरात्, पूर्वाऽपरे]*** पूर्वा च अपरा च = पूर्वापरम् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावस्तस्मै = पूर्वाऽपराय, तस्मात् = पूर्वाऽपरात्, तस्मिन् = पूर्वाऽपरे । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै-स्मात्, 'ङेः स्मिन्' (१।४।८) स्मिन् प्राप्नोति परं न भवति ।

**[कतरकतमानाम्]** किम् । द्वयोर्मध्ये प्रकृष्टाः के = कतरे । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लोपः । बहूनां मध्ये प्रकृष्टाः के = कतमे । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । कतरे च कतमे च = कतरकतमे, तेषां = कतरकतमानाम् । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'दीर्घो नाम्यतिसृच-तसृ-षः' (१।४।४७) दीर्घः ।

**[दक्षिणोत्तरपूर्वाणाम्]** दक्षिणा च उत्तरा च । 'लघ्वक्षरा-ऽसखीदुत्-स्वराद्यदल्पस्वरा-ऽर्च्यमेकम्' (३।१।१६०) इति सूत्रेण पूर्वनिपातो न भवति, 'धर्मार्थादिषु द्वन्द्वे' (३।१।१५९) इति गणपाठात् । पूर्वा च दक्षिणोत्तरा च = दक्षिणोत्तरपूर्वास्तेषाम् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् ।

**[कतरकतमकाः]**卐 कतरकतमा एव = कतरकतमकाः । 'यावादिभ्यः कः' (७।३।१५) कप्र० । प्रथमा जस् ॥छ॥

## तृतीयान्तात् पूर्वा-ऽवरं योगे ॥१।४।१३॥

**[तृतीयान्तात्]**+ तृतीय अन्तो यस्मात् तत् तृतीयान्तं, तस्मात् । अन्तः शब्दपर्यंतवाचको विनाशवाचकश्च तेन तृतीया अन्त मांडी०

**[पूर्वा-ऽवरं]** पूर्व । अवर । पूर्वश्च अवरश्च = पूर्वाऽवरं । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) अनुस्वारः । 'अश्वबडव-पूर्वापरा-ऽधरोत्तराः' (३।१।१३१) इति पूर्वशब्दस्याऽपरेण स्वेन समाहृतिर्भणिष्यत इति सूत्रत्वात् समाहारः, कर्मधारयो वा पूर्वावयवयोगादिति ।

**[योगे]** योग सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । योग एकार्थीभावो व्यपेक्षा चोभयं गृह्यते ।

**[मासेन पूर्वाय, मासपूर्वाय]** मास । पूर्व । मासेन पूर्वो = मासपूर्वस्तस्मै = मासपूर्वाय, चतुर्थी ङे । अनेन ।

**[मासेनावराः, मासावराः]** मास । तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्ये०' (१।२।६) ए. । अवर । प्रथमा जस् । अनेन ।

**[पूर्वस्मै मासेन]** पूर्व । चतुर्थी ङे । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै । मास । तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्ये०' (१।२।६) ए. ।

**[मासपरस्मै]** 'मांक् माने' (१०७३) मा । मीयते = परिच्छिद्यते इति मासः । 'मा-वा-वद्यमि-कमि-हनि-मानि-कष्यशि-पचि-मुचि-यजि-वृ-तृभ्यः सः' । (उणा० ५६४) सप्र० । मासेन परो = मासपरस्तस्मै ।

---

P. * पूर्वश्च अपरश्च = पूर्वाऽपरम् ।

P. **[कतरकतमकाः]**卐 कतर-कतम । कतरे च कतमे च = कतरकतमे । कुत्सिता-अल्पा-अज्ञाता वा कतरकतमे = कतरकतमा(मकाः) । 'प्राग् नित्यात् कप्' (७।३।२८) कप्प्र० → क । प्रथमा जस् ॥ अनेन. ॥

P. **[तृतीयान्तात्]**+ तृतीया । अन्त । तृतीया अन्ते यस्याऽसौ तृतीयान्तः, तस्मात् = तृतीयान्तात् । पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । 'समानानां तेन दीर्घः (१।२।१) दीर्घः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योग इति किम् ? **केचित्तु पूर्वाय** मासेनेत्यपि उदाहरन्ते, तन्मतसंग्रहार्थं योगग्रहणं,तदा पूर्वदिग्योगे पञ्चमी ॥छ॥

**तीयं ङित्कार्ये वा ॥१।४।१४॥**

**[तीयं]** तीय प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[ङित्कार्ये वा]** ङ् इत् अनुबन्धो येषां ते = ङितः । ङितां कार्यं = ङित्कार्यं, तस्मिन् = ङित्कार्ये । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. । वा. ।

**[द्वितीयस्मै, द्वितीयाय]** द्वि । द्वयोः पूरणः = द्वितीयः । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । चतुर्थी ङे । अनेन ।

**[द्वितीयस्यै, द्वितीयायै]** द्वि । द्वयोः पूरणी = द्वितीया । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । चतुर्थी ङे । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यै । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्पूर्व० यै । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । अनेन ।

**[तृतीयस्मै, तृतीयाय]** त्रि । त्रयाणां पूरणी(णः) = तृतीया(यः) । 'त्रेस्तृ च' (७।१।१६६) तीयप्र० - त्रि० → तृ आदेशः । चतुर्थी ङे । अनेन ।

**[द्वितीयकाय]** द्वितीयः पूर्ववत् । कुत्सितोऽल्पोऽज्ञातो वा द्वितीय = द्वितीयकः । 'प्राग् नित्यात् कप्' (७।३।२८) कप्प्र० → क० । चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) य । 'अत आः स्यादौ जस्-भ्याम्-ये' (१।४।१) अ० → आ० ।

**[तृतीयकाय]** कुत्सितोऽल्पोऽज्ञातो वा तृतीयः = तृतीयकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क. । चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) य । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) अ० → आ० ।

**[द्वितीयिकायै]** कुत्सिता-अल्पा-अज्ञाता वा द्वितीया = द्वितीयिका । 'स्व-ज्ञा-ऽज-भस्त्राऽधातुत्ययकात्' (२।४।१०८) इत्यादिना इत्वं विकल्पे, पक्षे 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वत्वम् ।

**[पटुजातीयाय]** पटु मांडियइ । पटुः प्रकारोऽस्य = पटुजातीयः । अत्र तीय इति समुदायसार्थकं परं लाक्षणिकत्वात् न भवति । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय भवति ।

**[मुखतीयाय]** मुख मांडियइ. । मुखात् = मुखतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । मुखतो भवः = मुखतीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः ॥

**[पार्श्वतीयाय]** पार्श्वात् = पार्श्वतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । पार्श्वतो भवः = पार्श्वतीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः ॥छ॥

**अवर्णस्याऽऽमः साम् ॥१।४।१५॥**

**[अवर्णस्याऽऽमः साम्]** अवर्ण षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । आम् षष्ठी ङस् । साम् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । परस्पराद्यामः स्थाने सामादेशे तत्रैव सामादेश एवोच्यत, परोक्षादेशस्तु आम् धातोर्विधीयमानः सर्वादेर्न भवति, 'कर्तुः क्विप्०' (३।४।२५) इति क्विप्प्रत्ययान्ततायां संभवेऽपि स्यादेरित्यधिकारान्निरस्यत इत्याह-षष्ठी आम् ।

**[सर्वेषाम्]** सर्व । षष्ठी आम् । अनेन साम् । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[विश्वेषाम्]** विश्व । षष्ठी आम् । अनेन साम् । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[सर्वासाम्]** सर्व । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । षष्ठी आम् । अनेन साम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[विश्वासाम्]** विश्व । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । षष्ठी आम् । अनेन साम् ।

**[परमसर्वासाम्]** परमाश्च ते सर्वाश्च = परमसर्वास्तासाम् ।।

**[द्वयानाम्]** द्वय । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् ।

**[द्वितयानाम्]** द्वितय पूर्ववत् ज्ञेयः । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् ।

**[प्रियसर्वाणाम्]** प्रियाः सर्वे येषां ते = प्रियसर्वे, तेषाम् ।।छ।।

**नवभ्यः पूर्वेभ्य इ-स्मात्-स्मिन् वा ।।१।४।१६।।**

**[नवभ्यः]** नवन् । पञ्चमी भ्यस् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'सो रुः' (२।१।७२) स० → र० ।

**[पूर्वेभ्यः]** पूर्व । पञ्चमी भ्यस् । 'एद् बहुस्भोसि' (१।४।४) ए । 'सो रुः' (२।१।७२) स० → र० ।

**[इ-स्मात्-स्मिन् वा]** इश्च स्माच्च स्मिन् च = इस्मात्स्मिन्, * प्रथमा जस् । सूत्रत्वात् लोपः । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पूर्वे, पूर्वाः]** पूर्व । प्रथमा जस् । अनेन ।

**[पूर्वस्मात्, पूर्वात्]** पूर्व । पञ्चमी ङसि । अनेन ।

**[पूर्वस्मिन्, पूर्वे]** पूर्व । सप्तमी ङि । अनेन ।

**[त्ये]** त्यद् । प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादे०' (२।१।११३) अलोपः । 'जस इः' (१।४।९) इ.। 'अवर्णस्ये०' (१।२।६) ए. ।।छ।।

**आपो ङितां यै-यास्-यास्-याम् ।।१।४।१७।।**

**[आपः]** आप् षष्ठी ङस् ।

**[ङिताम्]** ङ् इत् अनुबन्धो येषां ते = ङितस्तेषां = ङितां, षष्ठी आम् ।

**[यै-यास्-यास्-याम्]** यैश्च यास् च यास् च याम् च = यैयास्यास्याम् । 卐 प्रथमा जस् । सूत्रत्वात् लोपः ।

**[खट्वायै]** खट्व । 'आत्' (२।४।१८) आप् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । चतुर्थी ङे । अनेन ।

**[खट्वायाः]** खट्वा पूर्ववत् । पञ्चमी ङसि । अनेन ।

**[खट्वायाः]** खट्वा पूर्ववत् । षष्ठी ङस् । अनेन ।

**[खट्वायाम्]** खट्वा पूर्ववत् । सप्तमी ङि । अनेन ।

**[बहुराजायै, बहुराजायाः, बहुराजायाः, बहुराजायाम्]** राजन् 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु पूर्वं हिंया लीयइ । बहवो राजानो यस्यां सा = बहुराजा, तस्यै-तस्याः(२) - तस्यां । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डिद् आपप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन ।

**[कारीषगन्ध्यायै, कारीषगन्ध्यायाः, कारीषगन्ध्यायाः, कारीषगन्ध्यायाम्]** 'कृत् विक्षेपे' (१३३४) कृ । कीर्यते वायुनेति करीषम् । 'कृ-तृभ्यामीषः' (उणा० ५५३) ईषप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । करीषस्येव गन्धो यस्य । 'वोपमानात्' (७।३।१४७) इत्समासान्तः । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । करीषगन्धेरपत्यं वृद्धं स्त्रीति । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अनार्षे वृद्धेऽणिञो बहुस्वर-

---

P. * प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । P. 卐 प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुपान्त्यस्याऽन्तस्य ष्यः' (२।४।७८) ष्य । 'आत्' (२।४।१८) आप् । तस्यै-तस्याः-तस्याः-तस्याम् । अनेन ।

**[कीलालपे]** कीलाल 'पां पाने' (२) पा । कीलालं पिबतीति । 'मन्-वन्-क्वनिप्-विच्०' (५।१।१४७) विच्प्र० । तस्मै = कीलालपे । चतुर्थी ङे । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।।छ।।

**सर्वादेर्डस्पूर्वाः** ।।१।४।१८।।

**[सर्वादेः]** सर्व । आदि । सर्व आदिर्यस्याऽसौ सर्वादिस्तस्य = सर्वादेः, षष्ठी ङस्, 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[डस्पूर्वाः]**卐 डस् पूर्वो येषां ते = डस्पूर्वाः । प्रथमा जस् । 'अत आ स्यादौ जस्०' (१।४।१) अ० → आ० ।

**[सर्वस्यै, सर्वस्याः, सर्वस्याः सर्वस्याम्]** सर्व ४ । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । चतुर्थी ङे, पञ्चमी ङसि, षष्ठी ङस्, सप्तमी ङि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) इत्यादिना यै-यास्-यास्-याम् । अनेन डस्पूर्व० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[परमसर्वस्यै, परमसर्वस्याः, परमसर्वस्याः, परमसर्वस्याम्]** परमा चासौ सर्वा च = परमसर्वा, तस्यै, तस्याः(२), तस्याम् ।

**[अस्यै, अस्याः, अस्याः, अस्याम्]** इदम् । ङे-ङसि-ङस्-ङि । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अनक्' (२।१।३६) इद० → अ । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यै-यास्-यास्-याम् । अनेन डस्पूर्व० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः ।

**[प्रियसर्वायै]** प्रियः सर्वो यस्याः सा = प्रियसर्वा, तस्यै = प्रियसर्वायै । 'आत्' (२।४।१८) आप् । चतुर्थी ङे ।

**[अतिसर्वायै]** सर्वमतिक्रान्ता यया सा = अतिसर्वा, तस्यै = अतिसर्वायै ।

**[त्वकत्पितृकः]** युष्मद् । त्वकं पिता यस्याऽसौ त्वकत्पितृकः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वाऽऽदेशः । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क० ।

**[मकत्पितृकः]** अस्मद् । अहकं पिता यस्याऽसौ मकत्पितृकः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) माऽऽदेशः । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क० ।

**[द्वकिपुत्रः]** द्वि अग्रे पुत्र । द्वयोः कुत्सितयोः पुत्रः = द्वकिपुत्रः । 'लोकात्' (१।१।३) इ अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

**[ककिंसब्रह्मचारी]** कुत्सितः सब्रह्मचारी = ककिंसब्रह्मचारी । 'लोकात्' (१।१।३) इम् विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।।छ।।

**टौस्येत्** ।।१।४।१९।।

**[टौस्येत्]** टा । ओस् । टाश्च ओस् च = टौस्, तस्मिन् = टौसि, सप्तमी ङि । एत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[बहुराजया]** बहु-राजन् । बहवो राजानो यस्यां सा = बहुराजा । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु पूर्वं हिंया

P. 卐 डस् पूर्वो येभ्यस्ते = डस्पूर्वाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीयइ । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डिद् आप्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । तेन = बहुराजया, तृतीया टा । अनेन ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[बहुराजयोः]** बहु-राजन् । बहवो राजानो ययोस्ते = बहुराजे । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु पूर्वं हिंया लीयइ । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डिद् आप्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । तयोर्बहुराजयोः, सप्तमी ओस् । अनेन ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[कारीषगन्ध्यया]** कारीषगन्ध्या (१।४।१७) सूत्रवत् ज्ञेया, तया. ।

**[कारीषगन्ध्ययोः]** कारीषगन्ध्या (१।४।१७) सूत्रवत् ज्ञेया, तयोः ।

**[कीलालपा ब्राह्मणेन]** 'पां पाने' (२) पा, कीलालपूर्व० । कीलालं = मद्यं पिबतीति कीलालपाः । 'मन्-वन्-क्वनिप्-विच्०' (५।१।१४७) विच् । तेन, तृतीया टा । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[बहुखट्वेन पुरुषेण]** बह्व्यः खट्वा यस्याऽसौ बहुखट्व(ः) । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वस्तेन, तृतीया टा ।।छ।।

## औता ।।१।४।२०।।

**[औता]** औत् तृतीया टा. ।

**[माले तिष्ठतः]** माला । प्रथमा-द्वि० औ । अनेन ए । 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था. । 'निमित्ताऽभावे नैमित्तिकस्याऽप्यभावः' (न्याय. १।२९) स्था । वर्त्त० तस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) तिष्ठ आदेशः ।

**[बहुराजे २ नगर्यौ]** बहवो राजानो ययोस्ते = बहुराजे । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु पूर्वं हिंया लीयइ. । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डाप्प्र० → आ । औ । अनेन ए ।

**[कीलालपौ पुरुषौ]** कीलालं पिबतः इति कीलालपौ । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । प्रथमा औ । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[बहुखट्वौ पुरुषौ]** बह्व्यः खट्वा ययोस्तौ = बहुखट्वौ । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । प्रथमा औ ।।छ।।

## इदुतोऽस्त्रेरीदूत् ।।१।४।२१।।

**[इदुतः]** इत्-उत् । इच्च उच्च = इदुत्, तस्य = इदुतः, षष्ठी ङस् । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

**[अस्त्रेरीदूत्]** न स्त्री = अस्त्री, तस्याः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । ईच्च ऊच्च = ईदूत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[मुनी तिष्ठतः पश्य वा]** मुनि प्रथमा - द्वि० औ । अनेन ।

**[साधू तिष्ठतः पश्य वा]** साधु प्रथमा - द्वि० औ । अनेन ।

**[सख्यौ]** सखि । सप्तमी ङि । 'केवलसखिपतेरौ' (१।४।२६) ङि → औ ।

**[पत्यौ]** पति । सप्तमी ङि । 'केवलसखिपतेरौ' (१।४।२६) ङि → औ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अतिस्त्रियौ पुरुषौ]** स्त्रियमतिक्रान्तौ यौ = अतिस्त्रियौ । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । प्रथमाद्विव० औ । 'स्त्रियाः' (२।१।५४) इय् ।

**[अतिस्त्रयः]** स्त्रीमतिक्रान्तास्ते ।

**[सहस्त्रयस्तिष्ठन्ति]** सह स्त्रीभिर्वर्त्तते । 'ऋन्नित्यदितः' (७।३।१७१) कच् प्राप्नोति, 'सहात् तुल्ययोगे' (७।३।१७८) इति निषेधः । सह स्त्रीः (स्त्री) येषां ते । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'जस्येदोत्' (१।४।२२) ए. ।

**[अतिस्त्रये]** स्त्रीमतिक्रान्तोऽतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मै ।

**[अतिस्त्रेः]** स्त्रीमतिक्रान्तोऽतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मात् ।

**[अतिस्त्रीणाम्]** स्त्रीमतिक्रान्तोऽतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तेषाम् ।

**[अतिस्त्रौ निधेहि]** स्त्रीमतिक्रान्तोऽतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मिन् । 'डुधांग्क् धारणे च' (११३९) धा, निपूर्व० । पञ्चमी हि । 'हौ दः' (४।१।३१) आ० → ए० ।।छ।।

**जस्येदोत्** ।।१।४।२२।।

**[जस्येदोत्]** जस् सप्तमी ङि । एत् - ओत् । एच्च ओच्च = एदोत्, 卐 प्रथमा औ । सूत्रत्वात् लोपः ।

**[मुनयः]** मुनि । प्रथमा जस् । अनेन ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[साधवः]** साधु । प्रथमा जस् । अनेन ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[अतिस्त्रयः]** स्त्रीमतिक्रान्ताः तेऽतिस्त्रयः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । प्रथमा जस् । अनेन ए. ।।छ।।

**ङित्यदिति** ।।१।४।२३।।

**[ङित्यदिति]** ङ् इत् अनुबन्धो यस्याऽसौ ङित्, तस्मिन् = ङिति, सप्तमी ङि । द् इत् अनुवन्धो यस्याऽसौ दित्, न दित् = अदित् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अदिति, सप्तमी ङि ।

**[अतिस्त्रये]** स्त्रियमतिक्रान्तो योऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मै = अतिस्त्रये, चतुर्थी ङे, अनेन ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[साधोः]** साधु । पञ्चमी ङसि - अथवा षष्ठी ङस् । अनेन ओ. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अतिस्त्रेः आगतं स्वं वा]** स्त्रियमतिक्रान्तो योऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मात्, पञ्चमी ङसि, अथवा तस्य, षष्ठी ङस् = अतिस्त्रेः । अनेन ए । 'एदोद्भ्यां०' (१।४।३५) र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । आगत । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । स्व । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[बुद्ध्याः]** बुद्धि । पञ्चमी ङसि । 'स्त्रिया ङितां वा दै-दास्-दास्-दाम्' (१।४।२८) ङसि० → दास् → आस् । अनेन एत्वं न भवति, पश्चात् 'इवर्णादेरस्वे०' (१।२।२१) इत्यादिना य् ।

***[धेन्वाः आगतं स्वं वा]*** धेनु । पञ्चमी ङसि-अथवा षष्ठी ङस् । 'स्त्रिया ङितां वा दै-दास्-दास्-दाम्' (१।४।२८) ङसि-ङस्० → दास् → आस् । अनेन ओत्वं न भवति, पश्चात् 'इवर्णादेरस्वे०' (१।२।२१) व्. ।

P. 卐 प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । 'धुटस्तृतीयः' (२।१।७३) त० → द० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शुची]** शुचि । 'इतोऽक्त्यर्थात्' (२।४।३२) ङीप्र० → ई. ।

**[पट्वी]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङीप्र० → ई ॥छ॥

**टः पुंसि ना ॥१।४।२४॥**

[टः] टा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[पुंसि]** पुम्स् सप्तमी ङि । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

[ना] ना प्रथमा सि । 卐 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[अतिस्त्रिणा]** स्त्री अतिपूर्व० । स्त्रियमतिक्रान्तो योऽसौ अतिस्त्रिस्तेन = अतिस्त्रिणा । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं । अनेन ना । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) न० → ण० ।

**[अमुना]** अदस् । तृतीया टा । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'प्रागिनात्' (२।१।४८) अ० → उ० । अनेन ना. ।

**[बुद्ध्या]** बुद्धि । तृतीया टा । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[धेन्वा]** धेनु । तृतीया टा । 'इवर्णादेरस्वे०' (१।२।२१) वत्वम् ॥छ॥

**ङिर्डौ ॥१।४।२५॥**

**[ङिर्डौ]** ङि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । डौ प्रथमा सि । सूत्रत्वात् लोपः ।

**[मुनौ]** मुनि । सप्तमी ङि । अनेन डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[साधौ]** साधु । सप्तमी ङि । अनेन डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः ।

**[अतिस्त्रौ]** स्त्रियमतिक्रान्तो योऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्मिन् = अतिस्त्रौ, सप्तमी ङि । अनेन डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[बुद्ध्याम्]** बुद्धि । सप्तमी ङि । 'स्त्रिया ङितां वा दै-दास्-दास्-दाम्' (१।४।२८) ङि → दाम् → आम् । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[धेन्वाम्]** धेनु । सप्तमी ङि । 'स्त्रिया ङितां वा दै-दास्-दास्-दाम्' (१।४।२८) ङि → दाम् → आम् । 'इवर्णादेरस्वे०' (१।२।२१) वत्वम् ।

ननु दाम्करणसामर्थ्यादेव डौर्न स्यात्, किं व्यावृत्तावदितीति दर्शनेन ? न 'ङित्यदिति' (१।४।२३) इत्येत्वनिषेधकत्वेन तस्य चरितार्थत्वाद् डौः स्यादिति व्यावृत्तिः सफला, यथा 'इश्च स्था-दः' (४।३।४१) इत्यत्र सिच्लोपविधायकत्वेन ह्रस्वकरणस्य चरितार्थत्वे गुणबाधकं कित्करणम्, किञ्च, यथासंख्यार्थं 'स्त्रिया ङितां०' (१।४।२८) इत्यत्र दाम्ग्रहणं कार्यम्, अन्यथा इदं सूत्रमन्यथा उत्तरं चान्यथा कार्यं स्यात्, तथा च गरीयसी रचना स्यादिति ॥छ॥

**केवलसखिपतेरौ ॥१।४।२६॥**

**[केवलसखिपतेरौ]** सखा च पतिश्च = सखिपतिः, केवलं च तत् सखिपतिश्च = केवलसखिपति, तस्मात् = केवलसखिपतेः, पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । औ प्रथमा सि । सूत्रत्वात् लोपः ।

---

P. 卐 ना प्रथमा सि । सूत्रत्वात् लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सख्यौ]** सखि । सप्तमी ङि । अनेन औ । 'इवर्णादे०' (१।२।२१) य० ।

**[पत्यौ]** पति । सप्तमी ङि । अनेन औ । 'इवर्णादे०' (१।२।२१) य० ।

**[सख्यि]** सखि । सखायमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । सप्तमी ङि । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

'सरिव्य' इत्यत्र 'स्थानीवाऽवर्णविधौ' (७।४।१०९) इति न्यायात् क्विपः स्थानित्वे सति 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) इति व(?) (य)लोपः कस्मान्न भवति ? 'असिद्धं बहिरङ्गमन्तरङ्गे' (न्यायसंग्रहः १।२०) इति न्यायात् अन्तरङ्गे क्विबाश्रिते कार्ये यत्वमसिद्धं स्यात्- ।

**[पत्यि]** पति । पतिमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पतीयतीति क्विप् । शेषं 'सरिव्य' वत् ।

**[प्रियसखौ]** प्रियः सखा यस्याऽसौ, तस्मिन् = प्रियसखौ, सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[नरपतौ]** नराणां पतिः = नरपतिस्तस्मिन् = नरपतौ, सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।।छ।।

**न ना ङिदेत् ।।१।४।२७।।**

**[न]** न अव्यउ । प्रथमा सि ।

**[ना ङिदेत्]** ना ङ्-इत्-एत् । ङ् इत् अनुबन्धो यस्याऽसौ ङित्, ङिति एत् = ङिदेत्, नाश्च ङिदेच्च नाङिदेत्, प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[सख्या]** सखि । तृतीया टा । 'टः पुंसि ना' (१।४।२४) [ना] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[पत्या]** पति । तृतीया टा । 'टः पुंसि ना' (१।४।२४) [ना] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[सख्ये]** सखि। चतुर्थी ङे । 'ङित्यदिति' (१।४।२३) [ए] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[पत्ये]** पति । चतुर्थी ङे । 'ङित्यदिति' (१।४।२३) [ए] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[सख्युः आगतं स्वं वा]** सखि । पञ्चमी ङसि अथवा षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) [ए] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वं । 'खि-ति-खी-तीय उर्' (१।४।३६) ङसि-ङस्० → उर् ।

**[पत्युः आगतं स्वं वा]** पति । पञ्चमी ङसि अथवा षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) [ए] प्राप्नोति, परं न भवति । 'इवर्णादेरस्वे०' (१।२।२१) यत्वं । 'खि-ति-खी-तीय उर्' (१।४।३६) ङसि-ङस्० → उर् ।

**[सख्यौ]** सखि । सप्तमी ङि । 'ङित्यदिति' (१।४।२३) [ए] प्राप्नोति, परं न भवति । 'केवलसखि-पतेरौ' (१।४।२६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औ । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

अत्रादेशे कृते 'ङित्यदिति' (१।४।२३) इति प्राप्नोति, न तु पूर्वं, यस्तद्बाधकं 'ङिर्डौ' (१।४।२५) ततोऽपि 'केवलसखिपतेरौ' (१।४।२६) इति औत्वम् । ततः 'तदादेश०.... इति न्यायात् स्यादित्वे सति एत्वं प्राप्तं निषिद्धम् ।

**[पत्यौ]** पति । सप्तमी ङि । 'ङित्यदिति' (१।४।२३) । [ए] प्राप्नोति, परं न भवति । 'केवलसखिपतेरौ' (१।४।२६) औ. । इवर्णादेरस्वे०' (१।२।२१) यत्वम् ।

**[पतयः]** पति । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[प्रियसखिना]** प्रियः सखा यस्याऽसौ प्रियसखा, तेन ।

**[सुसखिना]** शोभनः सखा = सुसखा, तेन ।

**[बहुसखिना]** बहुः सखा यस्याऽसौ बहुसखि(?) (सखा), तेन ।

**[साधुपतिना]** साधुः पतिर्यस्याऽसौ साधुपतिस्तेन ।

**[बहुपतिना]** बहुः पतिर्यस्याऽसौ वहुपतिस्तेन = बहुपतिना ।

**[प्रियसखये]** प्रियः सखा यस्याऽसौ प्रियसखि(?) (सखा), तस्मै ।

**[नरपतये]** नराणां पतिः = नरपतिस्तस्मै ।

**[नरपतेः आगतं स्वं वा]** नराणां पतिः = नरपतिस्तस्मात् – तस्य वा. ॥छ॥

**स्त्रिया ङितां वा दै-दास्-दास्-दाम् ॥१।४।२८॥**

**[स्त्रियाः]** स्त्री पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) दास् → आस् । 'स्त्रियाः' (२।१।५४) इय् ।

**[ङिताम्]** ङ् इत् अनुबन्धो येषां ते = ङितस्तेषां = ङितां, षष्ठी आम् ।

**[वा]** वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[दै-दास्-दास्-दाम्]** दैश्च दास् च दास् च दाम् च = दैदास्दास्दाम्, 卐प्रथमा जस् । सूत्रत्वात् लोपः ।

**[बुद्ध्यै, बुद्धये]** बुद्धि २ । चतुर्थी ङे । अनेन दै । 'इवर्णादेरस्वे०' (१।२।२१) यत्वं, पक्षे 'ङित्यदिति' (१।४।२३) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[बुद्ध्याः, बुद्धेः २ आगतं स्वं वा]** बुद्धि २ । पञ्चमी ङसि अथवा षष्ठी ङस् । अनेन दास् २ । 'इवर्णादेरस्वे०' (१।२।२१) यत्वं । पक्षे 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[बुद्ध्याम्, बुद्धौ]** बुद्धि २ । सप्तमी ङि । अनेन दाम् । 'इवर्णादेरस्वे०' (१।२।२१) यत्वं । पक्षे 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[धेन्वै, धेनवे]** धेनु २ । चतुर्थी ङे । अनेन दै । 'इवर्णादेरस्वे०' (१।२।२१) वत्वं । पक्षे 'ङित्यदिति' (१।४।२३) ओ. । 'ओदौतोऽवाव्' (१।२।२४) अव्० ।

**[धेन्वाः, धेनोः २]** धेनु २ । पञ्चमी ङसि अथवा षष्ठी ङस् । अनेन दास् २ । 'इवर्णादेरस्वे०' (१।२।२१) वत्वं । पक्षे 'ङित्यदिति' (१।४।२३) ओ. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[धेन्वाम्, धेनौ]** धेनु २ । सप्तमी ङि । अनेन दाम् । 'इवर्णादेरस्वे०' (१।२।२१) वत्वं । पक्षे 'ङिर्डौ' (१।४।२५)

P. 卐 प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः ।

**[प्रियबुद्ध्यै, प्रियबुद्धये स्त्रियै पुरुषाय वा]** प्रिया बुद्धिर्यस्याः सा = प्रियबुद्धिस्तस्यै = प्रियबुद्ध्यै । प्रिया बुद्धिर्यस्याऽसौ प्रियबुद्धिस्तस्मै = प्रियबुद्धये । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवद्भावः । चतुर्थी ङे । अनेन दै → ऐ । पक्षे 'ङित्यदिति' (१।४।२३) ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[प्रियधेन्वै, प्रियधेनवे स्त्रियै पुरुषाय वा]** प्रिया धेनुर्यस्याः सा = प्रियधेनुस्तस्यै । प्रिया धेनुर्यस्याऽसौ प्रियधेनुस्तस्मै ।

*__[प्रियमत्यै, प्रियमतये स्त्रियै पुरुषाय वा]__ प्रिया मतिर्यस्याः सा = प्रियमतिस्तस्यै । प्रिया मतिर्यस्य स=प्रियमतिस्तस्मै ।

**[अतिशकट्यै, अतिशकटये स्त्रियै पुरुषाय वा]** शकटीमतिक्रान्ता सा = अतिशकटिस्तस्यै । शकटीमतिक्रान्ता स = अतिशकटिस्तस्मै । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

**स्त्रीदूतः ।।१।४।२९।।**

**[स्त्रीदूतः]** ईच्च ऊच्च = ईदूत्, स्त्रियामीदूत् = स्त्रीदूत्, तस्मात् = स्त्रीदूतः, पञ्चमी ङसि ।

**[नद्यै, नद्याः, नद्याः, नद्याम्]**卐 'टुनदु समृद्धौ' (३१२) नद् । नद्यते शब्दायतेऽवगाह्यमाना इति नदी । 'अच्' (५।१।४९) अच्प्र० । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङीप्र० । ङे-ङसि-ङस्-ङि । अनेन कार्यम् ।

**[लक्ष्म्यै, लक्ष्म्याः, लक्ष्म्याः, लक्ष्म्याम्]** 'लक्षीण् दर्शनाङ्कनयोः' (१७१९) लक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० ।+ लक्षयति पुण्यकर्म्माणीति लक्ष्मीः । 'लक्षेर्मोऽन्तश्च' (उणा० ७१५) ईप्र० - मोऽन्तश्च । तस्यै-तस्याः (२) तस्याम् ।

**[कुर्वै, कुर्वाः, कुर्वाः, कुर्वाम्]** कुरु । कुरोरपत्यं स्त्री । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'कुरोर्वा' (६।१।१२२) ञ्यलोपः । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ। 'समानानां०' (१।२।१) दीर्घः । चतुर्थी ङे - पञ्चमी ङसि - षष्ठी ङस् - सप्तमी ङि । अनेन दै - दास्-दास्-दाम् । 'इवर्णादि०' (१।२।२१) वत्वम् ।

**[ब्रह्मबन्ध्वै, ब्रह्मबन्ध्वाः, ब्रह्मबन्ध्वाः, ब्रह्मबन्ध्वाम्]** ब्रह्मा बन्धुर्यस्याः सा = ब्रह्मबन्धूः । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० । 'समानानां०' (१।२।१) दीर्घस्तस्यै-तस्याः (२) - तस्याम् ।

**[अतिलक्ष्म्यै स्त्रियै पुरुषाय वा]** लक्ष्मीमतिक्रान्ता या सा = अतिलक्ष्मीः, तस्यै = अतिलक्ष्म्यै । लक्ष्मीमतो यः स = अतिलक्ष्मीः, तस्मै = अतिलक्ष्म्यै । चतुर्थी ङे । अनेन दै → ऐ । 'इवर्णादि०' (१।२।२१) यत्वम् ।

**[अतितन्त्र्यै स्त्रियै पुरुषाय वा]** 'तन्त्रिण् कुटुम्बचिन्तायां' (१८३९) तन्त्र् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । तन्त्रयति(ते) इति तन्त्रीः । 'तृ-स्तृ-तन्द्रि-तन्त्र्यविभ्य ईः' (उणा० ७११) ईप्र० । तन्त्रीमतिक्रान्ता [या] सा = अतितन्त्री(ः), तस्यै ।

**[अतिवध्वै स्त्रियै पुरुषाय वा]** वधूमतिक्रान्ता [या] सा = अतिवधूस्तस्यै ।

**[कुमार्यै ब्राह्मणाय ब्राह्मण्यै वा]** कुमारीमिच्छतीति कुमारीयति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । कुमारीयतीति क्विप् । 'अतः' (४।३।८२) अकारस्य लोपः । 'य्वोः०' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्-लोपः । अथवा कुमारीवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य. । कुमारीयति (ते) इति क्विप् । तस्मै ।

**[ग्रामण्ये स्त्रियै]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२.।३।९७) नी, ग्रामपूर्व० । ग्रामं नयतीति

P. 卐 'णद अव्यक्ते शब्दे' (२९९) णद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नद् । नदति = अव्यक्तं शब्दं करोति वहमाना सतीति नदी । 'लिहादिभ्यः' (५।१।५०) अच्प्र० । 'गौरादिभ्यो मुखान्ङीः' (२।४।१९) ङीप० → ई । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । नदी४ च० ङे- पं० ङसि- ष० ङस्- स० ङि । अनेन दै-दास्-दास्-दाम् । 'इवर्णादि०' (१।२।२१) यत्वम् ।

P. + लक्षयति पुण्यात्मकमिति लक्ष्मीः । P. * इदमुदाहरणं वृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामणीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० । चतुर्थी ङे । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विबृवृत्तेरसुधियस्तौ' (२।१।५८) यत्वं । स्त्री । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै → ऐ । 'स्त्रियाः' (२।१।५४) इय् ।

**[खलप्वे स्त्रियै]** 'पूग्श् पवने' (१५१८) पू, खलपूर्व० । खलं पुनातीति खलपूः । 'क्विप्' (५।१।१४८) क्विप्प्र० । चतुर्थी ङे । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) वत्वं । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । स्त्री । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै → ऐ । 'स्त्रियाः' (२।१।५४) इय् ।

**[आमलकाय]** 'मलि धारणे' (८१०) मल्, आङ्पूर्व० । आमलिषीष्ट । 'आशिष्यकन्' (५।१।७०) अकन्प्र० → अक । गौरादित्वात् 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङीप्र० - आमलकी । आमलक्याः फलं विकारः = आमलकम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० । 'फले' (६।२।५८) अण्लोपः । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीर्निवृत्तिस्तस्मै ।

**[अतिकुरवे]** कुरुमतिक्रान्तोऽसौ अतिकुरूः, तस्मै ।

**[अतिकुमारये]** कुमारीमतिक्रान्तोऽसौ अतिकुमारि, तस्मै । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

**वेयुवोऽस्त्रियाः ।।१।४।३०।।**

**[वेयुवोऽस्त्रियाः]** वा इय्-उव् । इय् च उव् च = इयुव्, तस्य = इयुवः, षष्ठी ङस् । न स्त्री = अस्त्री । 'नञत्' (३।२।१२५) न० → अ०, तस्याः = अस्त्रियाः, षष्ठी ङस्, 'स्त्रीदूतः' (१।४।२९) ङस्० → दास् → आस् । 'स्त्रियाः' (२।१।५४) इय् ।

**[श्रियै, श्रिये]** 'श्रिग् सेवायाम्' (८८३) श्रि । श्रयति पुण्यकर्माणमिति श्री । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राट्-भ्राजादयः क्विप्' (५।२।८३) क्विप्प्र० - श्री निपात्यते । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । चतुर्थी ङे । अनेन । 'संयोगात्' (२।१।५२) इय् ।

**[श्रियाः, श्रियः]** श्री । पञ्चमी ङसि । अनेन । 'संयोगात्' (२।१।५२) इय् ।

**[श्रियाः, श्रियः]** श्री । षष्ठी ङस् । अनेन । 'संयोगात्' (२।१।५२) इय् ।

**[श्रियाम्, श्रियि]** श्री । सप्तमी ङि । अनेन । 'संयोगात्' (२।१।५२) इय् ।

**[अतिश्रियै, अतिश्रिये ब्राह्मणाय ब्राह्मण्यै वा]** श्री अतिपूर्व० । श्रियमतिक्रान्तो यः स = अतिश्रीः, तस्मै = अतिश्रिये । अथवा श्रियमतिक्रान्ता या सा = अतिश्रीः, तस्यै = अतिश्रियै । चतुर्थी ङे । अनेन । 'संयोगात्' (२।१।५२) इय् ।

**[भुवै, भुवे]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमतीति भूः । 'भ्रमि-गमि-तनिभ्यो डित्' (उणा० ८४३) डिद् ऊप्र० । चतुर्थी ङे । अनेन दै । 'भ्रू-श्नोः' (२।१।५३) उव् ।

**[भुवाः, भुवः]** भू । पञ्चमी ङसि । अनेन दास् । 'भ्रू-श्नोः' (२।१।५३) उव्० ।

**[भुवाः, भुवः]** भू । षष्ठी ङस् । अनेन दास् । 'भ्रू-श्नोः' (२।१।५३) उव्० ।

**[भुवाम्, भुवि]** भू । सप्तमी ङि । अनेन दाम् । 'भ्रू-श्नोः' (२।१।५३) उव्० ।

**[अतिभुवै, अतिभुवे पुरुषाय स्त्रियै वा]** भू अतिपूर्व० । भुवमतिक्रान्तो यः स = अतिभूः, तस्मै = अतिभुवै, अतिभुवे । अथवा भुवमतिक्रान्ता या सा = अतिभूः, तस्यै = अतिभुवै, अतिभुवे । अनेन दै → ऐ । 'भ्रू-श्नोः' (२।१।५३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उव् ।

**[आध्यै]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।८३) क्विप्प्र० - धी निपात्यते । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'धातोः पूजार्थ०' (३।१।१) आङ्पूर्व० । आध्यायत इति । (आध्यायतीत्येवंशीला) आधी । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५९) यत्वम् ।

**[प्रध्यै]** धी पूर्ववत् । 'धातोः पूजार्थ०' (३।१।१) प्रपूर्व० । प्रध्यायत इति । (प्रध्यायतीत्येवंशीला) प्रधी । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वम् ।

**[वर्षाभ्वै]** 'भू सत्तायाम्' (१) भू, वर्षापूर्व० । वर्षासु भवतीति वर्षाभूः । 'क्विप्' (५।१।१४८) क्विप्प्र० । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै । 'दृन्-पुन-वर्षा-कारैर्भुवः' (२।१।५९) वत्वम् ।

**[परमस्त्रियै, परमस्त्रियाः, परमस्त्रियाः, परमस्त्रियाम्]** परमश्चासौ स्त्री च परमस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्यै-तस्याः (२) – तस्यां । 'स्त्रीदूतः' (१।४।२९) दै-दास्-दास्-दाम् ।

**[यवक्रिये]** 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री, यवपूर्व० । यवान् क्रीणातीति यवक्रीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगींत्' (१।१।३७) क्विप्लोपः । चतुर्थी ङे । 'संयोगात्' (२।१।५२) इय् ।

**[कटप्रुवे]** 'पुंङ् गतौ' (५९७) प्रु, कटपूर्व० । कटं प्रवते इति कटप्रूः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । चतुर्थी ङे । 'संयोगात्' (२।१।५२) उव् ।।छ।।

**आमो नाम् वा ।।१।४।३१।।**

**[आमः]** आम् षष्ठी ङस् ।

**[नाम्]** नाम् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[वा]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अव्यउ ।

**[श्रीणाम्, श्रियाम्]** श्री (२) । षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । पक्षे 'संयोगात्' (२।१।५२) इय् ।

**[भ्रूणाम्, भुवाम्]** भू (२) । षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । पक्षे 'भ्रू-श्नोः' (२।१।५३) उव् ।

**[अतिश्रीणाम्, अतिश्रियाम्]** श्रियमतिक्रान्ता याः ताः = अतिश्रियस्तासां, षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न०→ण० । पक्षे 'संयोगात्' (२।१।५२) इय् ।

**[पृथुश्रीणाम्, पृथुश्रियाम्]** पृथुश्रीर्यासां ताः = पृथुश्रियस्तासां, षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो णः०' (२।३।६३) न०→ण० । पक्षे 'संयोगात्' (२।१।५२) इय् ।

**[अतिभ्रूणाम्, अतिभुवाम्]** भुवमतिक्रान्ता ये ते = अतिभुवस्तेषां, षष्ठी आम् । अनेन नाम् । पक्षे 'भ्रू-श्नोः' (२।१।५३) उव् ।

**[पृथुभ्रूणाम्, पृथुभुवाम् स्त्रीणां पुरुषाणां वा]** पृथुभ्रूर्येषां ते = पृथुभुवस्तेषां, षष्ठी आम् । अनेन नाम् । पक्षे 'भ्रू-श्नोः' (२।१।५३) उव् ।

**[प्रधीनाम्]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या । 'धातोः पूजार्थ०' (३।१।१) प्रपूर्व० । प्रध्यायतीत्येवंशीला । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।८३) क्विप्प्र० - धी निपात्यते । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् ।

**[वर्षाभूणाम्]** 'भू सत्तायाम्' (१) भू, वर्षापूर्व० । वर्षासु भवन्तीति वर्षाभ्वः । 'क्विप्' (५।१।१४८) क्विप्प्र० । तेषां, षष्ठी आम् ।

**[कटप्रुवाम्]** 'पुंङ् गतौ' (५९७) प्रु, कटपूर्व० । कटं प्रवन्ते इति कटप्रुवः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० - कटप्रूनिपात्यते । तेषाम् ।

**[सुधियाम्]** सुष्ठु ध्यायन्तीति सुधियः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० तथा धी आदेशः । तेषाम् ।

**[परमस्त्रीणाम्]** परमाश्च ते स्त्रियश्च = परमस्त्रियस्तेषाम् ।

**[अतिश्रीणाम्]** श्रियमतिक्रान्तं यत् कुलं तत् = अतिश्रि । 'क्लीबे' (२।४।९७) ह्रस्वस्तेषां, षष्ठी आम् ।

**[अतिभ्रूणां कुलानाम्]** भ्रुवमतिक्रान्तं यत् कुलं तत् = अतिभ्रु । 'क्लीबे' (२।४।९७) ह्रस्वस्तेषां, षष्ठी आम् ।।छ।।

**ह्रस्वाऽऽपश्च ।।१।४।३२।।**

**[ह्रस्वाऽऽपश्च]** ह्रस्वश्च आप् च = ह्रस्वाऽऽप्, तस्मात् । 'सो रुः' (२।१।७२) र० । 'च-ट-ते' सद्वितीये (१।३।७) र०→श० । च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[संयतानाम्]** संयत । षष्ठी आम् । अनेन नाम् । 'दीर्घो नाम्यतिसृ-चतसृ-ष्रः' (१।४।४७) दीर्घः ।

**[बहुराजानाम्]** बहवो राजानो येषु ते = बहुराजानः, तेषां । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) नाम्नः प्राग् बहुप्र० ।

**[स्त्रीणाम्]** स्त्री । षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[वधूनाम्]** वधू । षष्ठी आम् । अनेन नाम् ।

**[सोमपाम्]** 'पां पाने' (२) पा, सोमपूर्व० । सोमं पिबतीति सोमपाः । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । तेषां, षष्ठी आम् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।।छ।।

**संख्यानां र्ष्णाम् ।।१।४।३३।।**

**[संख्यानां]** संख्यानं = संख्या । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् ।

**[र्ष्णाम्]** र् च ष् च् न् च, तेषां = र्ष्णाम्, षष्ठी आम् । 卐'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० (?) ('तवर्गस्य०' (१।३।६०) णत्वम्) ।

**[चतुर्णाम्]** चतुर् । षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'र्हादर्हस्वरस्या०' (१।३।३१) द्वित्वम् ।

**[षण्णाम्]** षष् । षष्ठी आम् । अनेन नाम् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'प्रत्यये च' (१।३।२) ड० → ण० । 'तवर्गस्य०' (१।३।६०) न० → ण० ।

**[पञ्चानाम्]** पञ्चन् । षष्ठी आम् । अनेन नाम् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घो नाम्यतिसृ-चतसृ-ष्रः' (१।४।४७) दीर्घः ।

**[परमचतुर्णाम्]** परम-चतुर् । परमाश्च ते चत्वारश्च = परमचत्वारस्तेषां, षष्ठी आम् । अनेन नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

---

卐 उक्तं च-बृहन्न्यासे न्या० सन्धाने 'रषृवर्ण०' (२।३।६३) इति तु न, एकपदत्वाभावात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परमषण्णाम्]** परमाश्च ते षट् च = परमषट्, तेषां, षष्ठी आम् । अनेन नाम् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'प्रत्यये च' (१।३।२) ड० → ण० । 'तवर्गस्य०' (१।३।६०) न० → ण० ।

**[परमपञ्चानाम्]** परमाश्च ते पञ्च च = परमपञ्च, तेषां, षष्ठी आम् । अनेन नाम् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घो नाम्यतिसृ-चतसृ-षः' (१।४।४७) दीर्घः ।

**[प्रियचतुराम्]** प्रियाश्चत्वारो येषां ते = प्रियचत्वारस्तेषाम् ।

**[प्रियषषाम्]** प्रियाः षड् येषां ते = प्रियषट्, तेषाम् ।

**[प्रियपञ्चाम्]** प्रियाः पञ्च येषां ते = प्रियपञ्चनस्तेषाम् ।

**[परमाष्टानाम्]** परमाश्च ते अष्टौ च = परमाष्टौ, तेषां, षष्ठी आम् । अनेन नाम् । 'वाष्टन आः स्यादौ' (१।४।५२) न० → आ० ।।छ।।

**त्रेस्त्रयः** ।।१।४।३४।।

**[त्रेस्त्रयः]** त्रि । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां' (१।४।३५) र० । त्रय । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[त्रयाणाम्]** त्रि । षष्ठी आम् । अनेन त्रि० → त्रय आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'दीर्घो नाम्यतिसृ-चतसृ-षः' (१।४।४७) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[परमत्रयाणाम्]** परम-त्रि । परमाश्च ते त्रयश्च = परमत्रयस्तेषां = परमत्रयाणां, षष्ठी आम् । अनेन त्रि० → त्रय आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'दीर्घो नाम्यतिसृ-चतसृ-षः' (१।४।४७) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[अतित्रीणाम्]** त्रयमतिक्रान्ता ये ते = अतित्रयस्तेषाम् ।

**[प्रियत्रीणाम्]** प्रियास्त्रयो येषां ते = प्रियत्रयस्तेषाम् ।।छ।।

**एदोद्भ्यां ङसि-ङसो रः** ।।१।४।३५।।

**[एदोद्भ्याम्]** एत्-ओत् । एच्च ओच्च = एदोतौ, ताभ्यां = एदोद्भ्यां, पञ्चमी भ्याम् । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

**[ङसि-ङसोः]** ङसि-ङस् । ङसिश्च ङस् च = ङसिङसौ, तयोः = ङसिङसोः, षष्ठी ओस् ।

**[रः]** र प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[मुनेः]** मुनि । पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) इ० → ए० । अनेन ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[मुनेः]** मुनि । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) इ० → ए० । अनेन ङस् → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[साधोः]** साधु । पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) उ० → ओ० । अनेन ङसि → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[साधोः]** साधु । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) उ० → ओ० । अनेन ङस् → र० । 'रः पदान्ते०'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१।३।५३) विसर्गः ।

**[गोः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीति गौः । 'द्यु-गमिभ्यां डोः' (उणा० ८६७) डिद् ओप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । पञ्चमी ङसि । अनेन ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[गोः]** गो । षष्ठी ङस् । अनेन ङस्० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[द्योः]** 'द्युंक् अभिगमे' (१०७७) द्यु । द्यौतीति द्यौः । 'द्यु-गमिभ्यां डोः' (उणा० ८६७) डिद् ओप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः । पञ्चमी ङसि । अनेन ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[द्योः]** द्यो । षष्ठी ङस् । अनेन ङस्० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[परमेः, परमेः]** अ मांडियइ । अस्याऽपत्यं = इः = कामः (कामदेवः) । 'अत इञ्' (६।१।३१) इञ्प्र० । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । परमश्चासाविश्च = परमे, तस्मात् - तस्य वा ।

**[नेः, नेः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । तस्मात् - तस्य वा ।

**[लोः, लोः]** 'लूग्श् छेदने' (१५१९) लू । लुनातीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) ओ । तस्मात्-तस्य वा ।।छ।।

**खि-ति-खी-तीय उर् ।।१।४।३६।।**

**[खि-ति-खी-तीयः]** खि-ति-खी-ती । खिश्च तिश्च खीश्च तीश्च = खितिखीत्यः, खितिखीत्यां य् = खितिखीतीय्, तस्मात् = खितिखीतीयः, पञ्चमी ङसि ।

**[उर्]** उर् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[सख्युः(२)]** सखि । पञ्चमी ङसि - षष्ठी ङस् । 'इवर्णादे०' (१।२।२१) य० । अनेन उर् । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पत्युः(२)]** पति । पञ्चमी ङसि-षष्ठी ङस् । 'इवर्णादे०' (१।२।२१) य० । अनेन उर् । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[सख्युः]** सखि । सखायमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । पञ्चमी ङसि अथवा षष्ठी ङस् । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् । अनेन ।

**[पत्युः]** पति । पतिमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पतीयतीति क्विप् । शेषं 'सख्युः' वत् ।

**[लून्युः]** 'लूग्श् छेदने' (१५१९) लू । लूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । लूनमिच्छति । 'अमाव्ययात्०' (३।४।२३) क्यन्प्र० → य० । 'क्यनि' (४।३।११२) ई० । लूनीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । पञ्चमी ङसि - षष्ठी ङस् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पून्युः] 'पूग्श् पवने' (१५१८) पू । पूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । पूनमिच्छति । 'अमाव्ययात्०' (३।४।२३) क्यन्प्र० → य० । 'क्यनि' (४।३।११२) ई० । पूनीयतीति क्विप् । शेषं 'लून्युः' वत् ।

[अतिसखेः] सखि अतिपूर्व० । सखायमतिक्रान्तो योऽसौ, तस्मात्-तस्य वा अतिसखेः । पञ्चमी ङसि अथवा षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां०' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[अधिपतेः] पति अधिपूर्व० । अधिकः पतिः = अधिपतिस्तस्मात् - तस्य वा अधिपतेः । पञ्चमी ङसि अथवा षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां०' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[सख्याः] सखि । 'नारी-सखी-पङ्गू-श्वश्रू' (२।४।७६) ङीप्र० । पञ्चमी ङसि अथवा षष्ठी ङस् । 'स्त्रीदूतः' (१।४।२९) दास् → आस् ।

[पत्याः] पति । 'इतोऽक्त्यर्थात्' (२।४।३२) ङीप्र० । पञ्चमी ङसि अथवा षष्ठी ङस् । 'स्त्रीदूतः' (१।४।२९) दास् → आस् ।।छ।।

**ऋतो डुर् ।।१।४।३७।।**

[ऋतो डुर्] ऋत् पञ्चमी ङसि । डुर् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।।

[पितुः] पितृ । पञ्चमी ङसि । अनेन डुर् → उर् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

[पितुः] पितृ । षष्ठी ङस् । अनेन डुर् → उर् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

[गुः] 'गृत् निगरणे' (१३३५) गृ । गिरन्तीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । द्वितीया शस् → अस् ? (पञ्चमी ङसि) । 'इवर्णादे०' (१।२।२१) र० ।।छ।।

**तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रो घुट्यार् ।।१।४।३८।।**

[तृस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्त्रः] ता च स्वसा च नप्ता च नेष्टा च त्वष्टा च क्षत्ता च होता च पोता च प्रशास्ता च = तृस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृ, तस्य, षष्ठी ङस्, 'इवर्णादे०' (१।२।२१) रत्वम् ।

[घुट्यार्] घुट् । सप्तमी ङि । आर् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[कर्त्तारम्, कर्त्तारौ(२), कर्त्तारः कटस्य] 'डुकृंग् करणे' (८८८) कृ । करोतीति कर्त्ता, तं । कुरुतः इति कर्त्तारौ । कुर्वन्तीति कर्त्तारः । 'णक-तृचौ' (५।१।४८) तृच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् ।

[वदितारम्, वदितारौ, वदितारौ, वदितारो जनापवादान्] 'वद व्यक्तायां वाचि' (९९८) वद् । वदतीत्येवंशीलो वदिता, तं । वदतः इत्येवंशीलौ वदितारौ । वदन्तीत्येवंशीला वदितारः । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

[नेष्टारम्] 'णींग् प्रापणे' । (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतीति नेष्टा, तं । 'नियः षादिः' (उणा० ८६४) षकारादिः तृप्र० ।

[प्रशास्तारम्, प्रशास्तारौ, प्रशास्तारौ, प्रशास्तारः] 'शासूक् अनुशिष्टौ' (१०९५) शास्, प्रपूर्व० । प्रशास्तीति प्रशास्ता तं, प्रशास्तः (?) (प्रशिष्टः) इति प्रशास्तारौ, प्रशासन्ति (?) (प्रशासति) इति प्रशास्तारः । 'णक-तृचौ' (५।१।४८) तृच्प्र० ।

[अतिकर्त्तारम्, अतिकर्त्तारौ, अतिकर्त्तारौ, अतिकर्त्तारः] कर्त्तारमतिक्रान्तोऽसौ अतिकर्त्ता, तं, कर्त्तारमतिक्रान्तौ, तौ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्त्तारमतिक्रान्तास्ते. ।

**[हे कर्त्तः]** हे कर्तृ ! 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) अर् । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥ छ ॥

**अर्ङौ च ॥१।४।३९॥**

**[अर्ङौ च]** अर् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । ङि सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पितरि]** पितृ । सप्तमी ङि । अनेन अर् ।

**[पितरम्]** पितृ । द्वितीया अम् । अनेन अर् ।

**[कर्तृणि कुले]** कर्तृ । सप्तमी ङि । 'अनाम् स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[कर्तृणि कुलानि]** कर्तृ । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ॥छ॥

**मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये ॥१।४।४०॥**

**[मातुर्मातः]** मातृ षष्ठी ङस् । 'ऋतो डुर्' (१।४।३७) डुर् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । मात प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[पुत्रेऽर्हे]** पुत्र सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए० । अर्ह सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए० ।

**[सिनाऽऽमन्त्र्ये]** सि तृतीया टा । 'टः पुंसि ना' (१।४।२४) ना । आमन्त्र्यते इति आमन्त्र्यम् । तस्मिन् = आमन्त्र्ये, सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[हे गार्गीमात!]** गर्ग । गर्गस्याऽपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'यञो डायन् च वा' (२।४।६७) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । अग्रे मातृ, गार्गी माता यस्याऽसौ, तस्य संबोधनं हे गार्गीमात! । 'आमन्त्र्ये (२।२।३२) सि । आमन्त्रणार्थाभिद्योतको हे शब्दप्रागुपादीयते, हे अव्यउ ।

**[हे वात्सीमात!]** वत्सस्याऽपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'यञो डायन् च वा' (२।४।६७) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । वात्सी माता यस्याऽसौ, तस्य संबोधनं हे वात्सीमात! । 'आमन्त्र्ये' (२।२।३२) सि । सूत्रकार्यम् ।

**[हे गार्ग्यपितृक!]** गार्ग्यः पिता यस्याऽसौ, तस्य संबोधनं हे गार्ग्यपितृक! । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० ।

**[हे मातः!]** हे मातृ । 'आमन्त्र्ये (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) सिना सह अर् । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[हे गार्गीमातृके वत्से!]** गार्गी माता यस्याः सा = गार्गीमातृका, तस्याः संबोधनं हे गार्गीमातृके । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'आमन्त्र्ये' (२।२।३२) सि । 'एदापः' (१।४।४२) सि सहुं एकारु । 'वत्सः' (१।२।७) सूत्रवत् । 'आत्' (२।४।१८) आप् । 'आमन्त्र्ये' (२।२।३२) सि । 'एदापः' (१।४।४२) सि सहुं एकारु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अरे गार्गीमातृक!]** गार्गी माता यस्य स, तस्य संबोधनं क्रियते, अरे गार्गीमातृक ! । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० । 'आमन्त्र्ये' (२।२।३२) सि । आमन्त्रणार्थाभिद्योतको अरे शब्दप्राग् युज्यते । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ।।छ।।

**ह्रस्वस्य गुणः ।।१।४।४१।।**

**[ह्रस्वस्य]** ह्रस्व षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[गुणः]** गुण प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[हे पितः!]** हे पितृ । 'आमन्त्र्ये' (२।२।३२) सि । अनेन सि सउं अर् ।

**[हे मुने!]** हे मुनि । 'आमन्त्र्ये' (२।२।३२) सि । अनेन गुणः ए. ।

**[हे कर्तः कुल!]** हे कर्तृ । 'आमन्त्र्ये' (२।२।३२) सि । 'नामिनो लुग्वा' (१।४।६१) सिलोपः । अनेन अर् ।

**[हे वारे!]** हे वारि । 'आमन्त्र्ये' (२।२।३२) सि । 'नामिनो लुग्वा' (१।४।६१) सिलोपः । अनेन ए ।

**[हे त्रपो!]** हे त्रपु । 'आमन्त्र्ये' (२।२।३२) सि । 'नामिनो लुग्वा' (१।४।६१) सिलोपः । अनेन ओ. ।

**[हे नदि!]** हे नदी । 'आमन्त्र्ये' (२।२।३२) सि । 'नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः' (१।४।४३) सि सउं ह्रस्वः ।

**[हे वधु!]** हे वधू । 'आमन्त्र्ये' (२।२।३२) सि । 'नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः' (१।४।४३) सि सउं ह्रस्वः ।।छ।।

**एदापः ।।१।४।४२।।**

**[एदापः]** एत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । आप् षष्ठी ङस् ।

**[हे बहुराजे!]** बहवो राजानो यस्यां सा = बहुराजा, तस्याः संबोधनं हे बहुराजे ! । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहु० । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डाप्प्र० → आप् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आमन्त्र्ये' (२।२।३२) सि । अनेन ए. ।

**[हे बहुखट्वे विष्टर!]** ईषदूना खट्वा, तस्याः संबोधनं हे बहुखट्वे विष्टर! ।

**[हे प्रियखट्व !]** प्रिया खट्वा यस्याऽसौ प्रियखट्व(:) । 'गोश्चान्ते०' (२।४।९६) ह्रस्वस्तस्य संबोधनं हे प्रियखट्व! । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ।

**[हे कीलालपाः!]** कीलालं पिबतीति कीलालपाः, तस्याः संबोधनं हे कीलालपाः ! ।।छ।।

**नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः ।।१।४।४३।।**

**[नित्यदिद्-द्विस्वराऽम्बार्थस्य]** द् इत् अनुबन्धो यस्याऽसौ दित्, नित्यं दित् येभ्यस्ते = नित्यदितः, द्वौ स्वरौ येषां ते = द्विस्वराः, अम्बा लक्षणोऽर्थो येषां ते = अम्बार्थाः, द्विस्वराश्च ते अम्बार्थाश्च = द्विस्वराऽम्बार्थाः, नित्यदितश्च द्विस्वराऽम्बार्थाश्च = नित्यदिद्द्विस्वराऽम्बार्थाः, तस्य, षष्ठी ङस्, 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[ह्रस्वः]** ह्रस्व प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[हे स्त्रि!]** स्त्री । 'आमन्त्र्ये' (२।२।३२) सि । आमन्त्रणार्था हे प्राग् । अनेन ।

**[हे लक्ष्मि!]** लक्ष्मी । 'आमन्त्र्ये' (२।२।३२) सि । आमन्त्रणार्था हे प्राग् । अनेन ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**[हे ब्रह्मबन्धु!]** ब्रह्मा बन्धुर्यस्याः सा = ब्रह्मबन्धूः । 'उतोऽप्राणिन०' (२।४।७३) ऊङ् । तस्याः संबोधनं हे ब्रह्मबन्धु ! ।

**[हे करभोरु!]** करभस्येव ऊरू यस्याः सा = करभोरूः । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ। 'समानानां०' (१।२।१) दीर्घः । तस्याः संबोधनं हे करभोरु ! ।

**[हे श्वश्रु!]** श्वश्रू । 'नारी-सखी-पङ्गू-श्वश्रू' (२।४।७६) ऊङ्प्र० । सूत्रकार्यम् ।

**[हे वधु!]** वधू । 'आमन्त्र्ये' (२।२।३२) सि । आमन्त्रणार्था हे प्राग् । अनेन. ।

**[हे वर्षाभु!]** 'भू सत्तायाम्' (१) भू । वर्षासु भवतीति वर्षाभूः । 'क्विप्' (५।१।१४८) क्विप्प्र० । तस्य संबोधनं हे वर्षाभु !। 'आमन्त्र्ये' (२।२।३२) सि । अनेन. ।

**[हे अतिलक्ष्मि!]** लक्ष्मीमतिक्रान्ता या सा = अतिलक्ष्मीः, तस्याः संबोधनं हे अतिलक्ष्मि! ।

**[हे अम्ब!]** अम्ब । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । अनेन. ।

**[हे अक्क!]** अक्क । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । अनेन. ।

**[हे परमाम्ब!]** परमा चासौ अम्बा च = परमाम्बा, तस्याः संबोधनम् ।

**[हे प्रियाम्ब!]** प्रिया अम्बा यस्याः सा = प्रियाम्बा, तस्याः संबोधनम् ।

**[हे वातप्रमीः!]** वात अग्रे 'मांङ्क् मानशब्दयोः' (११३७) मा । वातं प्रमिमीते = वातप्रमीः । 'वातात् प्रमः कित्' (उणा० ७१३) किद् ईप्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । तस्याः संबोधनम् ।

**[हे हूहूः!]** हूहू । 'आमन्त्र्ये' (२।२।३२) सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अनेन न ।

**[हे ग्रामणीः!]** ग्रामं नयतीति ग्रामणीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० । तस्य संबोधनं हे ग्रामणीः !।

**[हे खलपूर्वधूटि!]** खलं पुनातीति खलपूः । 'क्विप्' (५।१।१४८) क्विप्प्र० । तस्य संबोधनं हे खलपूः ! ।

**[हे सुभ्रु!]** सुभ्रु । शोभनं भ्रु = भ्रमणं यस्याः सा । उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० । तस्याः संबोधनं हे सुभ्रु ! ।

**[हे भीरु!]** भीरु । 'उतोऽप्राणि०' (२।४।७३) ऊङ्प्र० । तस्याः संबोधनं हे भीरु! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन सि सउं ह्रस्वः ।

**[हे अम्बाडे !]** अम्बाड । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । 'एदापः' (१।४।४२) ए. ।

**[हे मातः!]** मातृ । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । 'ह्रस्वस्य गुणः' (१।४।४१) अर् । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### अदेतः स्यमोर्लुक् ॥१।४।४४॥

[**अदेतः**] अत्-एत् । अच्च एच्च = अदेत्, तस्मात् = अदेतः, पञ्चमी ङसि ।

[**स्यमोः**] सि-अम् । सिश्च अम् च = स्यमौ, तयोः = स्यमोः । षष्ठी ओस् ।

[**लुक्**] लुक् प्रथमा सि ।

[**हे उपकुम्भ!**] कुम्भ उपपूर्व० । कुम्भस्य समीपं = उपकुम्भं, तस्य संबोधनं हे उपकुम्भ ! । 'आमन्त्र्ये' (२।२।३२) सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) सि० → अम् । अनेन ।

[**हे अतिहे!**] हयमतिक्रान्तो योऽसौ अतिहे, तस्य संबोधनं हे अतिहे ! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन ।

[**हे से!**] सह इना = कामेन वर्तते इति से, तस्य संबोधनं हे से ! । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सभावः ॥छ॥

### दीर्घङ्याब्-व्यञ्जनात् सेः ॥१।४।४५॥

[**दीर्घङ्याब्व्यञ्जनात्**]卐 ङीश्च आप् च = ङ्यापौ, दीर्घौ च = तौ ङ्यापौ च = दीर्घङ्यापौ, दीर्घङ्यापौ च व्यञ्जनं च = दीर्घङ्याब्व्यञ्जनं, तस्मात्, पञ्चमी ङसि, 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

[**सेः**] सि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां०' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[**कुमारी**] कुमार । 'वयस्यनन्त्ये' (२।४।२१) ङीप्र० । प्रथमा सि । अनेन ।

[**कुमारी ब्राह्मणः**] कुमार । 'वयस्यनन्त्ये' (२।४।२१) ङीप्र० । कुमारीवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

[**निष्कौशाम्बिः**] कुशेन अम्बो = अम्बनं यस्याऽसौ कुशाम्बः । 'समानानां०' (१।२।१) दीर्घः । कुशाम्बेन निर्वृत्ता = कौशाम्बी । 'तेन निर्वृत्ते च' (६।२।७१) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः कौ । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० → ई । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । निर्पूर्व० निर्गतः कौशाम्ब्या = निष्कौशाम्बिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) र० → ष० । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[**अतिखट्वः**] खट्वामतिक्रान्तो योऽसौ अतिखट्वः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[**उखास्रत्**] स्रंसूङ् अवस्रंसने (९५३) स्रंस्, उखापूर्व० । उखया स्रंसते = उखास्रत् । क्विप्प्र० । 'नो' व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) द० । 'विरामे वा' (१।३।५१) द० → त० ॥छ॥

### समानादमोऽतः ॥१।४।४६॥

[**समानादमोऽतः**] समान पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । अम् षष्ठी ङस् । अत् षष्ठी ङस् ।

[**मुनिम्**] मुनि । द्वितीया अम् । अनेन ।

[**साधुम्**] साधु । द्वितीया अम् । अनेन ।

---

P. 卐 पाठांतर - दीर्घश्च ङीश्च आप् च व्यञ्जनं च = दीर्घङ्याब्व्यञ्जनं, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नदीम्]** नदी । द्वितीया अम् । अनेन ।

**[वधूम्]** वधू । द्वितीया अम् । अनेन ।

**[अचिनवम्]** 'चिंग्ट् चयने' (१२९०) चि । ह्यस्तनी अम्व् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु० । 'उ-श्नोः' (४।३।२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरदिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः ॥छ॥

**दीर्घो नाम्यतिसृ-चतसृ-ष्रः ॥१।४।४७॥**

**[दीर्घो नाम्यतिसृ-चतसृ-ष्रः]** दीर्घ प्रथमा सि । 'सो रुः' (२।१।७२) र० । नाम् सप्तमी ङि । तिसा च चतसा च ष् च र् च = तिसृचतसृष्र्, न तिसृचतसृष्र् = अतिसृचतसृष्र्, 'नञत्' (३।२।१२५) न० → अ०, (तस्य) = अतिसृचतसृष्रः, षष्ठी ङस् ।

**[मुनीनाम्]** मुनि । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । अनेन. ।

**[साधूनाम्]** साधु । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । अनेन. ।

**[पितृणाम्]** पितृ । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । अनेन. । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[तिसृणाम्]** त्रि । षष्ठी आम् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) तिसृ आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[चतसृणाम्]** चतुर् । षष्ठी आम् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) चतसृ आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[षण्णाम्]** षष् । षष्ठी आम् । 'संख्यानां र्ष्णाम्' (१।४।३३) नाम् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'प्रत्यये च' (१।३।२) ड० → ण० । 'तवर्गस्य०' (१।३।६०) न० → ण० ।

**[चतुर्णाम्]** चतुर् । षष्ठी आम् । 'संख्यानां र्ष्णाम्' (१।४।३३) नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'र्हादर्हस्वरस्या०' (१।३।३१) द्वित्वम् ॥छ॥

**नुर्वा ॥१।४।४८॥**

**[नुः]** नृ षष्ठी ङस् । 'ऋतो डुर्' (१।४।३७) ङस् → डुर् → उर् । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[नृणाम्, नृणाम्]** नृ । षष्ठी आम् । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अनेन. ।

**[अतिनृणाम्, अतिनृणाम्]** नरमतिक्रान्तास्तेऽतिनरस्तेषां = अतिनृणां, अतिनृणाम् ॥छ॥

**शसोऽता सश्च नः पुंसि ॥१।४।४९॥**

**[शसोऽता सश्च नः पुंसि]** शस् षष्ठी ङस् । अत् तृतीया टा । स् षष्ठी ङस् । च अव्यउ । प्रथमा सि । न प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । पुम्स् सप्तमी ङि । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[मुनीन्]** मुनि । द्वितीया शस् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[साधून्]** साधु । द्वितीया शस् । अनेन ।

**[वातप्रमीन्]** 'मांङ्क् मान-शब्दयोः' (११३७) मा, वातपूर्व० । वातं प्रमिमीते = वातप्रमीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) ई० । द्वितीया शस् । अनेन ।

**[हूहून्]** हूहू । द्वितीया शस् । अनेन ।

**[पितॄन्]** पितृ । द्वितीया शस् । अनेन ।

**[शालाः]** शाला । द्वितीया शस् । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

**संख्या-साय-वेरह्नस्याऽहन् ङौ वा ।।१।४।५०।।**

**[संख्यासायवेः]** संख्या च 卐 सायं च विश्च = संख्यासायवि, अत एव निपातनात् सायंशब्दस्य मकारलोपस्तस्मात् = संख्यासायवेः, पञ्चमी ङसि, 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां०' (१।४।३५) र० ।

**[अह्नस्य]** अह्न । षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य. ।

**[अहन्]** अहन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[ङौ]** ङि । सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[वा]** वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[द्वयहि, द्वयहनि, द्वयहे]** द्वि-अहन् । द्वयोरह्नोर्भवः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - अह्न इत्यादेशश्च । सप्तमी ङि । सूत्रकार्यम् । 'ई-ङौ वा' (२।१।१०९) अलोपः । उभयविकल्पे त्रैरूप्यम् ।

**[त्र्यहि, त्र्यहनि, त्र्यहे]** त्रि-अहन् । त्रयोरह्नोर्भवः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - अह्न इत्यादेशश्च । सप्तमी ङि । 'ईङौ' वा (२।१।१०९) अलोपः ।

**[यावदहि, यावदहनि, यावदह्ने]** यद् । यत् परिमाणमस्य = यावत् । 'यत्-तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । यावत् । अहन् । यावदह्नोर्भवः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - अह्न इत्यादेशश्च । सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः ।

**[तावदहि, तावदहनि, तावदहे]** तद् । तत् परिमाणस्य = तावत् । 'यत्-तदेतदो-डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । तावत् । अहन् । तावदह्नोर्भवः । 'सर्वांऽश-संख्या'० (७।३।११८) अट्समासान्तः - अह्न इत्यादेशश्च । सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः ।

**[सायाह्नि, सायाहनि, सायाह्ने]** सायमहः = सायाह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः-अह्नादेशश्च । सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः । अनेन । यदा सायंशब्दोऽव्ययस्तदा 'सायाह्नादयः' (३।१।५३) इति मलोपः ।

**[व्यह्नि, व्यहनि, व्यह्ने]** वि-अहन् । वि अव्यउ । विगतमहः = व्यह्नः । 'सर्वां-ऽश-संख्या०' (७।३।११८) अट् - समासान्तः - अह्नादेशश्च । शेषं पूर्ववत् ।

**[मध्याह्नि]** मध्यमहः = मध्याह्नः, तस्मिन् ।

**[द्वयहे]** द्वयोरह्नोः समाहारः = द्वयहः । 'द्विगोरन्नह्नोऽट्' (७।३।९९) अट्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१)

P. 卐 सायश्च ।

अन्लोपस्तस्मिन् ॥छ॥

**निय आम् ॥१।४।५१॥**

**[नियः]** नी । पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इयादेशः ।

**[आम्]** आम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[नियाम्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी ङि । अनेन आम् । 'धातोरिवर्णो०' (२।१।५०) इय् ।

**[ग्रामण्याम्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, ग्रामपूर्व० । ग्रामं नयतीति क्विप् ग्रामणीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ग्रामाऽग्रान्नियः' (२।३।७१) णत्वम् । स्यादिविधौ णत्वमसत् । सप्तमी ङि । अनेन आम् । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वम् ॥छ॥

**वाष्टन आः स्यादौ ॥१।४।५२॥**

**[वाष्टन आः स्यादौ]** वा अव्यउ । प्रथमा सि । अष्टन् षष्ठी ङस् । आ प्रथमा सि । 'सो रुः' (२।१।७२) र० । सि(:) आदिर्यस्याऽसौ स्यादिस्तस्मिन् ।

**[अष्टाभिः, अष्टभिः]** अष्टन् । तृतीया भिस् । षष्ठया अष्टन्शब्दसन्धि (संबंधि) या अन्त षष्ठीनिर्दिष्टउ कार्युं अन्ति जाणेवउ । अनेन नस्य आ । पक्षे 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रियाष्टाः, प्रियाष्टा]**卐 प्रिया अष्टौ यस्य स । प्रथमा सि । अनेन आ । पक्षे 'नि दीर्घ' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[प्रियाष्टौ, प्रियाष्टानौ]** प्रिया अष्टौ ययोस्तौ ।

**[प्रियाष्टाः, प्रियाष्टानः]** प्रिया अष्टौ येषां ते ।

**[प्रियाष्टाम्, प्रियाष्टानाम्]** प्रिया अष्टौ यस्य तम् ।

**[प्रियाष्टौ, प्रियाष्टानौ]** प्रिया अष्टौ ययोस्तौ ।

**[प्रियाष्टः, प्रियाष्ट्नः]** प्रिया अष्टौ येषां तान् ।

**[हे प्रियाष्टाः, हे प्रियाष्टन् !]** हे प्रियाष्टन् 'आमन्त्र्ये' (२।२।३२) सि । अनेन आ । पक्षे 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[अष्टकः संघः]** अष्टा एव = अष्टकः । 'शेषाद्वा' (७।३।१७५) कच्प्र० ? (अष्टौ मानमस्य । 'संख्यायाः संघ-सूत्र-पाठे' (६।४।१७१) कप्र०) ।

**[अष्टता]** अष्टो भावः । 'भावे त्व-तल्' (७।१।५५) तल्प्र० । 'आत्' (२।४।१८) आप् । प्रथमा सि ।

**[अष्टत्वम्]** अष्टो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । प्रथमा सि. ।

**[अष्टपुष्पी]** अष्टन्-पुष्प । अष्टानां पुष्पानां (णां) समाहारः = अष्टपुष्पी । 'द्विगोः समाहारात्' (२।४।२२) ङीप्र० । अष्टपुष्पाण्यस्यां । 'असत्-काण्ड-प्रान्त-शतैकाञ्चः पुष्पात्' (२।४।५६) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः ॥ ॥

P. 卐 प्रिया अष्टौ यस्याः सा = प्रियाष्टाः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अष्ट औ जस्-शसोः ॥१।४।५३॥**

**[अष्ट औ जस्-शसोः]** *अष्टन् । षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः । औ । प्रथमा सि । सूत्रत्वात् सिलोपः । जस् च शस् च = जस्शसौ, तयोः = जस्शसोः, षष्ठी ओस् ।

**[अष्टौ तिष्ठन्ति]** अष्टन् । प्रथमा जस् । 'वाष्टन आः स्यादौ' (१।४।५२) न० → आ । 'समानानां०' (१।२।१) दीर्घः । अनेन औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[अष्टौ पश्य]** अष्टन् । द्वितीया शस् । शेषं पूर्ववत् ।

**[परमाष्टौ]** परमाश्च ते अष्टौ च = परमाष्टौ ।

**[प्रियाष्टः पश्य]** प्रिया अष्टौ येषां ते = प्रियाष्टाः, तान् = प्रियाष्टः ॥छ॥

**डति-ष्णः संख्याया लुप् ॥१।४।५४॥**

**[डति-ष्णः]** डतिश्च ष् च न् च = डतिष्ण्, तस्य = डतिष्णः, षष्ठी ङस् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[संख्याया लुप्]** संख्या । षष्ठी ङस् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यास् । लुप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'अवर्ण-भो-भगो-अघोर्लुगसन्धिः' (१।३।२२) रलोपः ।

**[कति तिष्ठन्ति]** किम् । का संख्या मानमेषां = कति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा जस् । अनेन ।

**[कति पश्य]** कति । द्वितीया शस् । अनेन ।

**[यति तिष्ठन्ति]** यद् । या संख्या मानमेषां = यति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा जस् । अनेन ।

**[यति पश्य]** यति । द्वितीया शस् । अनेन ।

**[तति तिष्ठन्ति]** तद् । सा संख्या मानमेषां = तति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा जस् । अनेन ।

**[तति पश्य]** तति । द्वितीया शस् । अनेन. ।

**[षट् तिष्ठन्ति]** षष् । प्रथमा जस् । अनेन । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[षट् पश्य]** षष् । द्वितीया शस् । शेषं पूर्ववत् ।

**[पञ्च तिष्ठन्ति]** पञ्चन् । प्रथमा जस् । अनेन । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[पञ्च पश्य]** पञ्चन् । द्वितीया शस् । शेषं पूर्ववत् ।

**[परमषट्]** परमाश्च ते षट् च = परमषट् । प्रथमा जस् । अनेन जस्लोपः ।

**[परमपञ्च]** परमाश्च ते पञ्च च = परमपञ्च । प्रथमा जस् । अनेन जस्लोपः ।

**[त्रयः]** त्रि । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

---

P. * अष्टा । षष्ठी ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चत्वारः]** चतुर् । प्रथमा जस् । 'वाः शेषे' (१।४।८२) वाऽऽदेशः ।

**[प्रियकतयस्तिष्ठन्ति]** प्रियाः कति येषां ते ।

**[प्रियषषः]** प्रियाः षट् येषां ते ।

**[प्रियपञ्चानः]** प्रियाः पञ्च येषां ते ।

**[प्रियपञ्च्ञः]** प्रियाः पञ्च येषां ते, तान् = प्रियपञ्च्ञः । 'अनोऽस्य' (२।१।१०८) अलोपः । 'तवर्गस्य०' (१।३।६०) न० → ञ० । ञ् उपरि तन्नकारस्य 'म्नां धुड्वर्गे०' (१।३।३९) अनुस्वारः (?) (अनुनासिकः) ।।छ।।

**नपुंसकस्य शिः ।।१।४।५५।।**

**[नपुंसकस्य शिः]** नपुंसक । षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । शि । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[कुण्डानि तिष्ठन्ति]** कुण्ड । प्रथमा जस् । अनेन शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[कुण्डानि पश्य]** कुण्ड । द्वितीया शस् । शेषं पूर्ववत् ।

**[पयांसि]** पयस् । प्रथमा जस् । अनेन शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[यशांसि]** यशस् । प्रथमा जस् । शेषं 'पयांसि' वत् ।

**[कुण्डशो ददाति]** कुण्ड । कुण्डं कुण्डं ददाति = कुण्डशो ददाति । बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र०(?) ('संख्यैकार्थाद् वीप्सायां शस्' (७।२।१५१) शस्प्र०) ।

**[प्रियकुण्डाः]** प्रियं कुण्डं येषां ते = प्रियकुण्डाः ।

**[प्रियकुण्डान्]** प्रियं कुण्डं येषां ते = प्रियकुण्डाः, तान् ।

**[परमकुण्डानि]** परमाणि च तानि कुण्डानि च = परमकुण्डानि ।।छ।।

**औरीः ।।१।४।५६।।**

**[औरीः]** औ । प्रथमा सि । 'सो रुः' (२।१।७२) र० । ई । प्रथमा सि ।

**[कुण्डे तिष्ठतः]** कुण्ड । प्रथमा औ । अनेन ई । 'अवर्णस्ये०' (१।२।६) ए. ।

**[कुण्डे पश्य]** कुण्ड । द्वितीया औ । अनेन ई । 'अवर्णस्ये०' (१।२।६) ए. ।

**[पयसी]** पयस् । प्रथमा औ । अनेन ई. ।

**[प्रियकुण्डौ पुरुषौ]** प्रियं कुण्डं ययोस्तौ ।

**[परमकुण्डे]** परमे च ते कुण्डे च = परमकुण्डे ।।छ।।

**अतः स्यमोऽम् ।।१।४।५७।।**

**[अतः स्यमोऽम्]** अत् । षष्ठी ङस् । सिश्च अम् च = स्यम्, तस्य = स्यमः, षष्ठी ङस् । अम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कुण्डं तिष्ठति]** कुण्ड । प्रथमा सि । अनेन अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । तौ मुमो० (१।३।१४) अनुस्वारः ।

**[कुण्डं पश्य]** कुण्ड । द्वितीया अम् । 'शेषं पूर्ववत् ।

**[कीलालपम्]**卐 कीलालं पिबतीति । 'क्लीबे' (२।४।९७) ह्रस्वस्तत् = कीलालपम् ।

**[अतिखट्वं कुलम्]** खट्वामतिक्रान्तं यत् कुलं तत् = अतिखट्वम् ।

**[हे कुण्ड!]** कुण्ड । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । अनेन अम् । 'अदेतः स्यमोर्लुक्' (१।४।४४) अम्लोपः ।

**[प्रियकुण्डः पुरुषः]** प्रियं कुण्डं यस्य सः ।

**[अतिजरसं कुलं तिष्ठति]** जरामतिक्रान्तं यत् कुलं तत् = अतिजरसम् । 'क्लीबे' (२।४।९७) ह्रस्वः ।।छ।।

**पञ्चतोऽन्यादेरनेकतरस्य दः ।।१।४।५८।।**

**[पञ्चतः]** पञ्चन् । पञ्चेति संख्या मानमस्येति पञ्चत् । 'पञ्चद्-दशद् वर्गे वा' (६।४।१७५) अत्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लोपः । षष्ठी ङस् ।

**[अन्यादेः]** अन्य आदिर्यस्याऽसौ अन्यादिः, तस्य = अन्यादेः, षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।।

**[अनेकतरस्य]** न एकतरः = अनेकतरः । 'अन् स्वरे' (३।२।१२९) अन्, तस्य = अनेकतरस्य, षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य० ।

**[दः]** द । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अन्यतरत्]** द्वयोर्मध्ये प्रकृष्टं अन्यत् = अन्यतरत् । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । अनेन द० । 'धुटस्तृतीयः' (२।१।७६) पुनरपि दस्य द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[कतरत्]** (१) अयं कं(?)(कः)२, अयमनयोर्मध्ये कः = कतरः । 'यत्-तत्-किमन्यात्' । (७।३।५३) डतरप्र०→अतर० । डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । अनेन द० । 'विरामे वा' (१।३।५१) द० → त० ।

+**[यतरत्]** द्वयोर्मध्ये यः = यतरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । शेषं 'कतरत्' वत् ।

**[ततरत्]** द्वयोर्मध्ये सः = ततरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । शेषं 'यतरत्' वत् ।

**[कतमत् तिष्ठति]** (२) बहूनां मध्ये कः = कतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम. । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । अनेन द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[कतमत् पश्य]** (३) बहुनां मध्ये कः = कतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । द्वितीया अम् । अनेन द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[यतमत्]** बहूनां मध्ये यः = यतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । अनेन द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[ततमत्]** बहूनां मध्ये सः = ततमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम० । शेषं 'यतमत्' वत् ।

---

P. 卐 कीलालं पिबति यत्कुलं तत् । P. १. द्वयोर्मध्ये प्रकृष्टं किं = कतरत् । P. २. बहूनां मध्ये प्रकृष्टं किं = कतमत् ।
P. ३. बहूनां मध्ये प्रकृष्टं किं = कतमत् । P. + इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[एकतरं तिष्ठति]**卐 अयमेको अयमेकः, अयमनयोर्मध्ये एकः = एकतरः । 'वैकाद् द्वयोर्निर्धार्ये डतरः' (७।३।५२) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । 'तौ मुमो०' (१।३।१४) अनुस्वारः ।

**[एकतरं पश्य]** सर्वं 'एकतरं तिष्ठति' वत्, नवरं सि स्थाने अम् ।

**[प्रियान्यम्]** प्रियोऽन्यो यत्र कुले तत् ।

**[अत्यन्यं कुलम्]** अन्यदतिक्रान्तं यत् कुलं तत् ।

**[परमान्यत् तिष्ठति]** परमं च तत् अन्यच्च = परमान्यत् ।

**[परमान्यत् पश्य]** परमं च तत् अन्यच्च = परमान्यत् ।

**[अनन्यत्]** न अन्यत् = अनन्यत् ।।छ।।

**अनतो लुप् ।।१।४।५९।।**

**[अनतो]** न अत् = अनत्, 'अन् स्वरे' (३।२।१२९) अन् । तस्य = अनतः, षष्ठी ङस् ।

**[लुप्]** लुप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[कर्तृ तिष्ठति पश्य वा]** कर्तृ । प्रथमा सि - द्वितीया अम् वा । अनेन ।

**[पयः तिष्ठति पश्य वा]** पयस् । प्रथमा सि - द्वितीया अम् वा । अनेन । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५१) विसर्गः ।।छ।।

**जरसो वा ।।१।४।६०।।**

**[अतिजरः अतिजरसं कुलं तिष्ठति पश्य वा]** जरा अतिपूर्व० । जरामतिक्रान्तं यत् कुलं तत् = अतिजरः - अतिजरसम् । 'क्लीबे' (२।४।९७) ह्रस्वत्वं । प्रथमा सि- द्वितीया अम् वा । 'अतः स्यमोऽम्' (१।४।५७) सि-अम्० → अम् । 'जराया जरस् वा' (२।१।३) जरा० → जरस् । अनेन ।।छ।।

**नामिनो लुग् वा ।।१।४।६१।।**

**[नामिनः]** नामिन् षष्ठी ङस् ।

**[लुग् वा]** लुक् । प्रथमा सि । वा अव्यउ. प्रथमा सि ।

**[हे वारे !, हे वारि!]** हे वारि ! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन लुक् । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः । लुप्-लोपोऽदर्शनं भवति, लुप्(क्) स्थानियउ जाणेवउ, तउ ह्रस्वस्य गुणो भवति । पक्षे 'अनतो लुप्' (१।४।५९) लुप् ।

**[हे त्रपो !, हे त्रपु !]** हे त्रपु ! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन लुक् । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः । पक्षे 'अनतो लुप्' (१।४।५९) लुप् ।

**[हे कर्तः !, हे कर्तृ !]** हे कर्तृ ! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन लुक् । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः । पक्षे 'अनतो लुप्' (१।४।५९) लुप् ।

**[प्रियतिसृ प्रियत्रि कुलं तिष्ठति पश्य वा]** त्रि प्रियापूर्व० । प्रियास्तिस्रो यस्य कुलस्य तत् = प्रियतिसृ प्रियत्रि कुलं । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । प्रथमा सि- द्वि० अम् । अनेन लुक् तस्य स्थानिवद्भावात् 'त्रि-चतुरस्तिसृ-चतसृ

---

P. 卐 द्वयोर्मध्ये प्रकृष्टं एकं = एकतरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादौ' (२।१।१) तिसृ आदेशः । पक्षे 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[प्रियचतुष्कुलम्]** प्रियाश्चतुरो यत् कुले तत् ।।छ।।

**वाऽन्यतः पुमांष्टादौ स्वरे ।।१।४।६२।।**

**[वाऽन्यतः]** वा प्रथमा सि । 卐 अन्यस्मात् = अन्यतः । 'किमद्वयादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित् तस्प्र० ।

**[पुमांष्टादौ]** पुम्स् । प्रथमा सि । 'पुंसोः पुमन्स्' (१।४।७३) पुमन्स् । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः । टा आदिर्यस्याऽसौ टादिस्तस्मिन् । 'नोऽप्रशानोऽनुस्वाराऽनुनासिकौ च पूर्वस्याऽधुट्परे' (१।३।८) न० → ष० - अनुस्वारागमः ।

**[स्वरे]** स्वर । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[ग्रामण्या, ग्रामणिना कुलेन]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी- ग्रामपूर्व० । ग्रामं नयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० । ग्रामं नयति यत् कुलं तद् = ग्रामणि । 'क्लीबे' (२।४।९७) ह्रस्वत्वं । तृतीया टा । अनेन पुंवद्भावे सति 'निमित्ताऽभावे नैमित्तिकस्याऽप्यभावः' (न्यायसं० १।२९) इति न्यायात् पुनरपि ईकारोऽवतिष्ठते, अन्यथा 'टः पुंसि ना' (१।४।२४) इति ग्रामणिना स्यात् । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वं । ग्रामणिना इत्यत्र 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः । 'टः पुंसि ना' (१।४।२४) टा० → ना० न भवति ।

**[ग्रामण्याम्, ग्रामणिनि कुले]** ग्रामणी पूर्ववत् । सप्तमी ङि । 'निय आम्' (१।४।५१) आम् । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वं । 'क्लीबे' (२।४।९७) ह्रस्वः । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[कर्त्रोः, कर्तृणोः]** कर्तृ(२) । षष्ठी-सप्तमी ओस् । अनेन पुंवद्भावः । यत्र पुंवत् तत्र 'इवर्णादे०' (१।२।२१) रत्वं । द्वितीये 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[कर्तृणाम्]** कुर्वन्तीति कर्त्तारः । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर्, तेषां = कर्तृणाम् । 'र्हादर्हस्वरस्याऽनु नवा' (१।३।३१) विकल्पे द्वित्वम् ।

**[अतिराया, अतिरिणा]** रायमतिक्रान्तं यत् कुलं तद् = अतिरि । तृतीया टा । अनेन पुंवद्भावे सति 'एदैतोऽयाय्' (१।२।२३) आय् । पक्षे 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[अतिनावा, अतिनुना]** नावमतिक्रान्तं यत् कुलं तद् = अतिनु । तृतीया टा । अनेन पुंवद्भावे सति 'ओदौतोऽवाव्' (१।२।२४) आव् । पक्षे 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[कुमार्यै, कुमारिणे कुलाय]** कुमारीवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । चतुर्थी ङे । 'स्त्रीदूतः' । (१।४।२९) दै० → ऐ० । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[पीलुने फलाय]** पीलु । पीलोर्वृक्षस्य विकारः फलं । 卐'विकारे' (६।२।३०) अणप्र० । 'फले' (६।२।५८) अण्लोपः । चतुर्थी ङे । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः । फल । चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) य । 'अत आ स्यादौ०' (१।४।१) दीर्घः ।

**[शुचिनी कुले]** शुचि । औ । 'औरीः' (१।४।५६) ई । 'अनाम् स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

---

P. 卐 अन्यस्मात् = अन्यतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० । P. 卐 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कल्याण्यै ब्राह्मण्यै]** 'अण शब्दे' (२५९) अण्, कल्यपूर्व० । + कल्यमणतीति । 'कल्याण-पर्याणादयः' (उणा० १९३) अप्र० (?) । 'नवा शोणादेः' (२।४।३१) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । चतुर्थी ङे । 'स्त्रीदूतः' (१।४।२९) दै. । *'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ॥छ॥

**दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान् ॥१।४।६३॥**

**[दध्यस्थिसक्थ्यक्ष्णः]** दधि च अस्थि च सक्थि च अक्षि च = दध्यस्थिसक्थ्यक्षि, तस्य = दध्यस्थिसक्थ्यक्ष्णः, षष्ठी ङस्, अनेन सूत्रेण अन् । 'अनोऽस्य' (२।१।१०८) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[अन्तस्यान्]** अन्त । षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । अन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[दध्ना]** दधि । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[अस्थ्ना]** अस्थि । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[सक्थ्ना]** सक्थि । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[अक्ष्णा]** अक्षि । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न०→ण० ।

**[परमदध्ना]** परमं च तद् दधि च = परमदधि, तेन. ।

**[परमास्थ्ना]** परमं च तद् अस्थि च = परमास्थि, तेन. ।

**[परमसक्थ्ना]** परमं च तत् सक्थि च = परमसक्थि, तेन. ।

**[परमाक्ष्णा]** परमं च तद् अक्षि च = परमाक्षि, तेन. ।

**[अतिदध्ना]** दधि अतिपूर्व० । दधि अतिक्रान्तो यः स = अतिदधिः, तेन = अतिदध्ना । **तृतीया टा** । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[अत्यस्थ्ना]** अस्थि अतिपूर्व० । अस्थि अतिक्रान्तो यः स = अत्यस्थिः, तेन = **अत्यस्थ्ना** । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[अतिसक्थ्ना]** सक्थि अतिपूर्व० । सक्थि अतिक्रान्तो यः स = अतिसक्थिः, **तेनः** = अतिसक्थ्ना । तृतीया टा । अनेनाऽन्तस्याऽन् । 'अनोऽस्यं' (२।१।१०८) अलोपः ।

**[अत्यक्ष्णा]** अक्षि अतिपूर्व० । अक्षि अतिक्रान्तो यः स = अत्यक्षिः, तेन **अत्यक्ष्णा** । **तृतीया** टा । **अनेनाऽन्तस्याऽन्** । 'अनोऽस्य' (२।१।१०८) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न०→ण० ।

**[प्रियदध्ना]** प्रियं दधि यस्याऽसौ प्रियदधिः, तेन ।

**[प्रियास्थ्ना शुना]** प्रियं अस्थि यस्याऽसौ प्रियास्थिः, तेन ।

**[दृढसक्थ्ना शकटेन]** दृढं सक्थि यस्याऽसौ दृढसक्थिः, तेन ।

**[स्थूलाक्ष्णा इक्षुणा]** स्थूलमक्षि यस्याऽसौ स्थूलाक्षिः, तेन ।

**[प्रियास्थ्न्यै शुन्यै]** प्रियं अस्थि यस्याः सा = प्रियास्थिः, तस्यै ॥छ॥

---

+ उणादिगणविवरणवृत्तौ 'कल्याण-पर्याणादयः' (उणा० १९३) कलिशब्दाद् आणक्प्रत्यये योऽन्तश्च इति निर्दिष्टः ।

* 'इवर्णादि०' (१।२।२१) यत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### अनाम्स्वरे नोऽन्तः ।।१।४।६४।।

**[अनाम्स्वरे]**卐 न आम् = अनाम्, 'अन् स्वरे' (३।२।१२९) अन् । अनाम् चासौ स्वरश्च = अनाम्स्वरस्तस्मिन् ।

**[वारिणी २]** वारि । प्रथमा-द्वितीया औ ।

**[वारिणः २]** वारि । पञ्चमी ङसि - षष्ठी ङस् ।

**[कर्तृणी कुले]** कर्तृ । द्वितीया औ ।

**[कर्तृणः २]** कर्तृ । पञ्चमी ङसि-षष्ठी ङस् ।

**[प्रियगुरुणे]** प्रियो गुरुर्यस्य, तस्मै ।

**[प्रियतिसृणः २]** प्रियास्तिस्रो यस्य तत् = प्रियतिसृ, तस्मात् - तस्य ।

**[हे वारे!]** हे वारि । 'आमन्त्र्ये' (२।२।३२) सि । 'नामिनो लुग् वा' (१।४।६१) सेर्लुग्वा । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ए. ।

**[तौम्बुरवं चूर्णम्]** तुम्बुरु । तुम्बुरुणो वृक्षस्य विकारः फलं । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' । (६।२।३१) अण्प्र० । 'फले' (६।२।५८) अण्लोपः । तुम्बुरुणः फलस्य विकारश्चूर्णं । 'विकारे' (६।२।३०) अण्प्र० । अथवा तुम्बुरुण इदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । चूर्ण । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[प्रियवारये पुंसे]** प्रियं वारि यस्याऽसौ प्रियवारि(:), तस्मै ।

**[प्रियमधोः पुंसः]** प्रियं मधु यस्याऽसौ प्रियमधु(:), तस्मात् ।।छ।।

### स्वराच्छौ ।।१।४।६५।।

**[स्वराच्छौ]** स्वर । पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् । शि । सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तवर्गस्य०' (१।३।६०) द० → ज० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ज० → च० । 'प्रथमादधुटि शश्छः' (१।३।४) श० → छ० ।

**[कुण्डानि]** कुण्ड । प्रथमा जस्-द्वि० शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[प्रियवृक्षाणि कुलानि]** प्रिया वृक्षा येषु कुलेषु तानि । प्रथमा जस्-द्वि० शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[चत्वारि]** चतुर् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'वाः शेषे' (१।४।८२) उ० → वा ।

**[विमलदिवि]** विमला द्यौर्येषु तानि क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० ।। छ ।।

### धुटां प्राक् ।।१।४।६६।।

**[धुटां प्राक्]** धुट् च धुट् च धुट् च = धुटः, तेषाम् । 'स्यादावसंख्येयः' (३।१।११९) एकशेषः । प्राक् । प्रथमा

P. 卐 न नाम् = अनाम् । 'नञत्' (३।२।१२५) न० → अ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[पयांसि तिष्ठन्ति]** पयस् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[पयांसि पश्य]** पयस् । द्वितीया शस् । शेषं पूर्ववत् ।

**[अतिजरांसि कुलानि]** जरा अतिपूर्व० । जरामतिक्रान्तानि यानि कुलानि तानि = अतिजरांसि । 'क्लीबे' (२।४।९७) ह्रस्वत्वं । प्रथमा जस्-द्वितीया शस् वा । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'जराया जरस् वा' (२।१।३) जरस् । अनेन नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[काष्ठतङ्क्षि]** 'काशृङ् दीप्तौ' (८३०) काश् । काशते इति काष्ठम् । 'वनि-कणि-काश्युषिभ्यष्ठः' (उणा० १६२) ठप्र० । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'तक्षौ तनूकरणे' (५७१) तक्ष् । काष्ठानि तक्ष्णुवन्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'म्नां धुड्वर्ग०' (१।३।३९) अनुनासिकः ।

**[गोरङ्क्षि कुलानि]** गा रक्षन्ति यानि कुलानि तानि, क्विप्प्र० ।

**[गोमन्ति कुलानि]** गावो विद्यन्ते येषु कुलेषु तानि = गोमति(न्ति) कुलानि । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'यावत् संभवस्तावद्विधिः (न्यायसंग्रहः द्वितीयो वक्षस्कारः/५६) पुनः नोऽन्तः प्राप्नोति, व्यञ्जन परइ छइ ॥छ॥

**र्लो वा ॥१।४।६७॥**

**[र्लः]** र् च ल् च = र्ल्, तस्मात् = र्लः । पञ्चमी ङसि ।

**[बहूर्ञ्जि, बहूर्जि]** 'ऊर्जण्' बल-प्राणनयोः' (१५८२) ऊर्ज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । ऊर्जयन्तीति क्विप् । 'णेरनिटि' (४।३।८३) णिच्लोपः । बहव ऊर्जो येषु कुलेषु तानि । प्रथमा जस्-द्वितीया शस् वा । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तो वा । 卐 'तवर्गस्य०' (१।३।६०) न० → ञ० ।

**[सुवल्ङ्गि, सुवल्गि]** उख (६३) - नख (६४) - णख (६५) - वख (६६) - मख (६७) - रख (६८) - लख (६९) - मखु (७०) - रखु (७१) - लखु (७२) - रिखु (७३) - इख (७४) - इखु (७५) - ईखु (७६) - 'वल्ग गतौ' (७७) वल्ग्, सुपूर्व० । सुष्ठु वल्गन्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

**[काष्ठतङ्क्षि]** 'तक्षौ तनूकरणे' (५७१) तक्ष्, काष्ठ पूर्व० । काष्ठानि तक्ष्णुवन्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'म्नां धुड्वर्गे०' (१।३।३९) वर्ग्यान्त्ये ।

**[सुफुल्लि वनानि]** 'फुल्ल विकसने' (४२९) फुल्ल् । सुष्ठु फुल्लन्तीति यानि वनानि तानि क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस्-द्वितीया शस् वा । 'नपुंसकस्य शिः' (१।४।५५) शि → इ० ॥छ॥

**घुटि ॥१।४।६८॥**

**[घुटि]** घुट् सप्तमी ङि ॥छ॥

---

P. 卐 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) वर्ग्यान्त्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अचः ॥१।४।६९॥**

**[प्राङ्]** 'अञ्चू गतौ च' (१०५) अञ्चू, प्रपूर्व० । प्राञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमा सि । अनेन नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० । 'समानानां०' (२।१।१) दीर्घः ।

**[अतिप्राङ्]** प्राञ्चमतिक्रान्तो यः स = अतिप्राङ् । प्रथमा सि । शेषं पूर्ववत् ।

**[प्राञ्चौ]** प्राञ्चतः इति क्विप् प्राञ्चौ । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमा औ । अनेन नोऽन्तः । 'तवर्गस्य०' (१।३।६०) न० → ञ० ।

**[प्राञ्चः]** प्राञ्चन्तीति क्विप् प्राञ्चः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्रथमा जस् । अनेन नोऽन्तः । 'तवर्गस्य०' (१।३।६०) न० → ञ०

**[प्राञ्चम्]** प्राञ्चतीति क्विप् प्राञ्चम् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । द्वितीय अम् । अनेन नोऽन्तः । 'तवर्गस्य०' (१।३।६०) न० → ञ०

**[प्राञ्चि कुलानि]** प्राञ्चन्तीति यानि कुलानि तानि = प्राञ्चि कुलानि । क्विप्प्र० । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'तवर्गस्य श्चवर्ग०' (१।३।६०) न० → ञ० ।

**[प्राचः पश्य]** प्राञ्चन्तीति प्राञ्चस्तान् ।।छ।।

**ऋदुदितः ॥१।४।७०॥**

**[ऋदुदितः]** ऋच्च उच्च = ऋदुतौ, 卐 ऋदुतौ इत् अनुबन्धो यस्याऽसौ ऋदुदित्, तस्य ।

**[कुर्वन्]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कुर्वन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कृग्-तनादेरुः' (३।४।८३) उ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'इवर्णादि०' (१।२।२१) वत्वम् ।

**[अधीयन्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० अकृच्छ्रेणाऽधीतेऽधीयन् । 'धारीङोऽकृच्छ्रेऽतृश्' (५।२।२५) अतृश्प्र० → अत् । प्रथमा सि । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इय् । अनेन नोऽन्तः । 'समानानां०' (१।२।१) दीर्घः ।

**[सुदन् बालः]** शोभना दन्ता यस्याऽसौ सुदन् । 'वयसि दन्तस्य दतृः' (७।३।१५१) दतृ-ददादेशः । प्रथमा सि । अनेन नोऽन्तः ।

**[चकृवान्]** 'डुकृंग् करणे' (८८८) कृ । चक्रे = चकृवान् । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र०→वस् । 'द्विर्धातुः०', (४।१।१) द्विर्वचनं । 'ऋतोऽत्' (४।१।३८) ऋ० → अकारु । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । प्रथमा सि । अनेन नोऽन्तः ।

**[विद्वान्]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस् । प्रथमा सि । अनेन नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः ।

**[गोमान्]** गो । गावो विद्यन्ते यस्याऽसौ गोमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । प्रथमा सि । अनेन नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः ।

---

P. 卐 ऋदुतौ इतौ अनुबन्धौ यस्य स. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[श्रेयान्]** श्रेयस् । प्रथमा सि । अनेन नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

**[सम्राट्]** सम्राट् (१।३।१६) सूत्रवत् साध्यः ॥छ॥

**युज्रोऽसमासे ॥१।४।७१॥**

**[युज्रोऽसमासे]** युजृ षष्ठी ङस् । 'इवर्णादे०' (१।२।२१) रत्वं । समस्यन्ते = संक्षिप्यन्ते पदान्यत्रेति समासः । न समासोऽसमासः । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[युङ्]** 'युजूंपी योगे' (१४७६) युज् । युनक्तीति क्विप् युङ् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । अनेन नोऽन्तः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० । 'पदस्य' (२।१।८९) जलोपः ।

**[युञ्जौ]** युङ्क्तः इति क्विप् युञ्जौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन नोऽन्तः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ञ० ।

**[युञ्जः]** युञ्जन्तीति क्विप् युञ्जः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन नोऽन्तः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते०' (१।३।३९) न० → ञ० ।

**[युञ्जम्]** युनक्तीति क्विप् युञ्जम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । द्वितीया अम् । अनेन नोऽन्तः । 'म्नां धुड्वर्गे०' (१।३।३९) न० → ञ० ।

**[युञ्जि कुलानि]** युञ्जन्तीति यानि कुलानि तानि = युञ्जि कुलानि । क्विप्प्र० । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन नोऽन्तः । 'म्नां धुड्वर्गे०' (१।३।३९) न० → ञ० ।

**[बहुयुङ्]** युनक्तीति क्विप् युङ् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । ईषदपरिसमाप्तो युङ् = बहुयुङ् । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहुप्र० ।

**[अश्वयुक्]** अश्वान् युनक्तीति क्विप् अश्वयुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[अश्वयुञ्जौ]** अश्वान् युङ्क्तः इति क्विप् अश्वयुजौ । प्रथमा औ. ।

**[अश्वयुजः]** अश्वान् युञ्जन्तीति क्विप् अश्वयुजः । प्रथमा जस् ।

**[युजमापन्ना मुनयः]** 'युजिंच् समाधौ' (१२५४) युज् । 卐 युज्यते इति क्विप् = युक्, [तां](तं) = युजं । द्वितीया अम् । 'पदिंच् गतौ' (१२५७) पद्, आङ्पूर्व० । आपद्यन्ते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र०→त । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) त०–द० → न० । प्रथमा जस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'समानानां०' (१।२।१) दीर्घः । मुनि । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[युजः पश्य]** युञ्जन्तीति क्विप् युञ्जस्तान् ।

**[युजी कुले]** युङ्क्तः इति क्विप् युजी । औ । 'औरीः' (१।४।५६) औ० → ई० ॥ छ ॥

**अनडुहः सौ ॥१।४।७२॥**

**[अनडुहः]** अनडुह् । षष्ठी ङस् ।

---

P. 卐 योजनं = युक् । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सौ] सि । सप्तमी ङि । 'ङिडौ' (१।४।२५) डौ० —> औ० । 'डित्यन्त्य०' (२।१।११४) इलोपः ।

[अनड्वान्] अनडुह् । प्रथमा सि । अनेन नोऽन्तः । 'वाः शेषे' (१।४।८२) उ० —> वा० । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) हलोपः ।

[प्रियानड्वान्] अनडुह् प्रियपूर्व० । प्रिया अनड्वाहो यस्याऽसौ प्रियानड्वान् । प्रथमा सि । अनेन नोऽन्तः । 'वाः शेषे' (१।४।८२) उ० —> वा० । 'पदस्य' (२।१।८९) हलोपः । एकत्ववृत्तेरनडुहः 'पुमनडुन्नौ-पयो-लक्ष्म्या एकत्वे' (७।३।१७३) कच् प्राप्नोति, अतो बहुत्वे विग्रहः करणम् ॥छ॥

पुंसोः पुमन्स् ॥१।४।७३॥

[पुंसोः] पुम्सु मांडियइ । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ओ. । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

[पुमन्स्] पुमन्स् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[पुमान्] पुम्स् । प्रथमा सि । अनेन पुमन्स् । 'न्स्महतोः' (१।४।८६) दीर्घत्वं । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

[प्रियपुमान्] प्रियाः पुमांसो यस्याऽसौ प्रियपुमान् । प्रथमा सि । अनेन पुमन्स् । 'न्स्महतोः' (१।४।८६) । दीर्घत्वं । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

[प्रियपुमांसि कुलानि] प्रियाः पुमांसो येषु कुलेषु तानि = प्रियपुमांसि कुलानि । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० —> इ० । अनेन पुमन्सादेशः । 'न्स्महतोः' (१।४।८६) दीर्घत्वं । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । अत्रापि एकत्ववृत्तेः 'पुमनडुन्नौ-पयो-लक्ष्म्या एकत्वे' (७।३।१७३) कच् प्राप्नोति, अतो बहुत्वे वृत्तिः ।

[बहुपुंसी कुले] बहवः पुमांसो ययोः ते । औ । 'औरीः' (१।४।५६) ई० ।

[प्रियपुंसितरा, प्रियपुंस्तरा, प्रियपुंसीतरा] प्रियाः पुमांसो यस्याः सा = प्रियपुंसी । 'अधातूदृदितः' (२।४।२) ङीप्र० —> ई० । इयं पुंसी- इयं पुंसी, इयमनयोर्मध्ये प्रियपुंसी [प्रकृष्टा पुंसी] = प्रियपुंसीतरा । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० —> तर. । 'आत्' (२।४।१८) आप् । 'ऋदुदित्-तर-तम-रूप-कल्प-ब्रुव-चेलड्-गोत्र-मत-हते वा ह्रस्वश्च' (३।२।६३) ह्रस्वः । द्वितीये पुंवद्भावश्च सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ॥छ॥

ओत औ ॥१।४।७४॥

[ओत औ] ओत् । षष्ठी ङस् । औ । प्रथमा सि । सूत्रत्वात्------- ।

[गौः] गो । प्रथमा सि । अनेन औ । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[गावौ] गो । प्रथमा औ । अनेन औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

[द्यौः] द्यो । प्रथमा सि । अनेन औ । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[द्यावौ] द्यो । प्रथमा औ । अनेन औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

[लौः] लुनातीति लौः । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच् लोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । अनेन औ ।

[अतिगौः] गामतिक्रान्तोऽसौ ।

[प्रियद्यावौ] प्रिया द्यौर्ययोस्तौ = प्रियद्यावौ । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुम्वत् । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अतिद्यावौ] द्यामतिक्रान्तौ [यौ] तौ ।

[किंगौः] कुत्सितो गौः ।

[अगौः] न गौः = अगौः ।

[चित्रगुः] चित्रा गौर्यस्याऽसौ चित्रगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुम्वत्०- चित्रा० → चित्र० क्रियते ।

[चित्रगू] चित्रा गौर्ययोः [तौ] चित्रगू । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्' (३।२।४९) पुम्वत्०- चित्रा० → चित्र० क्रियते ।।छ।।

## आ अम्-शसोऽता ।।१।४।७५।।

[आ अम्-शसोऽता] आ । प्रथमा सि । 'सो रुः' (२।१।७२) र० । अम् च शस् च = अम्शस्, तस्य अम्शसः, षष्ठी ङस् । अत् तृतीया टा. ।

[गाम्] गो । द्वितीया अम् । अनेन ।

[सुगाम्]卐 शोभना गौर्यस्य स सुगौः, तं = सुगां । द्वितीया अम् । अनेन ।

[गाः] गो । द्वितीया शस् । अनेन ।

[सुगाः पश्य] +शोभना गावो येषां ते = सुगावस्तान् = सुगाः । द्वितीया शस् । अनेन ।

[द्याम्] द्यो । द्वितीया अम् । अनेन ।

[अतिद्याम्] द्यामतिक्रान्तो योऽसौ = अतिद्यौः, तं(तां) = अतिद्यां । द्वितीया अम् । अनेन ।

[द्याः] द्यो । द्वितीया शस् । अनेन ।

[सुद्याः पश्य] * शोभना द्यौर्येषां ते = सुद्यावस्तान् = सुद्याः । द्वितीया शस् । अनेन ।

[अचिनवम्] 'चिंगट् चयने' (१२९०) चि । ह्यस्तनी अम्व् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ? ।) 'उ-श्नोः' (४।३।२) गु० ओ.) । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः ।।छ।।

## पथिन्-मथिनृभुक्षः सौ ।।१।४।७६।।

[पथिन्मथिनृभुक्षः] पथिन्-मथिन्-ऋभुक्षिन् । पन्थाश्च मन्थाश्च ऋभुक्षाश्च = पथिन्मथिन्ऋभुक्षि, तस्य = पथिन्मथिनृभुक्षः, षष्ठी ङस् । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लोपः ।

[सौ] सि । सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

[पन्थाः] पथिन् । प्रथमा सि । 'थो न्थ्' (१।४।७८) न्थ् । 'एः' (१।४।७७) इकारस्य आ । अनेन नस्य आ । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

[हे पन्था!] पथिन् । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । शेषं पूर्ववत् ।

[मन्थाः] मथिन् । प्रथमा सि । शेषं 'पन्थाः' वत् ।

[हे मन्थाः!] मथिन् । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । शेषं 'पन्थाः' वत् ।

---

P. 卐 शोभना गौः=सुगौः, तम् । P. + शोभना गावः=सुगावः, ताः । P. * शोभना द्यावः = सुद्यावः, ताः = सुद्याः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ऋभुक्षाः]** ऋभुक्षिन् । प्रथमा सि । 'एः' (१।४।७७) इ० → आ० । अनेन नस्य आ । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[हे ऋभुक्षाः!]** ऋभुक्षिन् । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । शेषं पूर्ववत् ।

**[सुमन्थाः]** शोभनो मन्थाः = सुमन्थाः । प्रथमा सि । 'थो न्थ्' (१।४।७८) न्थ् । 'एः' (१।४।७७) इ० → आ० । अनेन नस्य आ. ।

**[बहुऋभुक्षाः]** ईषदून ऋभुक्षाः = बहुऋभुक्षाः ।

**[हे सुपथि कुल!]** शोभनः पन्था यत्र कुले तत् = सुपथि, तस्य संबोधनं हे सुपथि ! । 'आमन्त्र्ये' (२।२।३२) सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[हे सुमथि कुल!]** शोभनो मन्था यत्र कुले तत् = सुमथि, तस्य संबोधनं हे सुमथि ! ।

**[पथीः]** पन्थानमिच्छति । 'अमाव्ययात्' क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नं क्ये' (१।१।२२) पदसंज्ञा ज्ञातव्या । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीघश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पथीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[मथीः]** मन्थानमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नं क्ये' (१।१।२२) पदसंज्ञा ज्ञातव्या । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । मथीयतीति क्विप् । शेषं 'पथीः' वत् ।

**[ऋभुक्षीः]** ऋभुक्षाणमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नं क्ये' (१।१।२२) पदसंज्ञा ज्ञातव्या । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । ऋभुक्षीयतीति क्विप् । शेषं 'पथीः' वत् ।। छ ।।

**एः ।।१।४।७७।।**

**[एः]** इ । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[सुपन्थानि वनानि(कुलानि)]** शोभनः पन्था येषु कुलेषु, तानि । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'थो न्थ्' (१।४।७८) न्थ् । अनेन इ० → आ० ।

**[बहुमन्थानि कुलानि]** बहवो मन्थानो येषु कुलेषु, तानि. ।

**[अनृभुक्षाणि बलानि]** न विद्यते ऋभुक्षाः = इन्द्रो येषु, तानि । 'अन् स्वरे' (३।२।१२९) अन्. ।

**[सुपन्थानौ]** शोभनौ पन्थानौ ।

**[परममन्थानौ]** परमौ च तौ मन्थानौ च = परममन्थानौ ।

**[पथ्यौ]** पन्थानमिच्छतः । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पथीयत इति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । प्रथमा औ । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[पथ्यः]** पन्थानमिच्छन्ति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नाम्नो नोऽनह्नः' (२।१।९१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नलोपः । 'दीर्घश्चिव-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पथीयन्तीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । प्रथमा जस् । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[पथ्यम्]** पन्थानमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घश्चिव-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पथीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । द्वितीया अम् । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[सुमथी कुले]** शोभनो मन्था ययोः कुलयोः ते । प्रथमा औ । 'औरीः' (१।४।५६) ई. । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लोपः ॥ छ ॥

**थो न्थ् ॥१।४।७८॥**

**[थो न्थ्]** थ् । षष्ठी ङस् । न्थ् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ॥ छ ॥

**इन् ङी-स्वरे लुक् ॥१।४।७९॥**

**[इन्]** इन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[ङीस्वरे]** ङीश्च स्वरश्च = ङीस्वरं, तस्मिन् = ङीस्वरे, सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[लुक्]** लुक् । प्रथणा सि ।

**[सुपथी स्त्री कुले वा]** शोभनः पन्था यस्याः सा = सुपथी स्त्री । 'स्त्रियां नृतोऽस्वस्रादेर्डीः' (२।४।१) ङीप्र० → ई । शोभनः पन्था ययोः कुलयोः ते । प्रथमा औ । 'औरीः' (१।४।५६) ई. । अनेन इन्लोपः ।

**[सुमथी स्त्री कुले वा]** शोभनो मन्था यस्यां सा = सुमथी स्त्री । 'स्त्रियां नृतोऽस्वस्रादेर्डीः' (२।४।१) ङीप्र० → ई । शोभनो मन्था ययोः कुलयोः ते । प्रथमा औ । 'पुं-स्त्रियोः स्यमौ-जस्' (१।१।२९) प्रथमा औ नपुंसकु घुट्संज्ञा न । 'औरीः' (१।४।५६) ई० । अनेन इन्लोपः ।

**[अनृभुक्षी सेना कुले वा]** न विद्यन्ते ऋभुक्षाणः = इन्द्राः यस्यां सेनायां सा = अनृभुक्षी सेना । 'अन् स्वरे' (३।२।१२९) अन् । 'स्त्रियां नृतोऽस्वस्रादेर्डीः' (२।४।१) ङीप्र० । न विद्यन्ते ऋभुक्षाणः = इन्द्राः ययोः कुलयोः ते = अनृभुक्षी कुले । प्रथमा औ । 'औरीः' (१।४।५६) ई. । अनेन ॥ छ ॥

**वोशनसो नश्चामन्त्र्ये सौ ॥१।४।८०॥**

**[वोशनसः]** वा । अव्यउ । प्रथमा सि । उशनस् । षष्ठी ङस् ।

**[नश्चामन्त्र्ये]** न । प्रथमा सि । 'सो रुः' (२।१।७२) र० । च । प्रथमा सि । आमन्त्र्य । सप्तमी ङि ।

**[सौ]** सि । सप्तमी ङि ।

**[हे उशनन् !, हे उशन!, हे उशनः!]** 'वशक् कान्तौ' (११०१) वश् । वष्टीति उशनाः । 'वष्टेः कनस्' (उणा० ९८५) किद् अनस्प्र० । 'यजादि-वचेः किति' (४।१।७९)? ('वशेरयङि' (४।१।८३) य्वृत् व० → उ० ।) 'आमन्त्र्ये' (२।२।३२) सि । अनेन स० → न० क्रियते । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । द्वितीये सलोपः । 'अदेतः स्यमोर्लुक्' (१।४।५७) सिलोपः । तृतीये 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[उशना]** उशनस् । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## उतोऽनडुच्चतुरो वः ॥१।४।८१॥

**[उतोऽनडुच्चतुरः]** उत् । षष्ठी ङस् ।* अनडुच्च चतुर् च = अनडुच्चतुर्, तस्य = अनडुच्चतुरः, षष्ठी ङस् । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) ह० → द० । 'तवर्गस्य०' (१।३।६०) द० → ज० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ज० → च० ।

**[वः]** व । प्रथमा सि ।

**[हे अनड्वन्!]** अनडुह् । 'आमन्त्र्ये' (२।२।३२) सि । हे प्राग् । 'अनडुहः सौ' (१।४।७२) नोऽन्तः । अनेन उ० → व० । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । पदस्य (२।१।८९) हलोपः ।

**[हे प्रियानड्वन्!]** प्रिया अनड्वाहो यस्याऽसौ प्रियानड्वान्, तस्य संबोधनं हे प्रियानड्वन् । 'आमन्त्र्ये' (२।२।३२) सि । 'अनडुहः सौ' (१।४।७२) नोऽन्तः । अनेन उ०→व० । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) हलोपः ।

**[हे अतिचत्वः!]** चत्वारमतिक्रान्तो [यो] असौ, तस्य संबोधनं हे अतिचत्वः ! । 'आमन्त्र्ये' (२।२।३२) सि । अनेन उ० → व० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[हे प्रियचत्वः!]** प्रियाश्चत्वारो यस्याऽसौ प्रियचत्वाः, तस्य संबोधनं हे प्रियचत्वः ! ॥ छ ॥

## वाः शेषे ॥१।४।८२॥

**[अनड्वान्]** अनडुह् । प्रथमा सि । अनेन उ० → वा० । 'अनडुहः सौ' (१।४।७२) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) हलोपः ।

**[अनड्वाहौ]** अनडुह् । प्रथमा औ । अनेन उ० → वा० ।

**[प्रियानड्वांहि कुलानि]** प्रिया अनड्वाहो येषु कुलेषु तानि । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । अनेन वाऽऽदेशः ।

**[प्रियचत्वाः]**卐 प्रियाश्चत्वारो यस्याऽसौ ।

**[प्रियचत्वारौ]**+ प्रियाश्चत्वारो ययोस्तौ ।

**[प्रियचत्वारः]** प्रियाश्चत्वारो येषां ते ।

**[हे प्रियचत्वः !]** चतुर् प्रियापूर्व० । प्रियाश्चतस्रो यस्याऽसौ प्रियचत्वाः, तस्य संबोधनं क्रियते हे प्रियचत्वः ! । 'आमन्त्र्ये' (२।२।३२) सि । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । 'उतोऽनडुच्चतुरो वः' (१।४।८१) उ० → व० । 'दीर्घङ्या०' (१।४।४५) सिलोपः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रियानडुही कुले]** प्रिया अनड्वाहो ययोः कुलयोः ते । प्रथमा औ । 'औरीः' (१।४।५६) ई० ॥ छ ॥

## सख्युरितोऽशावैत् ॥१।४।८३॥

**[सख्युरितोऽशावैत्]** सखि । षष्ठी ङस् । 'इवर्णादे०' (१।२।२१) यत्वं । 'खि-ति-खी-तीय उर्' (१।४।३६) उर् । इत् । षष्ठी ङस् । न शि(:) = अशि(:) । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् । ऐत् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[सुसखायौ]** शोभनः सखा ययोः, तौ ।

---

P. * अनड्वांश्च चत्वारश्च ।

P. 卐 प्रियाश्चतस्रो यस्याऽसौ प्रियचत्वाः । प्रथमा सि । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । अनेन उ० → वा० । 'रात् सः' (२।१।९०) सिलोपः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

P. + प्रियाश्चतस्रो ययोस्तौ प्रियचत्वारौ । प्रथमा औ । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । अनेन उ० → वा० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रियसखायः]** प्रियः सखा येषां, ते ।

**[अतिसखीनि]** पूजितः सखा येषु कुलेषु तानि = अतिसखीनि । अथवा सखायमतिक्रान्तानि यानि कुलानि तानि अतिसखीनि ।

**[प्रियसखीनि कुलानि तिष्ठन्ति पश्य वा]** प्रियः सखा येषु कुलेषु तानि ।

**[सख्यौ]** सखायमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।२१) यलोपः । प्रथमा औ । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[सख्यः]** सखायमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'प्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । प्रथमा जस् । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ॥ छ ॥

**ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः ॥१।४।८४॥**

**[ऋदुशनस्पुरुदंशोऽनेहसः]** ऋच्च उशनाश्च पुर(रु)दंशा च अनेहा च ऋदुशनस्पुर(रु)दंशोऽनेहस्, तस्मात् ।

**[सेर्डाः]** सि । षष्ठी ङस् । डा । प्रथमा सि ।

**[अतिपिता]** पितरमतिक्रान्तोऽतिपिता ।

**[अत्युशना]** उशनसमतिक्रान्तोऽसौ ।

**[प्रियपुरुदंशा]** प्रियः पुर(रु)दंशो यस्याऽसौ ।

**[अत्यनेहा]** अनेहसमतिक्रान्तोऽसौ ।

**[किंसखा]** कुत्सितः सखा ।

**[सुसखा]** पूजितः सखा = सुसखा ।

**[प्रियसखा]** प्रियः सखा यस्याऽसौ ।

**[सखीः]** सखायमिच्छति । 'अमाव्ययात्०' (३।४।२३) क्यन्प्र० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि ॥ छ ॥

**नि दीर्घः ॥१।४।८५॥**

**[नि दीर्घः]** न् । सप्तमी ङि । दीर्घ । प्रथमा सि ।

**[सुक्, सुग्]** सुघ्नमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) घलोपः ॥ छ ॥

**न्स्-महतोः ॥१।४।८६॥**

**[न्समहतोः]** न्स् च महच्च = न्समहतौ, तयोः = न्समहतोः ।

**[परमश्रेयान्]** परमः श्रेयान् यस्याऽसौ ।

**[अतिश्रेयान्]** श्रेयांसमतिक्रान्तोऽसौ ।

**[प्रियश्रेयान्]** प्रिया(:) श्रेयांसो यस्याऽसौ ।

**[प्रियपुमांसि कुलानि]** प्रियाः पुमांसो येषु कुलेषु तानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अतिमहान्]** महान्तमतिक्रान्तोऽसौ ।

**[प्रियमहान्]** प्रिया महान्तो यस्याऽसौ ।

**[सुहिंसौ]** 'हिसु हिंसायाम्' (१४९४) हिस्, सुपूर्व० । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः हिंस् । सुष्ठु हिंस्तः इति ।

**[सुहिंसः]** सुष्ठु हिंसन्तीति ।

**[सुकंसौ]** 'कसुकि गति-शातनयोः' (११२०) कस्, सुपूर्व० । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोन्तः कंस् । सुष्ठु कंसू (?) कंसाते इति ।

**[सुकंसः]** सुष्ठु कंसेति (?) (कंसंते) इति ।

**[श्रेयान्]** श्रेयांसमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । श्रेयस्यतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[महान्]** महान्तमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । महत्यतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।। छ ।।

**इन्-हन्-पूषा-ऽर्यम्णः शि-स्योः ।।१।४।८७।।**

**[इन्हन्पूषाऽर्यम्णः]** इन् च हन् च पूषा च अर्यमा च = इन्हन्पूषाऽर्यमा, तस्य ।

**[शिस्योः]** शिश्च सिश्च = शिसी, तयोः ।

**[दण्डीनि]** दण्ड । दण्डो विद्यते यस्याऽसौ । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन दीर्घः ।

**[स्रग्वीणि]** 'सृजंत् विसर्गे' (१३४९) सृज् । सृज्यत इति स्रग् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । [1]'अः सृजि-दृशोऽकिति' (४।४।१११) अकारु । 'इवर्णादे०' (१।२।२१) रत्वं ? 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) ज० → ग० । स्रग् विद्यते येषां तानि । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० ।

**[वाग्मीनि कुलानि]** वाच् । वाग् विद्यते येषु तानि । 'ग्मिन्' (७।२।२५) ग्मिन्प्र० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) ग० ।

**[भ्रूणहानि]** 'हनंक् हिंसा-गत्योः' (११००) हन्, भ्रूणपूर्व० । भ्रूणं हतवन्ति = भ्रूणहानि । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'नपुंसकस्य०' (१।४।५५) शि० ।

**[बहुवृत्रहाणि]** वृत्रं हतवान् । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । बहवो वृत्रहा (वृत्रहणो) येषु कुलेषु तानि ।

**[भ्रूणहा]** भ्रूणं हतवान् ।

**[वृत्रहा]** वृत्रं हतवान् ।

**[बहुपूषाणि]** वहुः पूषा येषु कुलेषु तानि ।

**[स्वर्यमाणि]** शोभनोऽर्यमा येषु कुलेषु तानि ।

**[दण्डिनौ]** दण्डो विद्यते ययोस्तौ ।

---

(१) बृहन्न्यासे श० न्यासानुसन्धाने 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्०' (२।१।६९) इत्यादि ज्ञापकनिपातनाद् रत्वे स्रज् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दण्डिनः]** दण्डो विद्यते येषां ते ।

**[दण्डिनम्]** दण्डो विद्यते यस्याऽसौ दण्डी, तम् ।

**[वृत्रहणौ]** वृत्रं हतवन्तौ । 'कवगैकस्वरवति' (२।३।७६) न० → ण० ।

**[वृत्रहणः]** वृत्रं हतवन्तो = वृत्रहणः ।[1] 'कवगैकस्वरवति' (२।३।७६) न० → ण० ।

**[वाग्ग्मिनौ]** वाग् विद्यते ययोस्तौ । 'ग्मिन्' (७।२।२५) ग्मिन्प्र० ।

**[वाग्ग्मिनः]** वाग् विद्यते येषां ते । 'ग्मिन्' (७।२।२५) ग्मिन्प्र० ॥ छ ॥

**अपः ॥१।४।८८॥**

**[अपः]** अप् । षष्ठी ङस् ।

**[स्वापौ]** शोभना आपो ययोस्तौ = स्वापौ ।

**[स्वापः]** शोभना आपो येषां ते । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः ॥ छ ॥

**नि वा ॥१।४।८९॥**

**[नि वा]** न् । सप्तमी ङि । वा । प्रथमा सि ।

**[स्वाम्पि, स्वम्पि]** शोभना आपो येषु तानि = स्वाम्पि । अनेन ।

**[अत्याम्पि, अत्यम्पि]** आपमतिक्रान्तानि (यानि) तानि ।

**[बह्वाम्पि, बह्वम्पि]** बहवः(?) (बह्व्यः) आपो येषु तडागेषु तानि ॥ छ ॥

**अभ्वादेरत्वसः सौ ॥१।४।९०॥**

**[अभ्वादेरत्वसः]** भू आदिर्यस्याऽसौ भ्वादि(:), न भ्वादि(:) = अभ्वादि(:) । 'नञत्' (३।२।१२५) न० → अ०, तस्य = अभ्वादेः । अतुश्च अस् च = अत्वस्, तस्य = अत्वसः, षष्ठी ङस् ।

**[सौ]** सि । सप्तमी ङि ।

**[भवान्]** 'भांक् दीप्तौ' (१०६१) भा । भातीति । 'भातेर्डवतुः' (उणा० ८८६) डिद् अवतुप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[कृतवान्]** 'डुकृंग् करणे' (८८८) कृ । करोति स्म = कृतवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । अनेन दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[गोमान्]** गावो विद्यन्ते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । अनेन दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[यवमान्]** यवा विद्यन्ते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । अनेन दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[अप्सराः]** अद्भ्यः सरन्ति = अप्सराः । प्रथमा सि । अनेन दीर्घः ।

**[स्थूलशिराः]** स्थूलं शिरो यस्याऽसौ ।

**[सुमनाः]** सुष्ठु मनो यस्याऽसौ ।

---

(१) स्यादिशब्दसमुच्चये - 'र-षृवर्णान्नो ण०' (२।३।६३) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पिण्डग्रः]** 'ग्रसूङ् अदने' (८५४) ग्रस्, पिण्डपूर्व० । पिण्डं ग्रसते = पिण्डग्रः। 'क्विप्' (५।१।१४८) क्विप्प्र० ।

**[चर्मवः]** 'वसिक् आच्छादने' (१११७) वस्, चर्मन्पूर्व० । चर्म वस्ते = चर्मवः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[खरणाः]** खरवन्नासिका यस्याऽसौ खरणाः । 'खर-खुरान्नासिकाया नस्' (७।३।१६०) नासिका० → नस्आदेशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[खुरणाः]** खुरवन्नासिका यस्याऽसौ खुरणाः । 'खर-खुरान्नासिकाया नस्' (७।३।१६०) नासिका० → नस्आदेशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[गोमान्]** गोमन्तमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र०→य० । गोमय(त्य)तीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[स्थूलशिराः]** स्थूलशिरसमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । स्थूलशिरस्यतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) र० । अनेन ।

**[पचन्]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पचन् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[जरन्]** 'जॄण वयोहानौ' (१९४७) जॄ । जरतीति जरन् ? 'जॄष्च् जरसि' (११४५) जॄ । जीर्यति स्म । 'जॄषोऽतृः' (५।१।७३) अतृप्र० → अत् । 'कर्तर्यन०' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।। छ ।।

### क्रुशस्तुनस्तृच् पुंसि ।।१।४।९१।।

**[क्रुशस्तुनस्तृच्]** क्रुश् । पञ्चमी ङसि । तुन् । षष्ठी ङस् । तृच् । प्रथमा सि ।

**[पुंसि]** पुम्स् । सप्तमी ङि । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[क्रोष्टा]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । क्रोशतीति । 'कृ-सि-कम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ० । प्रथमा सि । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । अनेन तृच् । 'तवर्गस्य०' (१।३।६०) त० → ट० । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[क्रोष्टारौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ]** क्रोशत इति, प्रथमा औ । क्रोशन्तीति, प्रथमा जस् । क्रोशतीति, द्वितीया अम् । क्रोशत इति, द्वितीया औ । 'कृ-सि-कम्यमि०' (उणा० ७७३) तुन्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ० । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । अनेन तृच् । 'तवर्गस्य०' (१।३।६०) त० → ट० । 'तृ-स्वसृ-नप्तृ-नेष्टृ०' (१।४।३८) आर् ।

**[अतिक्रोष्टा]** क्रोष्टारमतिक्रान्तोऽसौ ।

**[प्रियक्रोष्टा]** प्रियाः क्रोष्टारो यस्याऽसौ ।

**[कृशक्रोष्टूनि वनानि]** कृशाः क्रोष्टारो येषु वनेषु तानि ।। छ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**टादौ स्वरे वा** ॥१।४।९२॥

**[टादौ]** टा आदिर्यस्याऽसौ टादिस्तस्मिन् ।

**[स्वरे]** स्वर सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए ।

**[वा]** वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[क्रोष्ट्रा, क्रोष्टुना]** क्रोष्टु तृतीया टा । अनेन तृजादेशे 'इवर्णादि०' (१।२।२१) र० । तृजभावे 'टः पुंसि ना' (१।४।२४) टा० → ना० ।

**[क्रोष्ट्रे, क्रोष्टवे]** क्रोष्टु चतुर्थी ङे । अनेन तृजादेशे 'इवर्णादि०' (१।२।२१) र० । तृजभावे 'ङित्यदिति' (१।४।२३) उ० → ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[क्रोष्टुः, क्रोष्टोः]** क्रोष्टु पञ्चमी ङसि-षष्ठी ङस् । अनेन तृजादेशे 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'रः पदान्ते०' (१।३।५३) विसर्गः । तृजभावे 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[क्रोष्ट्रोः, क्रोष्ट्वोः]** क्रोष्टु षष्ठी-सप्तमी ओस् । अनेन तृजादेशे 'इवर्णादि०' (१।२।२१) र० । तृजभावे 'इवर्णादि०' (१।२।२१) व० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[क्रोष्टरि, क्रोष्टौ]** क्रोष्टु सप्तमी ङि । अनेन तृजादेशे 'अर्डौ च' (१।४।३९) अर् । तृजभावे 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[क्रोष्टून्]** क्रोष्टु द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) उ० → ऊ० - स्० → न्० ॥ छ ॥

**स्त्रियाम्** ॥१।४।९३॥

**[स्त्रियाम्]** स्त्री । सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) दाम् → आम् । 'स्त्रियाः' (२।१।५४) इय् ।

**[क्रोष्ट्री]** क्रोशतीति । 'कृ-सि-कम्यमि०' (उणा० ७७३) तुन्प्र० । 'लघोरुपा०' (४।३।४) गु० ओ० । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । अनेन तृच् । 'इवर्णादि०' (१।२।२१) रत्वम् ।

**[पञ्चक्रोष्टृभी रथैः]** पञ्चभिः क्रोष्ट्रीभिः क्रीतः, तैः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लोपः । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः । 'सो रुः' (२।१।७२) र० । 'रो रे लुग्०' (१।३।४१) रलोपः-ई ॥ छ ॥

*॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ प्रथमस्याऽध्यायस्य चतुर्थः पादः समाप्तः ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

# ॥ अथ द्वितीयाऽध्यायस्य प्रथमः पादः ॥

**त्रि-चतुरस्तिसृ-चतसृ स्यादौ** ॥२।१।१॥

**[त्रिचतुरस्तिसृचतसृ]** त्रि - चतुर् । त्रयश्च चत्वारश्च = त्रिचतुर्, तस्य । तिसृ-चतसृ । तिसा च चतसा च = तिसृचतसृ । प्रथमा सि । 卐 सूत्रत्वाल्लोपः ।

**[स्यादौ]** सि-आदि । सिरादिर्यस्याऽसौ स्यादिस्तस्मिन् = स्यादौ, सप्तमी ङि, 'ङिर्डौ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[तिस्रस्तिष्ठन्ति पश्य वा]** त्रि । प्रथमा जस्-द्वि० शस् । अनेन तिसृ आदेशः । 'ऋतो रः स्वरेऽनि' (२।१।२) रत्वं । 'सो रुः' (२।१।७२) र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० ।

**[चतस्रस्तिष्ठन्ति पश्य वा]** चतुर् । प्रथमा जस् - द्वि० शस् । अनेन चतसृ आदेशः । 'ऋतो रः स्वरेऽनि' (२।१।२) रत्वं । 'सो रुः' (२।१।७२) र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० ।

**[तिसृषु]** त्रि । सप्तमी सुप् । अनेन तिसृ आदेशः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[चतसृषु]** चतुर् । सप्तमी सुप् । अनेन चतसृ आदेशः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[प्रियतिसा पुरुषः]** प्रियास्तिस्रो यस्य सः । प्रथमा सि । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । अनेन तिसृ आदेशः । 'ऋदुशनस्-पुरुदंशो०' (१।४।७०) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[प्रियतिस्रौ]** प्रियास्तिस्त्रो ययोस्तौ ।

**[प्रियतिस्रः]** प्रियास्तिस्रो येषां ते ।

**[प्रियचतसा]** प्रियाश्चतस्रो यस्याऽसौ ।

**[प्रियचतस्रौ]** प्रियाश्चतस्रो ययोस्तौ ।

**[प्रियचतस्रः]** प्रियाश्चतस्रो येषां ते ।

**[प्रियतिसृ कुलम्]** प्रियास्तिस्रो यस्य कुलस्य तत् । प्रथमा सि । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । अनेन तिसृ आदेशः । 'अनतो लुप्' (१।४।५९) सिलोपः । कुल । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

---

P. 卐 'अनतो लुप्' (१।४।५९) सिलोपः । P. + आदि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रियतिसृणी]** प्रियास्तिस्रोऽनयोः कुलयोस्ते । प्रथमा औ । 'औरीः' (१।४।५६) ई० । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[प्रियतिसृणि]** प्रियास्तिस्रो येषु कुलेषु तानि । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[प्रियचतसृणी]** प्रियाश्चतस्रोऽनयोः कुलयोस्ते । प्रथमा औ । 'औरीः' (१।४।५६) ई० । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[प्रियचतसृणि]** प्रियाश्चतस्रो येषु कुलेषु तानि । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[प्रियत्रिकः]** प्रियास्तिस्रो यस्य पुरुषस्य स = प्रियत्रिकः । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क० । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रियचतुष्कः]** प्रियाश्चत्वारो (चतस्रो) यस्याऽसौ प्रियचतुष्कः । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क० । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) र० → ष० ।

**[प्रियत्रि कुलम्]** प्रियास्तिस्रो यत्र कुले तत् ।

**[प्रियचतुष्कुलम्]** प्रियाश्चतस्रो यत्र कुले तत् ।

**[प्रियत्रिः]** प्रियास्त्रयस्त्रीणि वा यस्याः सा ।

**[प्रियत्री]** प्रियास्त्रयस्त्रीणि वा ययोस्ते(तौ) ।

**[प्रियत्रयः]** प्रियास्त्रयस्त्रीणि वा येषां ते ।

**[प्रियचत्वाः]** प्रियाश्चत्वारश्चत्वारि वा यस्याः सा ।

**[प्रियचत्वारौ]** प्रियाश्चत्वारश्चत्वारि वा ययोस्तौ ।

**[प्रियचत्वारः]** प्रियाश्चत्वारश्चत्वारि वा येषां ते. ॥ छ ॥

### ऋतो रः स्वरेऽनि ॥२।१।२॥

**[ऋतो रः स्वरेऽनि]** ऋत् षष्ठी ङस् । र प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । स्वर सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. । न न् = अन् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् = अनि ।

**[तिस्रः]** त्रि । प्रथमा जस् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) तिसृ आदेशः । अनेन रत्वं । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[चतस्रस्तिष्ठन्ति पश्य वा]** चतुर् । प्रथमा जस्-द्वि० शस् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) चतसृ आदेशः । अनेन रत्वं । 'सो रुः' (२।१।७२) र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → स० ।

**[प्रियतिस्रौ]** प्रियास्तिस्रो ययोस्तौ । प्रथमा औ । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) तिसृ आदेशः । अनेन रत्वं भवति ।

**[प्रियतिस्त्र आगतं स्वं वा]** प्रियास्तिस्रो यस्याऽसौ प्रियतिसा, तस्मात्-तस्य वा ।

**[प्रियचतस्र आगतं स्वं वा]** प्रियाश्चतस्रो यस्याऽसौ प्रियचतसा, तस्मात्-तस्य वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रियतिस्रि]** प्रियास्तिस्रो यस्याऽसौ प्रियतिसा, तस्मिन् ।

**[प्रियचतस्रि निधेहि]** प्रियाश्चतस्रो यस्याऽसौ प्रियचतसा, तस्मिन् ।

**[प्रियतिसृणी]** प्रियास्तिस्रो ययोस्ते ।

**[प्रियचतसृणी]** प्रियाश्चतस्रो ययोस्ते ।

**[प्रियतिसृणि]** प्रियास्तिस्रो येषु तानि ।

**[प्रियचतसृणि]** प्रियाश्चतस्रो येषु तानि ।

**[तिसृणाम्]** त्रि । षष्ठी आम् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) तिसृ आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) न० → ण० ।

**[चतसृणाम्]** चतुर् । षष्ठी आम् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) चतसृ आदेशः । 'ह्रस्वाऽऽपश्च' (१।४।३२) नाम् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[प्रियतिस्रि, प्रियतिसरि]** प्रियास्तिस्रो यस्याऽसौ प्रियतिसा, तस्मिन् = प्रियतिसरि ।

**[प्रियचतस्रि, प्रियचतसरि]** प्रियाश्चतस्रो यस्याऽसौ प्रियचतसा, तस्मिन् = प्रियचतसरि ।

**[प्रियतिस्रौ, प्रियतिसरौ]** प्रियास्तिस्रो ययोस्तौ = प्रियतिसरौ ।

**[प्रियचतस्रौ, प्रियचतसरौ]** प्रियाश्चतस्रो ययोस्तौ = प्रियचतसरौ ।

**[प्रियतिस्रः, प्रियतिसरः]** प्रियास्तिस्रो येषां ते = प्रियतिसरः ।

**[प्रियचतस्रः, प्रियचतसरः]** प्रियाश्चतस्रो येषां ते = प्रियचतसरः ।

**[परमचतस्रः]** परमाश्च ते चतस्रश्च = परमचतस्रः ।

**[प्रियतिस्रौ, प्रियतिसरौ]** प्रियास्तिस्रो ययोस्तौ । 'अर्डौ च' (१।४।३९) अर् ।

**[प्रियचतस्रौ, प्रियचतसरौ]** प्रियाश्चतस्रो ययोस्तौ । 'अर्डौ च' (१।४।३९) अर् ।

**[प्रियतिस्रः, प्रियतिसुः आगतं स्वं वा]** प्रियास्तिस्रो यस्याऽसौ प्रियतिसा, तस्मात् - तस्य वा । विकल्पे 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[प्रियचतस्रः, प्रियचतसुः आगतं स्वं वा]** प्रियाश्चतस्रो यस्याऽसौ प्रियचतसा, तस्मात्-तस्य वा । विकल्पे 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[परमतिस्रः]** परमाश्च ते तिस्रश्च = परमतिस्रः ।

**[परमचतस्रः]** परमाश्च ते चतस्रश्च परमचतस्रः ।

**[प्रियतिस्रस्तिष्ठन्ति पश्य वा]** प्रियास्तिस्रो येषां ते- तान् वा. ।

**[प्रियचतस्रस्तिष्ठन्ति पश्य वा]** प्रियाश्चतस्रो येषां ते-तान् वा ।। छ ।।

### जराया जरस् वा ।।२।१।३।।

**[जराया जरस् वा]** जरा । षष्ठी ङस् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङस्० → यास्० । 'सो रुः' (२।१।७२) र० । जरस् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रलोपः । वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[जरसौ]** जरा । प्रथमा औ । अनेन जरस् ।

**[जरसः]** जरा । प्रथमा जस् । अनेन जरस् ।

**[अतिजरसौ, अतिजरौ (२)]** जरामतिक्रान्तौ (यौ) तौ = अतिजरसौ-अतिजरौ । प्रथमा - द्वितीया औ । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं । अनेन जरस् । पक्षे 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ. ।

**[अतिजरसः, अतिजराः]** जरामतिक्रान्ता (ये) ते ।

**[अतिजरसः, अतिजरान्]** जरामतिक्रान्ता (ये) ते-तान् ।

**[अतिजरसा, अतिजरेण]** जरामतिक्रान्तोऽसौ अतिजरा, तेन ।

**[अतिजरसैः, अतिजरैः]** जरामतिक्रान्ता (ये) ते = अतिजरास्तैः । एवमग्रेऽपि एकवचन-बहुवचनेषु समासो ज्ञेयः ।

**[अतिजरः, अतिजरसम्, अतिजरम्]** जरामतिक्रान्तं यत् कुलं तत् । प्रथमा सि-द्वितीया अम् । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'क्लीबे' (२।४।९७) ह्रस्वः । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अतिजरसी, अतिजरे तिष्ठतः पश्य वा]** जरामतिक्रान्तो ये कुले ते । प्रथमा-द्वितीया औ । 'औरीः' (१।४।५६) ई० ।

**[अतिजरांसि, अतिजराणि तिष्ठन्ति पश्य वा]** जरामतिक्रान्तानि यानि कुलानि तानि । प्रथमा जस्-द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । अनेन विकल्पे जरस् । द्वितीयस्थाने 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[जारेयः]** जरा । जराया अपत्यं = जारेयः । 'ड्याप्-त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० जा । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥ छ ॥

## अपोऽद् भे ॥२।१।४॥

**[अपोऽद् भे]** अप् षष्ठी ङस् । अद् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । भ सप्तमी ङि । 'अवर्णस्ये०' (१।२।२६) ए. ।

**[अद्भिः]** अप् । तृतीया भिस् । अनेन अप्स्थानेऽद् । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[स्वद्भ्याम्]** शोभना आपो ययोस्तडागयोस्तौ = स्वापौ, ताभ्यां = स्वद्भ्याम् । अनेनाऽद् । 'इवर्णादे०' (१।२।२१) वत्वम् ।

**[अत्यद्भ्याम्]** अतिशयिता आपो ययोस्तडागयोस्तौ = अत्यपौ, ताभ्याम् ।

**[अप्सु]** अप् । सप्तमी सुप् ।

**[अब्भक्षः]** 'भक्षण् अदने' (१७१७) भक्ष्, अप्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । अपां भक्षयतीति । 'अच्' (५।१।४९) अच्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः ॥ छ ॥

## आ रायो व्यञ्जने ॥२।१।५॥

**[आ रायो व्यञ्जने]** आ प्रथमा सि ।卐 सूत्रत्वाल्लोपः । रै षष्ठी ङस् । 'एदैतोऽयाय्' (१।२।२३) आय् । व्यञ्जन

P. 卐 'सो रुः' (२।१।७२) र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[राः]** 'रांक् दाने' (१०६९) रा । राति द्रव्यमिति रै । 'रातेर्डैः' (उणा० ८६६) डिद् ऐप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । प्रथमा सि । अनेन आ । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अतिराः]** रायमतिक्रान्तोऽसौ ।

**[रासु]** रै । सप्तमी सुप् । अनेन रा ।

**[अतिराभ्यां कुलाभ्याम्]**卐 रायमतिक्रान्ते ये कुले ते = अतिरिणी, ताभ्याम् । 'क्लीबे' (२।४।९७) ह्रस्वः । अनेन आ ।

**[अतिरासु कुलेषु]** रायमतिक्रान्तानि यानि कुलानि तानि = अतिरीणि, तेषु = अतिरासु । अनेन आ ।

**[रायः]** रै । प्रथमा जस् । 'एदैतोऽयाय्' (१।२।२३) आय् । 'लोकात्' (१।१।३) अ संहिता । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[रैसूत्रम्]** रायः सूत्रम् ।

**[रैभयम्]** रायो भयम् ॥ छ ॥

युष्मदस्मदोः ॥२।१।६॥

**[युष्मदस्मदोः]** युष्मद्-अस्मद् ।+ युष्मच्च अस्मच्च = युष्मदस्मदौ, तयोः = युष्मदस्मदोः, षष्ठी ओस् ।

**[त्वाम्]** युष्मद् । द्वितीया अम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'अमौ मः' (२।१।१६) अम् → म० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) युष्म् → त्वाऽऽदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[माम्]** अस्मद् । द्वितीया अम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) अस्म् → माऽऽदेशः । 'अमौ मः' (२।१।१६) अम् → म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अतित्वाम्]** युष्मद् अतिपूर्व० । त्वामतिक्रान्तोऽसौ अतित्वं, तं = अतित्वाम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वादेशः । 'अमौ मः' (२।१।१६) अम्→म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अतिमाम्]** अस्मद् अतिपूर्व० । मामतिक्रान्तोऽसौ अत्यहं, तं = अतिमाम् । द्वितीया अम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) मादेशः । 'अमौ मः' (२।१।१६) म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अतियुवाम्]** युवामतिक्रान्तौ (यौ) तौ = अतियुवां । प्रथमा-द्वितीया औ । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । अनेन आ. ।

---

P. 卐 रायमतिक्रान्ता ये ते = अतिरायी, ताभ्यां = अतिराभ्यां । तृतीया भ्याम् । अनेन रा. । कुल । तृतीया भ्याम् । 'अत आः स्यादौ०' (१।४।१) अ० → आ० ।

P. + युष्मच्च अस्मच्च = युष्मदस्मदी, तयोः = युष्मदस्मदोः, षष्ठी ओस् । 'लोकात्' (१।१।३) ओ संहिता । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अत्यावाम्]** आवामतिक्रान्तौ (यौ) तौ = अत्यावां । प्रथमा-द्वितीया औ । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) आवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । अनेन आ. ।

**[अतियुष्मान्]** युष्मानतिक्रान्तास्तेऽतियूयं, तान् = अतियुष्मान् । 'शसो नः' (२।१।१७) शस् → न० । अनेन आ. ।

**[अत्यस्मान्]** अस्मानतिक्रान्तास्तेऽतिवयं, तान् = अत्यस्मान् ।

**[अतियुवाभ्याम्]** युवामतिक्रान्तौ (यौ) तौ = अतियुवां, ताभ्यां = अतियुवाभ्याम् । अग्रे पूर्ववत् साध्यः ।

**[अत्यावाभ्याम्]** आवामतिक्रान्तौ (यौ) तौ अत्यावां, ताभ्यां = अत्यावाभ्याम् । अग्रे पूर्ववत् साध्यः ।

**[अतियुष्माभिः]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तैः = अतियुष्माभिः । अनेन द० → आ० ।

**[अत्यस्माभिः]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तैः = अत्यस्माभिः । अनेन द० → आ० ।

**[युष्मासु]** युष्मद् । सप्तमी सुप् । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अस्मासु]** अस्मद् । सप्तमी सुप् । अनेन द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अतियुष्मासु]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेषु = अतियुष्मासु । अनेन द० → आ० ।

**[अत्यस्मासु]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेषु = अत्यस्मासु । अनेन द० → आ० ।

**[त्वाम्]** युष्मद् । त्वामाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । युष्मयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । द्वितीया अम् । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वादेशः । 'अमौ मः' (२।१।१६) म० । अनेन आ. ।

**[माम्]** अस्मद् । मामाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अस्मयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप् लोपः । द्वितीया अम् । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) मादेशः । 'अमौ मः' (२।१।१६) म० । अनेन आ. ।

**[युवाम्]** युष्मद् । प्रथमा-द्वितीया औ । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । अनेन. ।

**[आवाम्]** अस्मद् । प्रथमा-द्वितीया औ । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) आवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । अनेन. ।

**[युवाभ्याम्]** युष्मद् । तृतीया भ्याम् । अग्रे पूर्ववत् साध्यः ।

**[आवाभ्याम्]** अस्मद् । तृतीया भ्याम् । अग्रे पूर्ववत् साध्यः ।

**[युष्मभ्यम्]** युष्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यमादेशः । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'लोकात्' (१।१।३) अ संहिता ।

**[अस्मभ्यम्]** अस्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यमादेशः । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'लोकात्' (१।१।३) अ संहिता ॥ छ ॥

### टाङ्योसि यः ॥२।१।७॥

**[टाङ्योसि यः]** टाश्च ङिश्च ओस् च = टाङ्योस्, तस्मिन् = टाङ्योसि, सप्तमी ङि । य प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[त्वया]** युष्मद् । तृतीया टा । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'लोकात्' (१।१।३) आ संहिता ।

**[मया]** अस्मद् । तृतीया टा । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) मादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'लोकात्' (१।१।३) आ संहिता. ।

**[अतित्वया]** त्वामतिक्रान्तोऽसौ अतित्वम्, तेन ।

**[अतिमया]** मामतिक्रान्तोऽसौ अत्यहम्, तेन ।

**[अतियुवया]** युवामतिक्रान्तोऽसौ अतित्वं, तेन = अतियुवया । तृतीया टा । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'लोकात्' (१।१।३) आ संहिता ।

**[अत्यावया]** आवामतिक्रान्तोऽसौ अत्यहं, तेन = अत्यावया । तृतीया टा । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) आवादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'लोकात्' (१।१।३) आ संहिता ।

**[अतियुष्मया]** युष्मानतिक्रान्तोऽसौ अतित्वम्, तेन ।

**[अत्यस्मया]** अस्मानतिक्रान्तोऽसौ अत्यहम्, तेन ।

**[त्वयि]** युष्मद् । सप्तमी ङि । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्वादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० ।

**[मयि]** अस्मद् । सप्तमी ङि । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) मादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० ।

**[प्रिययुवयि]** प्रिया यूयं यस्याऽसौ प्रियत्वं, तस्मिन् = प्रिययुवयि । अनेन य० ।

**[प्रियावयि]** प्रिया वयं यस्याऽसौ प्रियाहं, तस्मिन् = प्रियावयि । अनेन य० ।

**[प्रिययुष्मयि]** प्रिया यूयं यस्यासौ प्रियत्वम्, तस्मिन् ।

**[प्रियास्मयि]** प्रिया वयं यस्यासौ प्रियाहम्, तस्मिन् ।

**[युवयोः]** युष्मद् । षष्ठी ओस् । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[आवयोः]** अस्मद् । षष्ठी ओस् । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) आवादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन य० । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अतियुवयोः]** युवामतिक्रान्तौ (यौ) तौ = अतियुवां, तयोः ।

**[अत्यावयोः]** आवामतिक्रान्तौ (यौ) तौ = अत्यावां, तयोः ।

**[अतित्वयोः]** त्वामतिक्रान्तौ (यौ) तौ = अतित्वां, तयोः ।

**[अतिमयोः]** मामतिक्रान्तौ (यौ) तौ = अतिमां, तयोः ।

**[अतियुष्मयोः]** युष्मानतिक्रान्तौ (यौ) तो = अतियुवाम्, तयोः ।

**[अत्यस्मयोः]** अस्मानतिक्रान्तौ (यौ) तो = अत्यावाम्, तयोः ।

**[त्वत्]** युष्मद् । पञ्चमी ङसि । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । शेषे लुक्' (२।१।८) दलोपः । 'ङसेश्चाद्' (२।१।१९) ङसि → अद् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'धुटस्तृतीयः' (२।१।७६) द० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[मत्]** अस्मद् । पञ्चमी ङसि । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) मादेशः । शेषं 'त्वत्' वत् ॥ छ ॥

## शेषे लुक् ॥२।१।८॥

**[शेषे]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । शिष्यते स्वयमेवेति शेषः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० → ए० । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए. ।

**[लुक्]** 'लुञ्च अपनयने' (१०३) लुञ्च् । लुञ्चतीति । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[युष्मभ्यम्]** युष्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) भ्यस् → अभ्यम् । अनेन दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अस्मभ्यम्]** अस्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) भ्यस् → अभ्यम् । अनेन दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अतियुष्मभ्यम्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेभ्यः । चतुर्थीबहु० भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् । अनेन दलोपः ।

**[अत्यस्मभ्यम्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेभ्यः । चतुर्थीबहु० भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् । अनेन दलोपः ।

**[अतित्वद्]** त्वामतिक्रान्तोऽसौ अतित्वं, तस्माद् = अतित्वद्, पञ्चमी ङसि । 'ङसेश्चाद्' (२।१।१९) अद् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्वाऽऽदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन दलोपः । 'धुटस्तृतीयः' (२।१।७६) द० → द० ।

**[अतिमद्]** मामतिक्रान्तोऽसौ अत्यहं, तस्माद् = अतिमद्, पञ्चमी ङसि । 'ङसेश्चाद्' (२।१।१९) अद् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) मादेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेनः दलोपः । 'धुटस्तृतीयः' (२।१।७६) द० → द० ।

**[अतियुष्मद्]** युष्मानतिक्रान्ताः (ये) तेऽतियूयम्, तेभ्यः=अतियुष्मद्, पञ्चमीबहु० भ्यस् । 'ङसेश्चाद्' (२।१।१९) अद् । अनेन ।

**[अत्यस्मद्]** अस्मानतिक्रान्ताः (ये) तेऽतिवयम्, तेभ्यः=अत्यस्मद्, पञ्चमीबहु० भ्यस् । 'ङसेश्चाद्' (२।१।१९) अद् । अनेन ।

**[अतियुष्माकम्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेषां = अतियुष्माकम्, षष्ठी आम् । 'आम आकम्' (२।१।२०) आकम् । अनेन दलोपः ।

**[अत्यस्माकम्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेषां = अत्यस्माकम्, षष्ठी आम् । 'आम आकम्' (२।१।२०) आकम् । अनेन दलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[त्वयि]** युष्मद् । सप्तमी ङि । 'टाङ्योसि यः' (२।१।७) य० । शेषं पूर्ववत् ।

**[मयि]** अस्मद् । सप्तमी ङि । 'टाङ्योसि यः' (२।१।७) य० । शेषं पूर्ववत् ।। छ ।।

**मोर्वा ।।२।१।९।।**

**[मोर्वा]**卐 म् च म् च = मौ । 'स्यादावसंख्येयः' (३।१।११९) एकशेषः । तयोः = मोर् । षष्ठी ओस् । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[युष्मभ्यम्, युषभ्यम्]** युष्मद् २ । युवां युष्मान् वाऽऽचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । युष्मयन्तीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । तेभ्यश्चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् । अनेन. ।

**[अस्मभ्यम्, असभ्यम्]** अस्मद् २ । आवामस्मान् वाऽऽचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । अस्मयन्तीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । तेभ्यश्चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् । अनेन. ।। छ ।।

**मन्तस्य युवा-ऽऽवौ द्वयोः ।।२।१।१०।।**

**[मन्तस्य युवा-ऽऽवौ द्वयोः]** म् अन्ते यस्याऽसौ मन्तस्तस्य । युव् च आव् च = युवाऽऽवौ, प्रथमा औ । द्वि षष्ठी ओस् । 'आ द्वेरः' (२।१।४१) इ० → अ० । 'एद् बहुस्भोसि' (१।४।४) ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[युवाम्]** युष्मद् । प्रथमा औ । 'अमौ मः' (२।१।१६) म० । अनेन युव्० । 'युष्मदस्मदोः' (२।१।६) आत्वम् ।

**[आवाम्]** अस्मद् । प्रथमा औ । 'अमौ मः' (२।१।१६) म० । अनेन आव्० । 'युष्मदस्मदोः' (२।१।६) आत्वम् ।

**[अतियुवाम्]** युवामतिक्रान्तौ यौ तौ = अतियुवां । प्रथमा औ । 'अमौ मः' (२।१।१६) म० । अनेन । 'युष्मदस्मदोः' (२।१।६) आत्वम् ।

**[अत्यावाम्]** आवामतिक्रान्तौ यौ तौ = अत्यावां । प्रथमा औ । 'अमौ मः' (२।१।१६) म० । अनेन । 'युष्मदस्मदोः' (२।१।६) आत्वम् ।

**[अतियुवाभ्याम्]** युवामतिक्रान्तौ यौ तौ = अतियुवां, ताभ्यां = अतियुवाभ्याम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । अनेन युवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अत्यावाभ्याम्]** आवामतिक्रान्तौ यौ तौ = अत्यावां, ताभ्यां = अत्यावाभ्याम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । अनेन आवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अतियुवाभिः]** युवामतिक्रान्ता (ये) तेऽतियूयं, तैः = अतियुवाभिः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । अनेन युवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[अत्यावाभिः]** आवामतिक्रान्ता (ये) तेऽतिवयं, तैः = अत्यावाभिः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । अनेन आवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः ।

एवं चतुर्थी भ्याम्-भ्यसौ ज्ञेयः ।

**[अतियुवत्]** युवामतिक्रान्तोऽसौ अतित्वं, तस्मात् ।

---

P. 卐 मु । षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) उ० → ओ० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अत्यावत्]** आवामतिक्रान्तोऽसौ अत्यहं, तस्मात् ।

यथा पञ्चमी ङसिसमासस्तथा षष्ठी ङस्, सप्तमी ङ्यौ समासो ज्ञेयः । यथा तृतीया भ्याम्-भिसः समासस्तथा पञ्चमी भ्याम्-भ्यस्, षष्ठी ओस्-आम्, सप्तमी ओस्-सुप्सु समासो ज्ञेयः ।

**[युवकाभ्याम्]** कुत्सितौ युवकां, ताभ्याम् = युवकाभ्याम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । अनेन युवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[आवकाभ्याम्]** कुत्सितौ आवकां, ताभ्याम् = आवकाभ्याम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । अनेन आवादेशः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[युवयोः]** (२।१।७) सूत्रवत् ।

**[आवयोः]** (२।१।७) सूत्रवत् ।

**[अस्मदीयम्]** आवयोरिदं = अस्मदीयम् । 'दोरीयः' (६।३।३२) ईयप्र० ॥ छ ॥

**त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्** ॥२।१।११॥

**[त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्]** त्वश्च मश्च = त्वमौ, प्रथमा औ । समासारंभकं अन्यपदं उत्तरपदं, प्रत्ययश्च उत्तरपदं च = प्रत्ययोत्तरपदं, तस्मिन् । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । एक सप्तमी ङि । 'ङेः स्मिन्' (१।४।८) ङि० → स्मिन् ।

**[त्वाम्]** युष्मद् । द्वितीया अम् । अनेन त्व० । 'अमौ मः' (२।१।१६) अम् → म० । 'युष्मदस्मदोः' (२।१।६) द० → आत्वम् ।

**[माम्]** अस्मद् । द्वितीया अम् । अनेन म० । 'अमौ मः' (२।१।१६) अम् → म० । 'युष्मदस्मदोः' (२।१।६) द० → आत्वम् ।

**[अतित्वाम्]** त्वामतिक्रान्तौ यौ तौ = अतित्वां । प्रथमा औ । 'अमौ मः' (२।१।१६) औ → म० ।

**[अतिमां तिष्ठतः]** मामतिक्रान्तौ यौ तौ = अतिमां । प्रथमा औ । 'अमौ मः' (२।१।१६) औ → म० ।

**[अतित्वान्]** त्वामतिक्रान्ता (ये) तेऽतियूयं, तान् ।

**[अतिमान्]** मामतिक्रान्ता (ये) तेऽतिवयं, तान् ।

**[अतित्वया]** त्वामतिक्रान्तोऽसौ अतित्वम्, तेन ।

**[अतिमया]** मामतिक्रान्तोऽसौ अत्यहम्, तेन ।

**[अतित्वाभ्याम्]** त्वामतिक्रान्तौ = अतित्वा, ताभ्याम् ।

**[अतिमाभ्याम्]** मामतिक्रान्तौ = अतिमा, ताभ्याम् ।

**[अतित्वाभिः]** त्वामतिक्रान्ता (ये) तेऽतियूयं, तैः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[अतिमाभिः]** मामतिक्रान्ता (ये) तेऽतिवयं, तैः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

एवं चतुर्थी भ्याम्-भ्यसोः(सौ) समासो ज्ञेयः ।

**[अतित्वत्]** त्वामतिक्रान्तोऽसौ अतित्वं, तस्मात् ।

**[अतिमत्]** मामतिक्रान्तोऽसौ अत्यहं, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा पञ्चमी ङसिसमासस्तथा षष्ठी ङस्, सप्तमी ङ्यौ समासो ज्ञेयः । यथा तृतीया भ्याम्-भिसः समासस्तथा पञ्चमी भ्याम्-भ्यस्, षष्ठी ओस्-आम्, सप्तमी ओस्-सुप्सु समासो ज्ञेयः ।

**[त्वन्मयम्]** तवेदं = त्वन्मयम् । [१]'त्यदादेर्मयट्' (६।३।१५९) मयट्प्र० ? ('तस्येदम्' (६।३।१६०) मयट्प्र०→ मय ।) 'त्व-मौ प्रत्ययो०' (२।१।११) त्वादेशः ।

**[मन्मयम्]** ममेदं = मन्मयम् । 'त्यदादेर्मयट्' (६।३।१५९) मयट्प्र० ? ('तस्येदम्' (६।३।१६०) मयट्प्र०→ मय ।) 'त्व-मौ प्रत्ययो०' (२।१।११) मादेशः ।

**[त्वत्पुत्रः]** तव पुत्रः = त्वत्पुत्रः ।

**[मत्पुत्रः]** मम पुत्रः = मत्पुत्रः ।

**[त्वद्धितम्]** तव हितं = त्वद्धितम् ।

**[मद्धितम्]** मम हितं = मद्धितम् ।

**[त्वत्प्रधानः]** त्वं प्रधानोऽस्याऽसौ त्वत्प्रधानः ।

**[मत्प्रधानः]** अहं प्रधानोऽस्याऽसौ मत्प्रधानः ।

**[त्वदयति]** युष्मद् । त्वामाऽऽचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ. । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्वादेशः । ततः 'त्रन्त्यस्वरादेः' (७।४।४३) इत्यनेन अन्त्यलोपः कार्यं इत्युक्ते 'नैकस्वरस्य' (७।४।४४) इत्यनेन अन्त्यलोपस्य निषेधः ।

**[मदयति]** अस्मद् । मामाऽऽचष्टे । 'णिज्वहुलं०' (३।४।४२) णिच्प्र० । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) मादेशः । ततः 'त्रन्त्यस्वरादेः' (७।४।४३) इत्यनेन अन्त्यलोपः कार्यं इत्युक्ते 'नैकस्वरस्य' (७।४।४४) इत्यनेन अन्त्यलोपस्य निषेधः ।

**[त्वाप्]** त्वामाऽऽचष्टे त्वापयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । अनेन त्वादेशः । तन्मते आकारः त्वा क्रियते । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) पुरन्तः । त्वापयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[माप्]** मामाऽचष्टे मापयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादे' (७।४।४३) अद्लोपः । अनेन मादेशः । तन्मते आकारः मा क्रियते । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) पुरन्तः । मापयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[अधियुष्मद्]** त्वय्यधिकृत्य = अधियुष्मद् । 'प्रथमोक्तं० (३।१।१४८) अधिपूर्व० । प्रथमा सि । 'अनतो लुप्' (३।२।७) सिलोपः ।

**[अध्यस्मद्]** मय्यधिकृत्य = अध्यस्मद् । 'प्रथमोक्तं०' (३।१।१४८) अधिपूर्व० । प्रथमा सि । 'अनतो लुप्' (३।२।७) सिलोपः ॥ ॥

**त्वमहं सिना प्राक् चाऽकः ॥२।१।१२॥**

**[त्वमहं सिना प्राक् चाऽकः]** त्वं च अहं च = त्वमहं, प्रथमा औ । सूत्रत्वाल्लोपः । सि तृतीया टा । 'टः पुंसि ना' (१।४।२४) ना । प्राक् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । च प्रथमा सि । 'अव्ययस्य' (३।२।७)

१. 'त्यदादेर्मयट्' (६।३।१५९) पञ्चम्यन्तात् प्रभवत्यर्थे प्रवर्त्तते, न तु षष्ठ्यन्तात् इदमर्थे, षष्ठ्यन्तात् इदमर्थे 'तस्येदम्' (६।३।१६०) सूत्रमेव प्रवर्त्तते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिलोपः । अक् पञ्चमी ङसि ।

**[त्वम्]** युष्मद् । प्रथमा सि । अनेन त्वम् ।

**[अहम्]** अस्मद् । प्रथमा सि । अनेन अहम् ।

**[अतित्वम्]** त्वां युवां युष्मान् वा अतिक्रान्तो यः असौ अतित्वं । प्रथमा सि । अनेन ।

**[अत्यहम्]** मां आवां अस्मान् वा अतिक्रान्तो यः असौ अत्यहं । प्रथमा सि । अनेन ।

**[त्वकम्]** युष्मद् । कुत्सितोऽल्पोऽज्ञातो वा त्वं = त्वकं । प्रथमा सि । अनेन । 'लोकात्' (१।१।३) अम् विश्लेषयिइ । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ।

**[अहकम्]** अस्मद् । कुत्सितोऽल्पोऽज्ञातो वा अहं = अहकं । प्रथमा सि । अनेन । 'लोकात्' (१।१।३) अम् विश्लेषियइ । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ।। छ ।।

## यूयं वयं जसा ।।२।१।१३।।

**[यूयं वयं जसा]** यूयम् च वयम् च = यूयंवयं, प्रथमा औ । सूत्रत्वाल्लोपः । जस् तृतीया टा ।

**[यूयम्]** युष्मद् । प्रथमा जस् । अनेन ।

**[वयम्]** अस्मद् । प्रथमा जस् । अनेन ।

**[परमयूयम्]** परमाश्च ते यूयं च = परमयूयम् ।

**[परमवयम्]** परमाश्च ते वयं च = परमवयम् ।

**[प्रिययूयम्]** प्रियस्त्वं येषां, प्रियौ युवां येषां, प्रिया यूयं येषां ते = प्रिययूयम् । प्रथमा जस् । अनेन ।

**[प्रियवयम्]** प्रियोहं येषां, प्रियावावां येषां, प्रिया वयं येषां ते = प्रियवयम् । प्रथमा जस् । अनेन ।

**[यूयकम्]** कुत्सिताऽल्पाऽज्ञाता वा यूयं = यूयकम् । प्रथमा जस् । अनेन ।

**[वयकम्]** कुत्सिताऽल्पाऽज्ञाता वा वयं = वयकम् । प्रथमा जस् । अनेन । 'लोकात्' (१।१।३) अम् विश्लेष्यः । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक्प्र० ।। छ ।।

## तुभ्यं मह्यं ङ्या ।।२।१।१४।।

**[तुभ्यं मह्यं ङ्या]** तुभ्यं च मह्यं च = तुभ्यंमह्यं, प्रथमा औ । सूत्रत्वाल्लोपः । ङे तृतीया टा । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[तुभ्यम्]** युष्मद् । चतुर्थी ङे । अनेन ।

**[मह्यम्]** अस्मद् । चतुर्थी ङे । अनेन ।

**[प्रियतुभ्यम्]** प्रियस्त्वं, प्रियौ युवां, प्रिया यूयं वा यस्याऽसौ प्रियत्वं, तस्मै = प्रियतुभ्यं । चतुर्थी ङे । अनेन ।

**[प्रियमह्यम्]** प्रियोहं, प्रियावावां, प्रिया वयं वा यस्याऽसौ प्रियाहं, तस्मै = प्रियमह्यं । चतुर्थी ङे । अनेन ।

**[तुभ्यकम्]** कुत्सिताय-अल्पाय- अज्ञाताय वा तुभ्यं = तुभ्यकम् । चतुर्थी ङे । अनेन । 'लोकात्' (१।१।३) अम् विश्लेष्यः । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ।

**[मह्यकम्]** कुत्सिताय अल्पाय-अज्ञाताय वा मह्यं = मह्यकम् । चतुर्थी ङे । अनेन । 'लोकात्' (१।१।३) अम् विश्लेष्यः । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तव मम ङसा ॥२।१।१५॥**

**[तव मम ङसा]**卐 तव च मम च तवमम, प्रथमा औ । सूत्रत्वाल्लोपः । ङस् तृतीया टा ।

**[तव]** युष्मद् । षष्ठी ङस् । अनेन ।

**[मम]** अस्मद् । षष्ठी ङस् । अनेन ।

**[अतितव]** त्वामतिक्रान्तोऽसौ अतित्वं, तस्य = अतितव । षष्ठी ङस् । अनेन ।

**[अतिमम]** मामतिक्रान्तोऽसौ अत्यहं, तस्य = अतिमम । षष्ठी ङस् । अनेन ।

**[तवक]** कुत्सितस्य-अल्पस्य-अज्ञातस्य वा तव = तवक, षष्ठी ङस् । अनेन । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ।

**[ममक]** कुत्सितस्य-अल्पस्य-अज्ञातस्य वा मम = ममक, षष्ठी ङस् । अनेन । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अक् ॥ छ ॥

**अमौ मः ॥२।१।१६॥**

**[अमौ मः]** औश्च औश्च = आवौ । 'स्यादावसंख्येयः' (३।१।११९) एक औ लोपः । अम् च औश्च = अमौ, तस्य, षष्ठी ङस् । सूत्रत्वाल्लोपः । म प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[त्वाम्]** युष्मद् । द्वितीया अम् । अनेन ।

**[माम्]** अस्मद् । द्वितीया अम् । अनेन ।

**[अतित्वाम्]** त्वामतिक्रान्तोऽसौ अतित्वं, तं = अतित्वाम् । द्वितीया अम् । अनेन म० । शेषं पूर्ववत् ।

**[अतिमाम्]** मामतिक्रान्तोऽसौ अत्यहं, तं = अतिमाम् । द्वितीया अम् । अनेन म० । शेषं पूर्ववत् ।

**[युवाम्]** युष्मद् । प्रथमा-द्वितीया औ । अनेन म० ।

**[आवाम्]** अस्मद् । प्रथमा-द्वितीया औ । अनेन म० ।

**[अतियुवाम्]** युवामतिक्रान्तौ यौ तौ = अतियुवां । प्रथमा-द्वितीया औ । अनेन म. । 'मन्तस्य०' (२।१।१०) युव्० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । समानानां० (१।२।१) दीर्घः ।

**[अत्यावां तिष्ठतः पश्य वा]** आवामतिक्रान्तौ यौ तौ = अत्यावां । प्रथमा-द्वितीया औ । अनेन म० । 'मन्तस्य०' (२।१।१०) आव्० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः ॥ छ ॥

**शसो नः ॥२।१।१७॥**

**[शसो नः]** शस् षष्ठी ङस् । न प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[युष्मान्]** युष्मद् । द्वितीया शस् । अनेन. ।

**[अस्मान्]** अस्मद् । द्वितीया शस् । अनेन. ।

**[प्रियत्वान्]** प्रियस्त्वं येषां ते = प्रिययूयं, तान् = प्रियत्वान् । द्वि० शस् । अनेन ।

**[प्रियमान्]** प्रियोऽहं येषां ते = प्रियवयं, तान् = प्रियमान् । द्वि० शस् । अनेन ।

**[अतियुष्मान्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तान् ।

---

P. 卐 तवश्च ममश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अत्यस्मान्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तान् ॥ छ ॥

**अभ्यं भ्यसः ॥२।१।१८॥**

**[अभ्यं भ्यसः]** अभ्यम् प्रथमा सि ।卐 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । भ्यस् षष्ठी ङस् ।

**[युष्मभ्यं दीयते]** युष्मद् । चतुर्थी भ्यस् । अनेन. ।

**[अस्मभ्यं दीयते]** अस्मद् । चतुर्थी भ्यस् । अनेन. ।

**[प्रिययुष्मभ्यम्]** प्रियौ युवां येषां ते = प्रिययूयं, तेभ्यः = प्रिययुष्मभ्यस् । अनेन अभ्यम् । 'शेषे लुक्' (२।१।८) दलोपः ।

**[प्रियास्मभ्यम्]** प्रियावावां येषां ते = प्रियवयं, तेभ्यः = प्रियास्मभ्यस् । अनेन अभ्यम् । 'शेषे लुक्' (२।१।८) दलोपः ।

**[अतियुवभ्यम्]** युवामतिक्रान्ता ये तेऽतियूयं, तेभ्यः = अतियुवभ्यम् । अनेन । 'शेषे लुक्' (२।१।८) दलोपः ।

**[अत्यावभ्यम्]** आवामतिक्रान्ता ये तेऽतिवयं, तेभ्यः = अत्यावभ्यम् । अनेन । 'शेषे लुक्' (२।१।८) दलोपः ॥ छ ॥

**ङसेश्चाद् ॥२।१।१९॥**

**[ङसेश्चाद्]** ङसि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए. । 'एदोद्भ्यां ङसि ङसो रः' (१।४।३५) र० । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अद् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[त्वद्]** युष्मद् । पञ्चमी ङसि । अनेन अद् । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्व० । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[मद्]** अस्मद् । पञ्चमी ङसि । अनेन अद् । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) म० । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अतियुवद्]** युवामतिक्रान्तोऽसौ अतित्वं, तस्माद् = अतियुवद् । पञ्चमी ङसि । अनेन अद् ।

**[अत्यावद्]** आवामतिक्रान्तोऽसौ अत्यहं, तस्माद् = अत्यावद् । पञ्चमी ङसि । अनेन अद्. ।

**[अतियुष्मद्]** युष्मानतिक्रान्तोऽसौ अतित्वं, तस्मात् ।

**[अत्यस्मद्]** अस्मानतिक्रान्तोऽसौ अत्यहं, तस्मात् ।

**[युष्मद्]** युष्मद् । पञ्चमी भ्यस् । अनेन अद् । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अस्मद्]** अस्मद् । पञ्चमी भ्यस् । अनेन अद् । 'शेषे लुक्' (२।१।८) दलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अतित्वद्]** त्वामतिक्रान्ता ये तेऽतियूयं, तेभ्यः = अतित्वद् । पञ्चमी भ्यस् । अनेन अद् । 'शेषे लुक्' (२।१।८) दलोपः । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्व० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अतिमद्]** मामतिक्रान्ता ये तेऽतिवयं, तेभ्यः = अतिमद् । पञ्चमी भ्यस् । अनेन अद् । 'शेषे लुक्' (२।१।८) दलोपः । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

---

P. 卐 'अनतो लुप्' (१।४।५९) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अतियुष्मद्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेभ्योऽतियुष्मद् ।

**[अत्यस्मद्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेभ्योऽत्यस्मद् ॥ छ ॥

**आम आकम् ॥२।१।२०॥**

**[आम आकम्]** आम् षष्ठी ङस् । आकम् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[युष्माकम्]** युष्मद् । षष्ठी आम् । अनेन आकम् । 'शेषे लुक्' (२।१।८) दलोपः । 'समानानां०' (१।२।१) दीर्घः ।

**[अस्माकम्]** अस्मद् । षष्ठी आम् । अनेन आकम् । 'शेषे लुक्' (२।१।८) दलोपः । 'समानानां०' (१।२।१) दीर्घः ।

**[प्रिययुष्माकम्]** प्रिया यूयं येषां ते = प्रिययूयं, तेषाम् ।

**[प्रियास्माकम्]** प्रिया वयं येषां ते = प्रियवयं, तेषाम् ।

**[अतियुवाकम्]** युवामतिक्रान्ता ये तेऽतियूयं, तेषां = अतियुवाकं । षष्ठी आम् । अनेन । 'शेषे लुक्' (२।१।८) दलोपः । 'मन्तस्य०' (२।१।१०) युव० ।

**[अत्यावाकम्]** आवामतिक्रान्ता ये तेऽतिवयं, तेषां = अत्यावाकं । षष्ठी आम् । अनेन । 'शेषे लुक्' (२।१।८) दलोपः । 'मन्तस्य०' (२।१।१०) आव० ।

**[अतियुष्माकम्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेषां = अतियुष्माकम् ।

**[अत्यस्माकम्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेषां = अत्यस्माकम् ।

**[युष्माकम्]** युष्मानाचक्षते । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । युष्मयन्तीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । षष्ठी आम् । अनेन आकम् ।

**[अस्माकम्]** अस्मानाचक्षते । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । अस्मयन्तीति क्विप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । षष्ठी आम् । अनेन आकम् । आकमित्याकारो ण्यन्तार्थः ।

**[अतियुष्मयाम्]** युष्मानतिक्रान्ता (ये) तेऽतियूयं, तेषां = अतियुष्मयाम् ।

**[अत्यस्मयाम्]** अस्मानतिक्रान्ता (ये) तेऽतिवयं, तेषां = अत्यस्मयाम् ॥ छ ॥

**पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे ॥२।१।२१॥**

**[पदाद्]** 'पदिंच् गतौ' (१२५७) पद् । पद्यते = गम्यते कर्तृकर्मविशिष्टोऽर्थोऽनेनेति पदम् । 'वर्षादयः क्लीबे' (५।३।२९) अल्प्र० → अ । पञ्चमी ङसि ।

**[युग्विभक्त्यैकवाक्ये]** 'युजूंपी योगे' (१४७६) युज् । समानाधिकरणार्थं युनक्तीति युङ् । कर्त्तरि क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । युग् चासौ विभक्तिश्च = युग्विभक्तिस्तया युग्विभक्त्या । तृतीया टा । एकं च तद् वाक्यं च = एकवाक्यं, तस्मिन् ।

**[वस्-नसौ]** वस् च नस् च = वस्नसौ, प्रथमा औ. ।

**[बहुत्वे]**卐 बहोर्भावो = बहुत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । तस्मिन् ।

**[धर्म्मो वो रक्षतु]** 'धृंग् धारणे' (८८७) धृ । धरते = त्रायते दुर्गतिपातात् सुगतौ च धत्ते इति धर्म्मः । 'अर्तीरि-

P. 卐 बहूनां भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तु-सु-हु-सृ-घृ-धृ-शृ-क्षि-यक्षि-भा-वा-व्या-धा-पा-या- वलि- पदिनीभ्यो मः' (उणा० ३३८) मप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । 'र्हादर्ह०' (१।३।३१) द्वित्वं । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

[वः] युष्मद् । द्वि० शस् । अनेन वस् वा. ।

[रक्षतु] 'रक्ष पालने' (५६७) रक्ष् । पञ्चमी तुव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[धर्म्मो नो रक्षतु] अस्मद् । द्वि० शस् । अनेन नस् वा. ।

[धर्म्मो युष्मान् रक्षतु] युष्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

[धर्म्मोऽस्मान् रक्षतु] अस्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

[तपो वो दीयते] युष्मद् । चतुर्थी भ्यस् । अनेन वस् वा ।

[तपो नो दीयते] अस्मद् । चतुर्थी भ्यस् । अनेन नस् वा. ।

[तपो युष्मभ्यं दीयते] युष्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् ।

[तपोऽस्मभ्यं दीयते] अस्मद् । चतुर्थी भ्यस् । 'अभ्यं भ्यसः' (२।१।१८) अभ्यम् ।

[शीलं वः स्वम्] युष्मद् । षष्ठी आम् । अनेन वस् वा ।

[शीलं नः स्वम्] अस्मद् । षष्ठी आम् । अनेन नस् वा ।

[शीलं युष्माकं स्वम्] युष्मद् । षष्ठी आम् । 'आम आकम्' (२।१।२०) आकम् ।

[शीलमस्माकं स्वम्] अस्मद् । षष्ठी आम् । 'आम आकम्' (२।१।२०) आकम् ।

[युष्मान् धर्मो रक्षतु] युष्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

[अतियुष्मान् पश्यति] युष्मानतिक्रान्ता ये तेऽतियूयं, तान् = अतियुष्मान् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

[ओदनं पचत, युष्माकं भविष्यति] ओदन । द्वि० अम् । 'डुपचींष् पाके' (८९२) पच् । पञ्चमी त । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । युष्मद् । षष्ठी आम् । 'आम आकम्' (२।१।२०) आकम् । 'शेषे लुक्' (२।१।८) दलोपः । 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इडागमः । 'नामिनो गुणोऽक्ङिति' (४।३।१) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

[पटं वयत, अस्माकं भविष्यति] 'वेंग् तन्तुसन्ताने' (९९२) वे । पञ्चमी त. । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ॥ छ ॥

### द्वित्वे वाम्-नौ ॥२।१।२२॥

[द्वित्वे] द्वयोर्भावः = द्वित्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । सप्तमी ङि ।

[वाम्नौ] वाम् च 卐 नौ च = वाम्नौ । प्रथमा औ । सूत्रत्वाल्लोपः ।

[धर्मो वां रक्षतु] धर्म । प्रथमा सि । 'सो रुः' (२।१।७२) र० । युष्मद् । द्वि० औ । अनेन. ।

[धर्मो नौ रक्षतु] अस्मद् । द्वि० औ । अनेन. ।

---

P. 卐 पाठांतर - नौश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[धर्मो युवां रक्षतु]** युष्मद् । द्वि० औ । 'मन्तस्य०' (२।१।१०) युव्० ।

**[धर्म आवां रक्षतु]** अस्मद् । द्वि० औ । 'मन्तस्य०' (२।१।१०) आव्० ।

**[शीलं वां दीयते]** युष्मद् । चतुर्थी भ्याम् । अनेन ।

**[शीलं नौ दीयते]** अस्मद् । चतुर्थी भ्याम् । अनेन ।

**[शीलं युवाभ्यां दीयते]** युष्मद् । चतुर्थी भ्याम् । 'मन्तस्य०' (२।१।१०) युव्० ।

**[शीलमावाभ्यां दीयते]** अस्मद् । चतुर्थी भ्याम् । 'मन्तस्य०' (२।१।१०) आव्० ।

**[ज्ञानं वां स्वम्]** युष्मद् । षष्ठी ओस् । अनेन ।

**[ज्ञानं नौ स्वम्]** अस्मद् । षष्ठी ओस् । अनेन ।

**[ज्ञानं युवयोः स्वम्]** युष्मद् । षष्ठी ओस् । 'मन्तस्य०' (२।१।१०) युव्० । 'टाङ्योसि यः' (२।१।७) य० ।

**[ज्ञानमावयोः स्वम्]** अस्मद् । षष्ठी ओस् । 'मन्तस्य०' (२।१।१०) आव्० । 'टाङ्योसि यः' (२।१।७) य० ॥ छ ॥

**ङे-ङसा ते-मे ॥२।१।२३॥**

**[ङे-ङसा]**卐 ङे च ङस् च = ङेङस्, तेन = ङेङसा, तृ० टा. ।

**[ते-मे]** + ते च मे च = तेमे, प्रथमा औ । सूत्रत्वाल्लोपः ।

ङे-ङसेत्येकवचनं स्थानिभ्यामादेशाभ्यां च यथासंख्यनिवृत्त्यर्थम् ।

**[धर्मस्ते दीयते]** धर्म । प्रथमा सि । युष्मद् । च० ङे । अनेन ते । 'डुदांग्क् दाने' (११३८) दा । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) ईत्वम् ।

**[धर्मस्तुभ्यं दीयते]** युष्मद् । च० ङे । 'तुभ्यं मह्यं ङ्या' (२।१।१४) तुभ्यम् ।

**[धर्मो मे दीयते]** अस्मद् । च० ङे । अनेन मे ।

**[धर्मो मह्यं दीयते]** अस्मद् । च० ङे । 'तुभ्यं मह्यं ङ्या' (२।१।१४) मह्यम् ।

**[धर्मस्ते स्वम्]** युष्मद् । षष्ठी ङस् । अनेन ते । स्व । प्रथमा सि ।

**[धर्मो मे स्वम्]** अस्मद् । षष्ठी ङस् । अनेन मे ।

**[धर्मस्तव स्वम्]** युष्मद् । षष्ठी ङस् । 'तव मम ङसा' (२।१।१५) तव ।

**[धर्मो मम स्वम्]** अस्मद् । षष्ठी ङस् । 'तव मम ङसा' (२।१।१५) मम ॥ छ ॥

**अमा त्वा-मा ॥२।१।२४॥**

**[अमा]** अम् । तृ० टा ।

**[त्वा-मा]*** त्वा च मा च = त्वामा । प्रथमा औ । सूत्रत्वाल्लोपः ।

**[धर्मस्त्वा रक्षतु]** धर्म । प्रथमा सि । युष्मद् । द्वि० अम् । अनेन त्वा० ।

**[धर्मो मा रक्षतु]** अस्मद् । द्वि० अम् । अनेन मा ।

**[धर्मस्त्वां रक्षतु]** युष्मद् । द्वि० अम् । 'अमौ मः' (२।१।१६) म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

---

P. 卐 ङेश्च ङस् च । P. + तेश्च मेश्च । P. * त्वाश्च माश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) त्व० । 'समानानां०' (१।२।१) दीर्घः ।

**[धर्मो मां रक्षतु]** अस्मद् । द्वि० अम् । 'अमौ मः' (२।१।१६) म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) म० । 'समानानां०' (१।२।१) दीर्घः ॥ छ ॥

**असदिवाऽऽमन्त्र्यं पूर्वम्** ॥२।१।२५॥

**[असत्]** न सत् = असत् । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[इव]** इव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[आमन्त्र्यम्]** 'मन्त्रिण् गुप्तभाषणे' (१८४०) मन्त्र्, आङ्पूर्व० । **'चुरादिभ्यो णिच्'** (३।४।१७) णिच्प्र० । आमन्त्र्यते यत् तद् = आमन्त्र्यम् । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) **णिज्लोपः । प्रथमा** सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[पूर्वम्]** पूर्व । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

सति तस्मिन् यत् कार्यं तन्न भवति, असति यत् तद् भवति ॥ छ ॥

**जस्विशेष्यं वाऽऽमन्त्र्ये** ॥२।१।२६॥

**[जस्विशेष्यं]** जस् च तद् विशेष्यं च = जस्विशेष्यं । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[वाऽऽमन्त्र्ये]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । आमन्त्र्य सप्तमी ङि ।

**[जिनाः! शरण्या! युष्मान् शरणं प्रपद्ये, जिनाः! शरण्या! वः शरणं प्रपद्ये.]**

**[जिनाः!]** 'जिं अभिभवे' (८) जि । रागादीन् शत्रून् जयन्तीति जिनाः । 'जीण्-शी-दी-बुध्यवि-मीभ्यः कित्' (उणा० २६१) किद् नप्र० । 'आमन्त्र्ये' (२।२।३२) जस् ।

**[शरण्याः!]** शरणे साधवः = शरण्याः । 'तत्र साधौ' (७।१।१५) यप्र० । **'अवर्णवर्णस्य'** (७।४।६८) अलोपः । 'आमन्त्र्ये' (२।२।३२) जस् । 'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२) रलोपः ।

**[युष्मान्]** युष्मद् । द्वि० शस् । अनेन वा असत् । पक्षे

**[वः]** 'पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे' (२।१।२१) वस् ।

**[शरणम्]** शरण । द्वि० अम् ।

**[प्रपद्ये]** 'पदिंच् गतौ' (१२५७) पद्, प्रपूर्व० । वर्त्त० ए । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[जिनाः ! शरण्या ! अस्मान् रक्षत, जिनाः ! शरण्या ! नो रक्षत]**

**[अस्मान्]** अस्मद् । द्वि० शस् । अनेन वा असत् । पक्षे

**[नः]** 'पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे' (२।१।२१) नस् ।

**[रक्षत]** 'रक्ष पालने' (५६७) रक्ष् । पञ्चमी त । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[साधो ! सुविहित ! वोऽथो शरणं प्रपद्ये, साधो ! सुविहित ! नोऽथो रक्ष]**

**[साधो !]** साधु । 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ओ. ।

**[सुविहित!]** 'डुधांग्क् धारणे च' (११३९) धा, विपूर्व० । विधीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० →

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त. । 'धागः' (४।४।१५) हि आदेशः । सुपूर्व० शोभनं विहितं चारित्रं यस्याऽसौ सुविहितः, तस्य संबोधनं हे सुविहित ! 'आमन्त्र्ये' (२।२।३२) सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ।

**[वः]** युष्मद् । द्वि० शस् । अनेन असत्त्वे प्राप्ते 'नान्यत्' (२।१।२७) साधो ! इत्यस्य असदिव न भवति ।

**[नः]** अस्मद् । द्वि० शस् । अनेन । 'नान्यत्' (२।१।२७) असदिव न भवति ।

**[शरण्याः ! साधवो ! युष्मान् शरणं प्रपद्ये, शरण्याः! साधवो ! अस्मान् रक्षत]**

**[शरण्याः!]** शरण्य । आमन्त्र्ये जस् । अत्र आमन्त्र्यंतं जसन्तं विशेष्यं विशेषणस्य आमन्त्र्यस्य न, पूर्वयुष्मद्शब्देन व्यवहितत्वात्, अनेन असद्विकल्पो न भवति ।

**[आचार्या ! उपाध्याया ! युष्मान् शरणं प्रपद्ये]**

**[आचार्या !]** आचार्य ! 'आमन्त्र्ये' (२।२।३२) जस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'रोर्यः' (१।३।२६) र० → य० । 'स्वरे वा' (१।३।२४) यलोपः ।

**[उपाध्याया!]** उप+'इंड्क् अध्ययने' (११०४) इ, अधिपूर्व० । उपेत्याऽऽगत्य अधीयते यस्मादित्युपाध्यायः । 'इङोऽपादाने तु टिद् वा' (५।३।१९) घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः इ० → ऐ० । 'आमन्त्र्ये' (२।२।३२) जस् । 'अत आ स्यादौ०' (१।४।१) अ० → आ० । 'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२) रलोपः ।

अत्र विशेष्य-विशेषणाभावादनेन असद्वा न भवति ।। छ ।।

**नान्यत् ।।२।१।२७।।**

**[नान्यत्]** न अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अन्य प्रथमा सि । 'पञ्चतोऽन्यादेरनेकतरस्य दः' (१।४।५८) स० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[साधो! सुविहित! त्वा शरणं प्रपद्ये]**

**[साधो!]** साधु । 'आमन्त्र्ये' (२।२।३२) सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ओ. ।

**[सुविहित!]** सुविहित । 'आमन्त्र्ये' (२।२।३२) सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलोपः ।

**[त्वा]** युष्मद् । द्वि० अम् । 'अमा त्वा-मा' (२।१।२४) त्वा ।

**[साधो ! सुविहित ! मा रक्ष]**

**[मा]** अस्मद् । द्वि० अम् । 'अमा त्वा-मा' (२।१।२४) मा ।

अत्र परस्य 'असदिवाऽऽमन्त्र्यं पूर्वम्' (२।१।२५) इत्यसत्त्वेऽपि पूर्वविशेष्यपदाश्रया युष्मदस्मदादेशा भवन्ति ।।छ।।

**पादाद्योः ।।२।१।२८।।**

**[पादाद्योः]** 'पदिंच् गतौ' (१२५७) पद् । पद्यते पत्स्यते अपादि पेदे वेति पादः । 'पद-रुज-विश-स्पृशो घञ्' (५।३।१६) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पादस्यादी प्रादादी, तयोः ।

नियतपरिमाणमात्राक्षरपिण्डः पादः ।

मात्राश्च अक्षराणि च = मात्राक्षराणि, नियतपरिमाणानि च तानि मात्राक्षराणि च नियतपरिमाणमात्राक्षराणि, तेषां पिण्डः पाद इत्युच्यते ।

पादाद्योरिति द्विवचनं युष्मदस्मदोरभिसंबंधार्थम्, पादादावित्युच्यमाने आमन्त्र्यमभिसंबध्येत ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीरो विश्वेश्वरो देवो, युष्माकं कुलदेवता ।**
**स एव नाथो भगवानस्माकं पापनाशनः ॥१॥**

**[वीरः]** 'ईरिक् गति-कम्पनयोः' (१११५) ईर्, विपूर्व० । विशेषेण ईरयति = प्रेरयति अष्टप्रकारं कर्म इति वीरः ।卐 'अच्' (५।१।४९) अच्प्र० → अ० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[विश्वेश्वरः]** 'ईशिक् ऐश्वर्ये' (१११६) ईश् । ईष्टे इत्येवंशील ईश्वरः । 'स्थेश-भास-पिस-कसो वरः' (५।२।८१) वरप्र० । विश्वस्य ईश्वरो = विश्वेश्वरः । प्रथमा सि ।

**[देवः]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यति = स्तूयते सुरासुरैरिति देवः । 'अः' (उणा० २) अप्र० । 'लघोरुपान्त्यस्य' (४।३।४) ए० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

त्रयाणामपि 'घोषवति' (१।३।२१) र० → उ० ।

**[युष्माकम्]** युष्मद् । षष्ठी आम् । अनेन वस् निषेधः, पश्चात् 'आम आकम्' (२।१।२०) आकम् । 'शेषे लुक्' (२।१।८) दलोपः ।

**[कुलदेवता]** देव एव = देवता । 'भावे त्व-तल्' (७।१।५५) तल्प्र० → त० । 'आत्' (२।४।१८) आप् । कुले = गोत्रे देवता = कुलदेवता । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[स एव]** तद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० । 'तदः से स्वरे पादार्था' (१।३।४५) सिलोपः । एव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[नाथः]** 'नाथृङ् उपतापैश्वर्याशीःषु च' (७१६) नाथ् । नाथते इति नाथः । 'अच्' (५।१।४९) अच्प्र० → अ० । प्रथमा सि ।

**[भगवान्]** भगो = ज्ञानं विद्यते यस्याऽसौ भगवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[अस्माकम्]** अस्मद् । षष्ठी आम् । शेषं पूर्ववत् ।

**[पापनाशनः]** 'नशौच् अदर्शने' (१२०२) नश् । नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पापपूर्व० पापं नाशयतीति पापनाशनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

'यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते' (न्यायसंग्रहः २।६५) प्रथमपुरुषे अस्तु-भवतु ।

कः कर्ता ? स एव देव, किं नाम ? वीरः, किं विशिष्टः ? विश्वेश्वरः, पुनः किं विशिष्टः ? नाथः प्रभुः स्वामी, अतोपि किं विशिष्टः ? भगवान् ज्ञानवान् यः कुलदेवता, केषां ? युष्माकं, किमस्तु ? पापनाशनोऽस्तु पापस्फोटकोस्तु, केषां ? अस्माकम् ।

वीरु विश्वेश्वरु देवु भगवन्तु ज्ञानवन्तु नाथु सुप्रभु स्वामी तुम्हारु कुलदेवतासु अम्ह पापनाशनु पापस्फोटकु हो ।

---

卐 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पान्तु वो देशनाकाले, जैनेन्द्रा दशनांशवः ।**
**भवकूपपतज्जन्तुजातोद्धरणरज्जवः ॥२॥**

**[पान्तु]** 'पांक् रक्षणे' (१०६७) पा । पञ्चमी अन्तु ।

**[वः]** युष्मद् । द्वि० शस् । 'पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे' (२।१।२१) वसादेशः ।

**[देशनाकाले]** देशनायाः कालो = देशनाकालस्तस्मिन् ।

**[जैनेन्द्रा]** जिनानां = सामान्यकेवलिनां मध्ये इन्द्रो = जिनेन्द्रः, जिनेन्द्रस्य इमे = जैनेन्द्राः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः → ऐ । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । प्रथमा जस् । 'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२) रलोपः ।

**[दशनांशवः]** दशनानामंशवो = दशनांशवः, प्रथमा जस् । 'जस्येदोत्' (१।४।२२) उ० → ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[भवकूपपतज्जन्तुजातोद्धरणरज्जवः]** भव एव कूपो = भवकूपः, 'पत्लृ गतौ' (९६२) पत् । पततीति पतत् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । जन्तूनां जातं = जन्तुजातं, पतच्च तद् जन्तुजातं च = पतज्जन्तुजातं, भवकूपे पतज्जन्तुजातं = भवकूपपतज्जन्तुजातं, भवकूपपतज्जन्तुजातस्य समूहस्य उद्धरणं = भवकूपपतज्जन्तुजातोद्धरणं, भवकूपपतज्जन्तुजातोद्धरणे रज्जव इव = भवकूपपतज्जन्तुजातोद्धरणरज्जवः । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

पान्तु = रक्षन्तु, के कर्त्तारः ? दशनांशवः, दशनकिरणाः, किं विशिष्टाः, जैनेन्द्राः = तीर्थकरसत्काः, क्व? देशनाकाले, कान् ? वो युष्मान्, पुनः किं विशिष्टाः ? भवकूपपतज्जन्तुजातोद्धरणरज्जवः ।

देशनाकालि जिनेन्द्रसंबंधी या दशनांशु दशन-किरणं ते तुम्ह कहिं रक्षा करेहुं जिकि सा भवु भणियइ संसारु एउ जु भणत कुपु तीणि जुए त(ज)न्तुसमूहुं तीहं तणउं जु उद्धरणु तहिं विषइ रज्जुवरत्राशयः ॥ छ ॥

**चा-ऽह-ह-वैवयोगे ॥२।१।२९॥**

**[चाहहवैवयोगे]** चश्च अहश्च हश्च वाश्च एवश्च = चाहहवैवा(ः), चाहहवैवैर्योगश्चाहहवैवयोगस्तस्मिन् ।

**[ज्ञानं युष्मांश्च रक्षतु, अस्मांश्च रक्षतु]**

**[ज्ञानं]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञायते = निर्नी(र्णी)यते नवभावमनेनेति ज्ञानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[युष्मांश्च]** युष्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । अग्रे च अव्ययम् । 'नोऽप्रशानोऽनुस्वाराऽनुनासिकौ च पूर्वस्याऽधुट्परे' (१।३।८) न० → श०, पूर्वमनुस्वारः । अनेन वस्निषेधः ।

**[अस्मांश्च]** अस्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । अग्रे च अव्ययम् । 'नोऽप्रशानो०' (१।३।८) न० → श०, पूर्वमनुस्वारः । अनेन नस्निषेधः ।

**[ज्ञानं च शीलं च ते स्वम्, मे स्वम्]** एतयोश्चशब्देन युष्मदस्मदोर्योगो न, किन्तु ज्ञानशीलयोः ।
चाहहवैवैरित्येव सिद्धे योगग्रहणं साक्षाद् योगप्रतिपत्त्यर्थम् ॥ छ ॥

**दृश्यर्थैश्चिन्तायाम् ॥२।१।३०॥**

**[दृश्यर्थैः]** दृशिना समानोऽर्थो येषां ते = दृश्यर्थाः, तैः = दृश्यर्थैः, तृतीया भिस् । 'भिस ऐस्' (१।४।२) ऐस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चिन्तायाम्]** चिन्ता सप्तमी ङि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) याम् ।

**[जनो युष्मान् संदृश्यागतः, जनोऽस्मान् संदृश्यागतः]**

**[जनः]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जन्यते इति जनः । 'अच्' (५।१।४९) अच्प्र० । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[युष्मान्]** युष्मद् । द्वि० शस् । अनेन वस्निषेधः ।

**[संदृश्य]** 'दृशूं प्रेक्षणे' (४९५) दृश्, संपूर्व० । संदर्शनं पूर्वं = संदृश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वा → यप् ।

**[आगतः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । आगच्छति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त० । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादे-र्धुटि क्ङिति' (४।२।५५) मलोपः ।

**[अस्मान्]** अस्मद् । द्वि० शस् । अनेन नस्निषेधः ।

**[जनो युवां समीक्ष्यागतः, जन आवां समीक्ष्यागतः]**

**[जनः]** जन । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[युवाम्]** युष्मद् । द्वि० औ । 'द्वित्वे वाम्नौ' (२।१।२२) वाम् प्राप्नोति, अनेन निषेधः । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) युव्० ।

**[समीक्ष्य]** 'ईक्षि दर्शने' (८८२) ईक्ष्, संपूर्व० । समीक्षणं पूर्वं = समीक्ष्य ।

**[आवाम्]** अस्मद् । द्वि० औ । 'द्वित्वे वाम्नौ' (२।१।२२) नौ प्राप्नोति, अनेन निषेधः । 'मन्तस्य युवा-ऽऽवौ द्वयोः' (२।१।१०) आव्० ।

**[जनस्त्वामपेक्षते, जनो मामपेक्षते]**

**[जनः]** जन । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[त्वाम्]** युष्मद् । द्वि० अम् । 'अमा त्वा-मा' (२।१।२४) त्वा प्राप्नोति, अनेन निषेधः । 'अमौ मः' (२।१।१६) म० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्व० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[अपेक्षते]** 'ईक्षि दर्शने' (८८२) ईक्ष्, अपपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[माम्]** अस्मद् । द्वि० अम् । 'अमा त्वा-मा' (२।१।२४) मा प्राप्नोति, अनेन निषेधः । 'अमौ मः' (२।१।१६) म० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[ज्ञानं युवाभ्यां दीयमानं निरूपयति, ज्ञानमावाभ्यां दीयमानं निरूपयति]**

**[दीयमानं]** 'डुदांग्क् दाने' (११३८) दा । दीयते = दीयमानं । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'क्यः शिति' (३।४।७०) क्यप्र० । 'अतो म आने' (४।४।११४) मोऽन्तः । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० = दी ।

**[निरूपयति]** 'रूपण् रूपक्रियायाम्' (१८९०) रूप्, निपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ज्ञानं तुभ्यं दीयमानं निध्या(प)यति, ज्ञानं मह्यं दीयमानं निध्या(प)यति]**

**[निध्या(प)यति]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, निपूर्व० । निध्यायन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'अर्त्ति-री-व्ली-ह्री-क्नूयि क्ष्माय्यातां पुः' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए. । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[गुरुस्तव कार्यमालोचयति, गुरुर्मम कार्यमालोचयति]**

**[आलोचयति]** 'लोचृङ् दर्शने' (६४६) लोच्, आङ्पूर्व० । आलोचमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए० । 'एदैतो०' (१।२।२३) अय् ।

**[जनो वो मन्यते, जनो नो मन्यते]**

**[जनः]** जन । प्रथमा सि ।

**[वः]** युष्मद् । द्वि० शस् । 'पदाद् युग्विभक्त्यैकवाक्ये०' (२।१।२१) वस् ।

**[मन्यते]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । वर्त्त० ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य० ।

**[जनो वः पश्यति, जनो नः पश्यति]**

**[वः]** युष्मद् । द्वि शस् । 'पदाद् युग्विभक्त्यैकवाक्ये०' (२।१।२१) वस् ।

**[पश्यति]** 'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) पश्य । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ॥ छ ॥

**नित्यमन्वादेशे** ॥२।१।३१॥

**[नित्यम्]** नि मांडियइ, निश्चितं ध्रुवं = नित्यम् । 'नेर्ध्रुवे' (६।३।१७) त्यच्प्र० → त्य । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अन्वादेशे]** अनु = पश्चादादेशोऽन्वादेशस्तस्मिन् ।

**[यूयं विनीतास्तद् वो गुरवो मानयन्ति, वयं विनीतास्तन्नो गुरवो मानयन्ति]**

**[यूयं]** युष्मद् । प्रथमा जस् । 'यूयं वयं जसा' (२।१।१३) यूयम् ।

**[विनीताः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, विपूर्व० । विनीयन्ते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० । प्रथमा जस् ।

**[तद्]** तद् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[वः]** युष्मद् । द्वि० शस् । अनेन् नित्यं वसादेशः ।

**[गुरवः]** गुरु । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) उ० → ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[मानयन्ति]** 'मानण् पूजायाम्' (१९६९) मान् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वयं]** अस्मद् । प्रथमा जस् । 'यूयं वयं जसा' (२।१।१३) वयम् ।

**[नः]** अस्मद् । द्वि० शस् । अनेन नित्यं नसादेशः ।

**[धनवांस्त्वमथो त्वा लोको मानयति, धनवानहमथो मा लोको मानयति]**

**[धनवान्]** धनं विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ⟶ मत् । 'मावर्णान्तो०' (२।१।९४) म० ⟶ व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः इत्यादि ।

**[त्वम्]** युष्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) त्वम् ।

**[अथो]** अथो । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[त्वा]** युष्मद् । द्वि० अम् । अनेन नित्यत्वात् त्वादेशो भवति ।

**[अहम्]** अस्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) अहम् ।

**[मा]** अस्मद् । द्वि० अम् । अनेन नित्यत्वाद् मादेशो भवति ॥ छ ॥

**सपूर्वात् प्रथमान्ताद् वा** ॥२।१।३२॥

**[सपूर्वात्]**卐 सह पूर्वेण वर्त्तते इति सपूर्वस्तस्मात् ।

**[प्रथमान्तात्]**+ प्रथमा अन्ते यस्य तत् प्रथमान्तं, तस्मात् ।

पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ।

**[यूयं विनीतास्तद् गुरवो वो मानयन्ति, तद् गुरवो युष्मान् मानयन्ति]**

**[तद्]** तद् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[गुरवः]** गुरु । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) उ० ⟶ ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[वः]** युष्मद् । द्वि० शस् । अनेन विकल्पे वस् । पक्षे

**[युष्मान्]** युष्मद् । द्वि० शस् । शसो नः (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० ⟶ आ० ।

**[मानयन्ति]** (२।१।३१) सूत्रवत् ।

**[वयं विनीतास्तद् गुरवो नो मानयन्ति, तद् गुरवोऽस्मान् मानयन्ति]**

**[नस्]** अस्मद् । द्वि० शस् । अनेन विकल्पे नस् । पक्षे

**[अस्मान्]** अस्मद् । द्वि० शस् । 'शसो नः' (२।१।१७) न० । 'युष्मदस्मदोः' (२।१।६) द० ⟶ आ० ।

**[युवां सुशीलौ तज्ज्ञानं वां दीयते, तज्ज्ञानं युवाभ्यां दीयते]**

**[युवाम्]** युष्मद् । द्वि० औ । 'मन्तस्य०' (२।१।१०) युव० । 'अमौ मः' (२।१।१६) औ ⟶ म० । 'युष्मदस्मदोः' (२।१।६) द० ⟶ आ० ।

**[सुशीलौ]** शोभनं शीलं ययोस्तौ, प्रथमा औ ।

**[तद्]** तद् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

---

P. 卐 सह-पूर्वपद । सह=विद्यमानं पूर्वपदं यस्याऽसौ सपूर्वपदः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सभावः । 'ते लुग्वा' (३।२।१०८) पदलोपस्तस्मात् ।

P. + प्रथमा अन्ते यस्याऽसौ प्रथमान्तस्तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ज्ञानं] ज्ञान । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समाना०' (१।४।४६) अलोपः ।

[वाम्] युष्मद् । चतुर्थी भ्याम् । अनेन । 'द्वित्वे' वाम्नौ (२।१।२२) वाम् । पक्षे

[युवाभ्याम्] (२।१।२२) सूत्रवत् ।

**[आवां सुशीलौ तज्ज्ञानं नौ दीयते, तज्ज्ञानमावाभ्यां दीयते]**

[आवाम्] अस्मद् । द्वि० औ । 'मन्तस्य०' (२।१।१०) आव० । 'अमौ मः' (२।१।१६) औ → म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

[नौ] अस्मद् । चतुर्थी भ्याम् । अनेन । 'द्वित्वे' वाम्नौ (२।१।२२) नौ । पक्षे

[आवाभ्याम्] (२।१।२२) सूत्रवत् ॥ छ ॥

**त्यदामेनदेतदो द्वितीया-टौस्यवृत्त्यन्ते ॥२।१।३३॥**

[त्यदाम्] त्यच्च त्यच्च त्यच्च = त्यदस्तेषां = त्यदाम् । 'त्यदादिः' (३।१।१२०) एकशेषियइ ।

[एनद्] एनद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

[एतदः] एतद् । षष्ठी ङस् ।

[द्वितीयाटौसि] द्वितीया च टाश्च ओस् च = द्वितीयाटौस्, तस्मिन् ।

[अवृत्त्यन्ते] वृत्तेरन्तो = वृत्त्यन्तः, न वृत्त्यन्तोऽवृत्त्यन्तः । 'नञत्' (३।२।१२५) न० → अ० । तस्मिन् ।

**[उद्दिष्टमेतदध्ययनमथो एनदनुजानीत]**

[उद्दिष्टम्] दिशींत् अतिसर्जने' (१३१८) दिश्, उत्पूर्व० । उद्दिश्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

[एतद्] एतद् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

[अध्ययनम्] 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि ।

[एनद्] एतद् । द्वि० अम् ।

[अनुजानीत] 'ज्ञांश् अवबोधने' (१५४०) ज्ञा, अनुपूर्व० । पं० त । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० ।

**[एतकं साधुमावश्यकमध्यापयाथो एनमेव सूत्राणि]**

[एतकम्] कुत्सितमेतमेतकम् । 'लोकात्' (१।१।३) अद् विश्लेष्य । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । द्वि० अम् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

[साधुम्] साधु । द्वि० अम् ।

[आवश्यकम्] अवश्यं भावः कर्म वा = आवश्यकम् । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) अ० → आ० । द्वि० अम् ।

[अध्यापय] 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयते कश्चित् तं अधीयमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिग्' (३।४।२०) णिग् । 'णौ क्री-जीङः' (४।२।१०) इ० → आ० । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) पोऽन्तः । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० → ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ।

[अथो] अथो । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

[एनम्] एतद् ।卐 कुत्सितोऽल्पोऽज्ञातो वा एषः = एषकस्तं एतकमेनम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । द्वि० अम् । अनेन एतकद्० → एनदादेशः । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

[एव] एव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

[सूत्राणि] सूत्र । द्वि० शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

[एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम्]

[एतेन] एतद् । तृतीया टा । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'टा-ङसोरिन-स्यौ' (१।४।५) इन. । 'अवर्णस्ये० (१।२।६) ए ।

[रात्रिः] रात्रि । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

[अधीता] 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'आत्' (२।४।१८) आप् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[एनेन] एतद् । तृतीया टा । अनेन ।

[एतयोः शोभनं शीलमथो एनयोर्महती कीर्त्तिः]

[एनयोः] एतद् । ओस् । अनेन ।

[महती] महत् । 'अधातूदृदितः (२।४।२) ङीप्र० → ई० । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[कीर्त्तिः] 'कृतण् संशब्दने' (१६४९) कृत् । कीर्त्तन = कीर्त्तिः । 'साति-हेति-यूति-जूति-ज्ञप्ति-कीर्त्तिः (५।३।९४) कीर्त्तिरादेशः ।

[एतदं संगृहाण अथो एतदमध्यापय]

[एतदम्] एतद् । द्वि० अम् ।

[संगृहाण] 'ग्रहीश् उपादाने' (१५१७) । ग्रह्, संपूर्व० । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना० । 'ग्रह-व्रश्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र → गृ । 'व्यञ्जनाच्छ्नाहेरानः' (३।४।८०) श्नायुक्तहिस्थाने आनाऽऽदेशः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

[एतदम्] एतद् । द्वि० अम् ।

[अध्यापय] पूर्ववत् ।

[अथो परमैतं पश्य]

P. 卐 कुत्सितमल्पमज्ञातं वा एतं = एनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अथो]** अथो । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[परमैतम्]** परमश्चासावेषश्च = परमैषस्तं = परमैतम् ॥ छ ॥

**इदमः ॥२।१।३४॥**

**[इदमः]** इदम् । षष्ठी ङस् ।

**[उद्दिष्टमिदमध्ययनमथो एनदनुजानीत]**

**[अध्ययनम्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयतेऽनेनेत्यध्ययनम् । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ⟶ ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[इमकं साधुमावश्यकमध्यापय अथो एनमेव सूत्राणि]**

**[इमकम्]** कुत्सितोऽल्पोऽज्ञातो वा अयं = अयकं, तं = इमकम् ।

**[एनम्]** इदम् । 'लोकात्' (१।१।३) अम् अग्रे विश्लेषियइ. । 'त्यादि-सर्वादे०' (७।३।२९) अक् । द्वि० अम् । अनेन इदकम् ⟶ एनदादेशः ।

**[मत्पुत्रकौ शीलवन्ताविमकौ तिष्ठतः]**

**[मत्पुत्रकौ]** मदीयौ पुत्रौ = मत्पुत्रौ, मत्पुत्रावेव = मत्पुत्रकौ । स्वार्थे कप्र० ।

**[शीलवन्तौ]** शीलं विद्यते ययोस्तौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'मावर्णान्तोपा०' (२।१।९४) म० ⟶ व० ।

**[इमकौ]** कुत्सिताविमाविमकौ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।

**[अथो परमेमं पश्य]**

**[परमेमम्]** परमश्चासावयं च = परमायं, तं = परमेमम् ।

**[इदं कुण्डमानयाथो एनं परिवर्त्तय]**

**[परिवर्त्तय]** 'वृतूङ् वर्त्तने' (९५५) वृत्, परिपूर्व० । परिवर्त्तमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'लघोरुपान्त्यस्य' (४।३।४) अर् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलोपः ॥ छ ॥

**अद् व्यञ्जने ॥२।१।३५॥**

**[अद्]** अद् । प्रथमा सि ।卐 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[व्यञ्जने]** व्यञ्जन । सप्तमी ङि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्]**

**[इमकाभ्याम्]** कुत्सिताविमाविमकौ । 'लोकात्' (१।१।३) अम् विश्लेष्य. । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । ताभ्यां = इमकाभ्यां, तृतीया भ्याम् । 'आ द्वेरः' (२।१।४१) म० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'दो मः स्यादौ' (२।१।३९) द० ⟶ म० । 'अत आ स्यादौ०' (१।४।१) आ ।

**[शैक्षकाभ्याम्]** 'शिक्षि विद्योपादाने' (८७९) शिक्ष् । शिक्षणं = शिक्षा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० ।

P. 卐 'अनतो लुप्' (१।४।५९) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आत्' (२।४।१८) आप् । शिक्षां वेत्त्यधीते वा = शिक्षकः । 'पद-क्रम-शिक्षा-मीमांसा-साम्नोऽकः' (६।३।१२६) अकप्र० । 'अवर्णवर्णस्य' (७।४।६८) आलोपः । शिक्षक एव = शैक्षकः । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) शै. । ताभ्यां = शैक्षकाभ्यां, तृतीया भ्याम् ।

**[रात्रिः]** 'रांक् दाने' (१०६९) रा । रातीति = ददातीति दरिद्रेभ्योऽपि सुखमिति रात्रिः । 'रा-शदि-शकि-कद्यदिभ्यस्त्रिः' (उणा० ६९६) त्रिप्र० ।

**[इमकैः शैक्षके रात्रिरधीता अथो एभिरहरप्यधीतम्]**

**[इमकैः]** कुत्सिता इमे = इमके, तैः = इमकैः ।

**[इमकस्मै शैक्षकाय रात्रिरधीता अथो अस्मायहरप्यधीतम्]**

**[इमकस्मै]** कुत्सितोऽल्पोऽज्ञातो वा अयं = अयकं, तस्मै = इमकस्मै ।

यथा चतुर्थीसमासस्तथा पञ्चमी-षष्ठी-सप्तमीषु समासो ज्ञेयः । यथा तृतीयाभिस्समासस्तथा चतुर्थीभ्यस्-पञ्चमीभ्यस्-षष्ठ्याम्- सप्तमीसुप्सु समासो ज्ञेयः ।

**[अथो परमेमकाभ्यां रात्रिरधीता]**

**[परमेमकाभ्याम्]** परमौ च ताविमकौ च = परमेमकौ, ताभ्यां = परमेमकाभ्याम् । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् ॥ छ ॥

अनक् ॥२।१।३६॥

**[अनक्]** न विद्यतेऽक् यत्राऽसौ अनक् । 'अन् स्वरे' (३।२।१२९) अन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[अस्मै]** इदम् । चतुर्थी ङे । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । अनेन अकारु । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै ।

**[अस्यै]** इदम् । चतुर्थी ङे । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । अनेन अकारु । 'आत्' (२।४।१८) आप् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यै । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्यै । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[अतीदंभ्याम्]** अमुमतिक्रान्तौ (यौ) तौ अतीदमौ, ताभ्यामतीदंभ्याम् ।

**[अतीदंसु]** अमुमतिक्रान्ता (ये) तेऽतीदमस्तेषु = अतीदंसु ।

**[प्रियेदंभ्याम्]** प्रियोऽयं ययोस्तौ = प्रियेदमौ, ताभ्याम् ।

**[प्रियेदंसु]** प्रियोऽयं येषु ते = प्रियेदमस्तेषु = प्रियेदंसु ।

**[परमाभ्याम्]** परमौ च तौ इमौ च = परमेमौ, ताभ्याम् ।

**[परमैभिः]** परमाश्च ते इमे च = परमेमे, तैः ।

**[परमास्मै]** परमश्चासावयं च = परमायं, तस्मै ।

**[परमास्यै]** परमा चासौ इयं च परमेयम्, तस्यै ।

**[परमास्मात्]** परमश्चासावयं च परमायं, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परमास्याः]** परमा चासौ इयं च परमेयम्, तस्याः ।। छ ।।

**टौस्यनः** ।।२।१।३७।।

**[टौस्यनः]** टाश्च ओस् च = टौस्, तस्मिन् = टौसि, सप्तमी ङि । अन प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[परमानेन]** परमश्चासावयं च = परमायं, तेन ।

**[परमानयोः]** परमौ च तौ इमौ च = परमेमौ, तयोः ।

**[अतीदमा]** अमुमतिक्रान्तोऽसौ अतीदं, तेन ।

**[अतीदमोः]** अमुमतिक्रान्तौ (यौ) तौ = अतीदमौ, तयोः ।

**[प्रियेदमा]** प्रियोऽयं यस्याऽसौ प्रियेदं, तेन = प्रियेदमा ।

**[प्रियेदमोः]** प्रियोऽयं ययोस्तौ प्रियेदमौ, तयोः ।

**[इमिकया]** कुत्सिता इयं = इयकं, तया = इमिकया ।

**[इमकयोः]** कुत्सिता इमे = इमके, तयोः = इमकयोः ।। छ ।।

**अयमियं पुं-स्त्रियोः सौ** ।।२।१।३८।।

**[अयमियम्]** अयं च इयं च = अयमियम् । प्रथमा औ । सूत्रत्वाल्लोपः ।

**[पुंस्त्रियोः]** पुमांश्च स्त्री च = पुंस्त्रियौ, तयोः = पुंस्त्रियोः, सप्तमी ओस् ।

**[सौ]** सि । सप्तमी ङि ।

**[परमायम्]** परमश्चासावयं च = परमायम् ।

**[परमेयम्]** परमा चासावियं च = परमेयम् ।

**[अतीदं पुमान्]** अमुमतिक्रान्तोऽसौ अतीदम् ।

**[अतीदं स्त्री]** अमुमतिक्रान्ता अतीदम् ।

**[प्रियेदम्]** प्रियोऽयं यस्य स, प्रिया इयं यस्याः सा ।

**[अयकम्]** कुत्सितोऽयं = अयकम् ।

**[इयकम्]** कुत्सिता इयं = इयकम् ।। छ ।।

**दो मः स्यादौ** ।।२।१।३९।।

**[दो मः स्यादौ]** द् षष्ठी ङस् । म प्रथमा सि । सि(:)आदिर्यस्याऽसौ स्यादिस्तस्मिन् ।

**[इमौ]** इदम् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[परमेमौ]** परमौ च तौ इमौ च = परमेमौ । प्रथमा औ ।

**[इमकेन]** कुत्सितोऽयं = अयकं । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । तेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इमकाभ्याम्]** कुत्सितौ इमौ = इमकौ, ताभ्याम् ।

**[अतीदमौ]** इममतिक्रान्तौ (यौ) तौ = अतीदमौ ।

**[प्रियेदमौ]** प्रियोऽयं ययोस्तौ = प्रियेदमौ ॥ छ ॥

**किमः कस्तसादौ च** ॥२।१।४०॥

**[किमः कस्तसादौ]** किम् षष्ठी ङस् । क प्रथमा सि । तस् आदिर्यस्याऽसौ तसादिस्तस्मिन् ।

**[च]** च अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[कः]** किम् । प्रथमा सि । अनेन ।

**[परमकः]** परमश्चासौ कश्च = परमकः ।

**[परमकौ]** परमौ च तौ कौ च = परमकौ ।

**[कः]** कुत्सितोऽल्पोऽज्ञातो वा कः = कः । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।

**[कदा]** कस्मिन् काले = कदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० ।

**[कर्हि]** कस्मिन् अनद्यतने काले = कर्हि । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० ।

**[किन्तराम्]** इदं किं २, इदमनयोर्मध्ये प्रकृष्टं किं = किन्तराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर० । 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) आम्

**[अतिकिम्]** किमतिक्रान्तः (यः) सः ।

**[अतिकिमौ]** किमतिक्रान्तौ (यौ) तौ ।

**[अतिकिमः]** किमतिक्रान्ता (ये) ते ।

**[प्रियकिम्]** प्रियः कः यस्य स ।

**[प्रियकिमौ]** प्रियः कः ययोस्तौ ।

**[प्रियकिमः]** प्रियः कः येषां ते ॥ छ ॥

**आ द्वेरः** ॥२।१।४१॥

**[आ द्वेरः]** आ अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । द्वि ष० ङस्(?) (पञ्चमी ङसि) । अ प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[परमत्यौ]** परमौ च तौ त्यौ च = परमत्यौ ।

**[ततः]** तस्मात्ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) तस्प्र० । अनेन द० → अ० ।

**[तत्र]** तस्मिन् = तत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० ।

**[तदा]** तस्मिन् काले = तदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० ।

**[तथा]** तेन प्रकारेण = तथा । 'प्रकारे था' (७।२।१०२) थाप्र० ।

**[तर्हि]** तस्मिन् अनद्यतने काले = तर्हि । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । एवमग्रेऽपि ।

**[अतितदौ]** तमतिक्रान्तौ (यौ) तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अतितदः]** तमतिक्रान्ता (ये) ते ।

**[प्रियतद्]** प्रियः सो यस्य स = प्रियतद् ।

**[प्रियतदौ]** प्रियः सो ययोस्तौ ।

**[प्रियतदः]** प्रियः सो येषां ते ।। छ ।।

**तः सौ सः** ।।२।१।४२।।

**[तः सौ सः]** त् षष्ठी ङस् । सि सप्तमी ङि । स प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[स्यकः]** कुत्सितोऽल्पोऽज्ञातः स्यः = स्यकः । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

**[परमस्यः]** परमश्चासौ स्यश्च = परमस्यः ।

**[सकः]** कुत्सितः सः = सकः । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

**[परमसः]** परमश्चासौ सश्च = परमसः ।

**[परमैषः]** परमश्चासावेषश्च = परमैषः ।

**[हे परमस!]** परमश्चासौ सश्च = परमसस्तस्य संबोधनं हे परमस ! ।

**[हे परमैष!]** परमश्चासावेषश्च = परमैषस्तस्य संबोधनं हे परमैष! ।

**[प्रियत्यद्]** प्रियः स्यो यस्य तत् = प्रियत्यद् ।

**[प्रियैतत् पुमान्]** प्रिय एषो यस्याऽसौ प्रियैतत् ।। छ ।।

**अदसो दः सेस्तु डौ** ।।२।१।४३।।

**[अदसो दः सेस्तु डौ]** अदस् षष्ठी ङस् । द् षष्ठी ङस् । सि षष्ठी ङस् । तु प्रथमा सि । डौ प्रथमा सि । सूत्रत्वात् लोपः ।

**[असौ]** अदस् । प्रथमा सि । अनेन । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[असकौ]** कुत्सितोऽल्पोऽज्ञातो वा असौ = असकौ । प्रथमा सि । 'लोकात्' (१।१।३) अस् अग्रे विश्लेषियइ. । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । अनेन द० → स०, सेस्तु डौ → औ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः ।

**[असकौ स्त्री]** कुत्सिता-अल्पा-अज्ञाता वा असौ = असकौ ।

**[अदः]** अदस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[अमूः]** अदस् । प्रथमा जस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'मादुवर्णोऽनु' (२।१।४७) ऊ। 'सो रुः' (२।१।७२) र०। 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अत्यदाः]** अमुमतिक्रान्तोऽसौ अत्यदाः । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**असुको वाऽकि ।।२।१।४४।।**

**[असुकर्]** असुक प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[वा]** वा अव्यउ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अकि]** अक् सप्तमी ङि ।

**[असुकः, असकौ]** कुत्सितोऽल्पोऽज्ञातो वा असौ = असुकः । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । अनेन असुक निपात्यते ।

**[असुका, असकौ स्त्री]** कुत्सितौ-अल्पौ-अज्ञातौ वा अमू = असकौ । स्त्रीलिङ्गे 'आत्' (२।४।१८) आप्प्र० विशेषः ।।छ।।

**मोऽवर्णस्य ।।२।१।४५।।**

**[मोऽवर्णस्य]** म प्रथमा सि । अवर्ण षष्ठी ङस् । 'टा-ङसोरिन-स्यौ (१।४।५) स्य ।

**[अमू नरौ]** अदस् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'मादुवर्णोऽनु' (२।१।४७) अ० → उ० । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) ऊ०. ।

**[अमू स्त्रियौ]** अदस् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'आत्' (२।४।१८) आप् । 'औता' (१।४।२०) ए । 'मादुवर्णोऽनु' (२।१।४७) ऊ० ।

**[अमू कुले]** अदस् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'औरीः' (१।४।५६) ई. । 'अवर्णस्ये०' (१।२।६) ए. । 'मादुबर्णोऽनु' (२।१।४७) ऊकारु । महाप्राणस्य स्थाने महाप्राणो भवतीति न्यायाद् एकारस्य ऊकारु भवति ।

**[अमूः स्त्रियः]** अदस् । प्रथमा जस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । अनेन द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'मादुवर्णोऽनु' (२।१।४७) ऊ । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अमूनि कुलानि]** अदस् । प्रथमा जस् - द्वितीया शस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[अमूं स्त्रियम्]** अदस् । द्वितीया अम् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द० → म० । 'आत्' (२।४।१८) आप् । 'मादुवर्णोऽनु' (२।१।४७) ऊ । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अमूः स्त्रीः]** स्त्रियां यथा जसि तथा शसि ।

**[अमुकौ नरौ]** कुत्सितौ अमू = अमुकौ नरौ ।

**[अमुके स्त्रियौ]** कुत्सिते अमू = अमुके । प्रथमा औ । 'आत्' (२।४।१८) आप् । 'औता' (१।४।२०) ए. । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।

**[अमुके कुले]** कुत्सिते अमू = अमुके । प्रथमा औ । 'औरीः' (१।४।५६) ई । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परमामुम्]** परमश्चासावसौ च = परमासौ, तम् ।

**[अमूदृक्]** अदस् 'दृशृं प्रेक्षणे' (४९५) दृश् । असाविव दृश्यते अमूदृक् । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च' (५।१।१५२) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्त्रज्-दधृषुष्णिहो गः' (२।१।६९) ग० । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० । 'अन्य-त्यदादेराः' (३।२।१५२) अमा । 'मादुवर्णोऽनु' (२।१।४७) ऊ।

**[अमूदृशः]** असाविव दृश्यते = अमूदृशः । 'त्यदाद्यन्य०' (५।१।१५२) टक्प्र० । प्रथमा सि ।

**[अमूदृक्षः]** असाविव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) सक्प्र० । 'यज-सृज-मृज-राज-भ्राज०' (२।१।८७) श० ⟶ ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० ⟶ क० । 'नाम्यन्तस्था०' (२।३।१५) स० ⟶ ष० । क-षसंयोगे क्ष. । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० । 'अन्य-त्यदादेराः' (३।२।१५२) अमा । 'मादुवर्णोऽनु' (२।१।४७) ऊ।

**[अदस्यति]** अदसमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० ⟶ य. । वर्त्त० तिव् ।।छ।।

**वाऽद्रौ ।।२।१।४६।।**

**[वाऽद्रौ]** वा । अद्रि सप्तमी ङि ।

**[अदमुयङ्, अमुद्र्यङ्, अमुमुयङ्, अदद्र्यङ्]** अदस् 'अञ्चू गतौ च' (१०५) अञ्च् । अमुमञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'सर्वादि-विष्वग्-देवाड्(द्)डद्रिः क्व्यञ्चौ' (३।२।१२२) डद्रिरागमः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लोपः । प्रथमा सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० ⟶ ङ० -

परतः केचिदिच्छन्ति, केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति, केचिदिच्छन्ति नोभयोः ।।

अनेन श्लोकप्रमाणेन 'वाऽद्रौ' (२।१।४६) इत्यनेन सूत्रेण द० ⟶ म० । 'मादुवर्णोऽनु' (२।१।४७) उ ।।छ।।

**मादुवर्णोऽनु ।।२।१।४७।।**

**[मादुवर्णोऽनु]** म पञ्चमी ङसि । उकारेणोपलक्षितो वर्णः-उवर्णः, प्रथमा सि । 'सो रुः' (२।१।७२) र० । अनु अव्यउ । प्रथमा सि ।

**[अमुम्]** अदस् । द्वितीया अम् । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० । महाप्राणस्य स्थाने महाप्राणो भवत्यनेन उ. ।

**[अमू]** अदस् । प्रथमा औ । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) मौ । अनेन ऊ।

**[अमुमुयङ्]** अमुमञ्चतीति अमुमुयङ् । (२।१।४६) सूत्रवत् साध्यः ।

**[अमुमुईचः, अदमुईचः, अदमुईचा]** अदस् 'अञ्चू गतौ च' (१०५) अञ्च् । अमुमञ्चतीति क्विप् अमुमुईचः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सर्वादिविष्वग्०' (३।२।१२२) डद्रिरागमः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लोपः । 'लोकात्' (१।१।३) इ अग्रे विश्लेषियइ । 'वाऽद्रौ' (२।१।४६) द० ⟶ म० । 'मादुवर्णोऽनु' (२।१।४७) उ० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) च् पूर्वस्वरस्य दीर्घः । षष्ठी ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(अमुमुईचः) - पञ्चमी ङसि (अदमुईचः) - तृतीया टा (अदमुईचा) ।

**[अमुष्मै]** अदस् । चतुर्थी ङे । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै । 'मादुवर्णोऽनु' (२।१।४७) उ. ।

**[अमुष्मात्]** अदस् । पञ्चमी ङसि । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मात् । 'मादुवर्णोऽनु' (२।१।४७) उ ।

**[अमुष्मिन्]** अदस् । सप्तमी ङि । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'ङेः स्मिन्' (१।४।८) स्मिन् । 'मादुवर्णोऽनु' (२।१।४७) उ. ।

**[अमूषाम्]** अदस् । षष्ठी आम् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'अवर्णस्याऽऽमः साम्' (१।४।१५) साम् । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[अमुया]** अदस् । तृतीया टा । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'टौस्येत्' (१।४।१९) ए. । 'एदैतोऽयाय्' (१।२।२३) अय् । 'मादुवर्णोऽनु' (२।१।४७) उ. ।

**[अमुयोः]** अदस् । सप्तमी ओस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'टौस्येत्' (१।४।१९) ए. । 'एदैतोऽयाय्' (१।२।२३) अय् । 'मादुवर्णोऽनु' (२।१।४७) उ. ।।छ।।

**प्रागिनात् ।।२।१।४८।।**

**[प्रागिनात्]** प्राक् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । इन पञ्चमी ङसि । 'ङे-ङस्योर्या-ऽऽतौ' (१।४।६) आत् ।

**[अमुना पुंसा]** अदस् । तृतीया टा । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । अनेन अ० → उ० । 'टः पुंसि ना' (१।४।२४) टा० → नाऽऽदेशः ।

**[अमुया स्त्रिया]** अदस् । तृतीया टा । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'टौस्येत्' (१।४।१९) आ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'मादुवर्णोऽनु' (२।१।४७) उ० ।।छ।।

**बहुष्वेरीः ।।२।१।४९।।**

**[बहुष्वेरीः]** वहु सप्तमी सुप् । ए षष्ठी ङस् । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । ई प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अमी]** अदस् । प्रथमा जस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'जस इः' (१।४।९) इ. । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए. । अनेन ई ।

**[अमीभिः]** अदस् । तृतीया भिस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'एद् बहुस्भोसि' (१।४।४) ए. । अनेन ई ।

**[अमीभ्यः २]** अदस् । चतुर्थी-पञ्चमी भ्यस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'एद् बहुस्भोसि' (१।४।४) ए । अनेन ई ।

**[अमीषाम्]** अदस् । षष्ठी आम् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'अवर्णस्याऽऽमः साम्' (१।४।१५) साम् । 'एद् बहुस्भोसि' (१।४।४) ए । अनेन ई. ।

**[अमीषु]** अदस् । सप्तमी सुप् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'एद् बहुस्भोसि' (१।४।४) ए. । अनेन ई ।

**[अमू कन्ये]** अदस् । प्र० - द्वि० औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'औता' (१।४।२०) ए. । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[अमू कुले]** अदस् । प्र०-द्वि० औ । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'औरीः' (१।४।५६) ई । 'अवर्णस्ये०' (१।२।६) ए. । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[अमूः कन्याः]** अदस् । द्वितीया शस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'शसोऽता सश्च नः पुंसि' (१।४।४९) दीर्घः । 'मादुवर्णोऽनु' (२।१।४७) ऊ । 'सो रुः' (२।१।७२) र० ।

**[अमून् नरान्]** अदस् । द्वितीया शस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'शसोऽता सश्च नः पुंसि' (१।४।४९) आ.–स० → न० । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[अमुकेभ्यः]** कुत्सिता अमी = अमुके, तेभ्यः । 'त्यादि-सर्वादेः०' (७।३।२९) अक्० ।।छ।।

**धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये** ।।२।१।५०।।

**[धातोरिवर्णोवर्णस्येयुव्]** धातु षष्ठी ङस् । इवर्णश्च उवर्णश्च = इवर्णोवर्णं, तस्य = इवर्णोवर्णस्य । इय् च उव् च = इयुव्, प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[स्वरे प्रत्यये]** स्वर सप्तमी ङि । प्रतीयते येनाऽर्थः स = प्रत्ययस्तस्मिन् = प्रत्यये ।

**[नियौ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतः इति क्विप् नियौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[नियः]** नयन्तीति क्विप् नियः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[लुवौ]** 'लूग्श् छेदने' (१५१९) लू । लुनीतः इति क्विप् लुवौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[लुवः]** लुनन्तीति क्विप् लुवः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[अधीयाते]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० आते । अनेन इयादेशः ।

**[अधीयते]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० अन्ते । 'अनतोऽन्तोऽदात्मने' (४।२।११४) नलोपः । अनेन इयादेशः ।

**[लुलुवतुः]** 'लूग्श् छेदने' (१५१९) लू । परोक्षा अतुस्प्र० । 'द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः' (४।१।१)

लू द्विर्वचनु । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । अनेन उव् ।

**[लुलुवुः]** 'लूग्श् छेदने' (१५१९) लू । परोक्षा उस्प्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) लू द्विर्वचनु । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । अनेन उव् ।

**[स्वीः]** स्वमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य० । 'क्यनि' (४।३।११२) ई । स्वीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'क्यनन्ता नामत्वं नोज्झन्ति धातुत्वं च प्रतिपद्यन्ते' ( ) । प्रथमा सि ।

**[स्वियौ]** स्वी । प्रथमा औ । अनेन इय् ।

**[स्वियः]** स्वी । प्रथमा जस् । अनेन इय् ।

**[अधीयन्]** 'इङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयतेऽधीयन् । 'धारीङोऽकृच्छेऽतृश्' (५।२।२५) अतृश्प्र० → अत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोन्तः । अनेन इय् । 'पदस्य' (२।१।८९) तलोपः ।

**[म्लायति]** 'म्लैं गात्रविनामे' (३२) म्लै । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[नीः]** नयतीति क्विप् नीः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विबन्ता धातुत्वं नोज्झन्ति नामत्वं (शब्दत्वं) च प्रतिपद्यन्ते । (न्यायसंग्रहः द्वितीयो वक्षस्कारः । सूत्रं-४८)

**[लूः]** लुनातीति क्विप् लूः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विबन्ता धातुत्वं नोज्झन्ति नामत्वं (शब्दत्वं) च प्रतिपद्यन्ते' (न्यायसंग्रहः द्वितीयो वक्षस्कारः । सूत्रं-४८)

**[न्यर्थः]** नियोऽर्थो = न्यर्थः ।

**[ल्वर्थः]** लुवोऽर्थो = ल्वर्थः ।

**[नयनम्]** नीयते = नयनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन. ।

**[लवनम्]** लूयते = लवनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन. ।

**[नायकः]** नयतीति नायकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[लावकः]** लुनातीति लावकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक. । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।।छ।।

**इणः ।।२।१।५१।।**

**[इणः]** इण् । षष्ठी ङस् ।

**[ईयतुः]** 'इंण्क् गतौ' (१०७५) इ । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनु । अनेन इय् । 'समानानां०' (१।२।१) दीर्घः ।

**[ईयुः]** 'इंण्क् गतौ' (१०७५) इ । परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनु । अनेन इय् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यन्ति]** 'इंण्क् गतौ' (१०७५) इ । वर्त्त० अन्ति । 'ह्विणोरप्विति व्-यौ' (४।३।१५) यत्वम् ।

**[यन्तु]** 'इंण्क् गतौ' (१०७५) इ । पञ्चमी अन्तु । 'ह्विणोरप्विति व्-यौ' (४।३।१५) यत्वम् ।

**[अयनम्]** ईयतेऽयनम् । 'अनट्' (५।३।१२४) अनट्प्र० —> अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[आयकः]** एतीति । 'णक-तृचौ' (५।१।४८) णकप्र० —> अक । 'नामिनोऽकलिहलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।।छ।।

## संयोगात् ।।२।१।५२।।

**[संयोगात्]** संयोग पञ्चमी ङसि । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) आत् ।

**[यवक्रियौ]** 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री, यवपूर्व० । यवान् क्रीणीत इति क्विप् यवक्रियौ । प्रथमा औ । अनेन इय् ।

**[यवक्रियः]** यवान् क्रीणन्तीति क्विप् यवक्रियः । प्रथमा जस् । अनेन इय् ।

**[कटप्रुवौ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) 'प्रुंङ् गतौ' (५९७) प्रु, कटपूर्व० । कटं प्रवेते इत्येवंशीलौ । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू- परिव्राट् - भ्राजादयः क्विप्' (५।२।८३) क्विप्प्र० । अप्रयोगीत् (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन उव् ।

**[कटप्रुवः]** कटं प्रवन्ते इत्येवंशीलाः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन उव् ।

**[शिश्रियतुः]** 'श्रिग् सेवायाम्' (८८३) श्रि । परोक्षा अतुस्प्र० । 'द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः' (४।१।१) द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इय् ।

**[शिश्रियुः]** 'श्रिग् सेवायाम्' (८८३) श्रि । परोक्षा उस्प्र० । 'द्विर्धातुः०' (४।१।१) द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इय् ।

**[उन्न्यौ]** उन्नयतः इति क्विप् उन्न्यौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वम् ।

**[उन्न्यः]** उन्नयन्तीति क्विप् उन्न्यः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) यत्वम् ।

**[सकृल्ल्वौ]** सकृल्लुनीतः इति क्विप् सकृल्ल्वौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) वत्वम् ।

**[सकृल्ल्वः]** सकृल्लुनन्तीति क्विप् सकृल्ल्वः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) वत्वम् ।। छ ।।

## भ्रू-श्नोः ।।२।१।५३।।

**[भ्रूश्नोः]** भ्रूश्च श्नुश्च = भ्रूश्नु, तस्य भ्रूश्नोः ।

**[भ्रुवौ]** भ्रू । प्रथमा औ । अनेन उव् ।

**[भ्रुवः]** भ्रू । प्रथमा जस् । अनेन उव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आप्नुवन्ति]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । वर्त्त० अन्ति । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । अनेन उव् ।

**[राध्नुवन्ति]** 'राधं संसिद्धौ' (१३०४) राध् । वर्त्त० अन्ति । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । अनेन उव् ।

**[तक्ष्णुवन्ति]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । वर्त्त० अन्ति । 'तक्षः स्वार्थे वा' (३।४।७७) श्नुप्र० → नु. । अनेन उव् ।

**[सुन्वन्ति]** 'षुंग्ट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । वर्त्त० अन्ति । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु० । 'इवर्णादे०' (१।२।२१) वत्वम् ।

**[चिन्वन्ति]** 'चिंग्ट् चयने' (१२९०) चि । वर्त्त० अन्ति । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु. । 'इवर्णादे०' (१।२।२१) वत्वम् ॥ छ ॥

**स्त्रियाः** ॥२।१।५४॥

**[स्त्रियाः]** स्त्री षष्ठी ङस् । 'स्त्रीदूतः' (१।४।२९) दास्० → आस्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[स्त्रियौ]** स्त्री । प्रथमा औ । अनेन इय् ।

**[परमस्त्रियौ]** परमौ (परमे) च तौ (ते) स्त्रियौ च = परमस्त्रियौ ।

**[अतिस्त्रियौ नरौ]** स्त्रीमतिक्रान्तौ (यौ) तौ । अनेन इय् ।

**[अतिस्त्रयः]** स्त्रीमतिक्रान्ता (ये) तेऽतिस्त्रयः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वत्वं । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[अतिस्त्रिणा]** स्त्रीमतिक्रान्तोऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं, तेन ।

**[अतिस्त्रये]** स्त्रीमतिक्रान्तोऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं, तस्मै ।

**[अतिस्त्रेः २]** स्त्रीमतिक्रान्तोऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं, तस्मात्-तस्य ।

**[अतिस्त्रौ]** स्त्रीमतिक्रान्तोऽसौ अतिस्त्रिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वं, तस्मिन् ॥ छ ॥

**वाऽम्-शसि** ॥२।१।५५॥

**[वाऽम्-शसि]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अम् च शस् च = अम्शस्, तस्मिन् = अम्शसि ।

**[स्त्रियम्, स्त्रीम्]** स्त्री । द्वितीया अम् । अनेन ।

**[स्त्रियः, स्त्रीः]** स्त्री । द्वितीया शस् । अनेन ।

**[परमस्त्रियम् परमस्त्रीम्]** परमश्चासौ (परमा चासौ) स्त्री च = परमस्त्री, ताम् ।

**[परमस्त्रियः, परमस्त्रीः]** परमाश्च ताः स्त्रियश्च = परमस्त्रियः, ताः ।

**[अतिस्त्रियम्, अतिस्त्रिम् नरम्]** स्त्रीमतिक्रान्तोऽसौ अतिस्त्रिः, तं । अनेन इय् । अन्यत्र 'गोश्चान्ते०' (२।४।९६) ह्रस्वत्वम् ।

**[अतिस्त्रियः, अतिस्त्रीन् नरान्]** स्त्रीमतिक्रान्ता (ये) तेऽतिस्त्रियः, तान् ।

**[स्त्रियम्]** स्त्रीमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । स्त्रीयतीति क्विप् । 'अतः' (४।३।८२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । तम् ।

**[स्त्रियः]** स्त्रीयन्तीति क्विप् ।। छ ।।

**योऽनेकस्वरस्य** ।।२।१।५६।।

**[योऽनेकस्वरस्य]** य प्रथमा सि । न एकस्वरोऽनेकस्वरः । 'अन् स्वरे' (३।२।१२९) अन्, तस्य ।

धातोरित्यनुवर्त्तते । 'विशेषातिदिष्टः प्रकृतिं(तं) न बाधते' इति न्यायाद् इय्बाधकमिदम् ।

**[चिच्यतुः]** 'चिंग्ट् चयने' (१२९०) चि । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनम् । अनेन यत्वम् ।

**[चिच्युः]** चि परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे० (४।१।१) द्विर्वचनम् । अनेन यत्वम् ।

**[निन्यतुः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे० (४।१।१) द्विर्वचनम् । अनेन यत्वम् ।

**[निन्युः]** नी परोक्षा उस् । शेषं पूर्ववत् ।

**[सख्युः]** सखायमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) अलोपः । पञ्चमी ङसि-षष्ठी ङस् । अनेन यत्वं । 'खि-ति-खी-तीय उर्' (१।४।३६) उर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[पत्युः]** पतिमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पतीयतीति क्विप् । शेषं 'सख्युः' वत् ।

**[सख्यि]** सखायमिच्छति । 'अमाव्ययात्'० (३।४।२३) क्यन्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । सखीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक् (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी ङि । अनेन यत्वम् ।

**[पत्यि]** पतिमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । पतीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी ङि । अनेन यत्वम् ।

**[नियौ]** नयतः इति क्विप् नियौ । 'अप्रयोगीत्' (१।१।३७) क्विप् लोपः । प्र०-द्वि० औ । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इय् ।

**[नियः]** नयन्तीति क्विप् नियः ।

**[परमनियौ]** परमौ च तौ नियौ च = परमनियौ ।

**[परमनियः]** परमाश्च ते नियश्च = परमनियः । प्रथमा जस् । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इय् ।

**[रियति]** 'रिं गतौ' (१३२८) रि । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) श० → अ० । 'धातोरिवर्णो०' (२।१।५०) इय् ।

**[पियति]** 'पिंत् गतौ' (१३२९) पि । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) श० → अ० । 'धातोरिवर्णो०' (२।१।५०) इय् ।। छ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादौ वः ॥२।१।५७॥

**[स्यादौ वः]** स्यादि सप्तमी ङि । 'ङिर्डौ' (१।४।२५) डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः । व प्रथमा सि ।

**[वस्वौ]** वसुमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वसूयतः इति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने० (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ, अनेन वत्वम् ।

**[वस्वः]** वसुमिच्छति । 'अमाव्ययात्०' (३।४।२३) क्यन्प्र० → य । 'दीर्घश्च्वि० (४।३।१०८) दीर्घः । वसूयन्तीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने०' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन वत्वम् ॥ छ ॥

क्विब्वृत्तेरसुधियस्तौ ॥२।१।५८॥

**[क्विब्वृत्तेः]** क्विपा वृत्तिः = क्विब्वृत्तिस्तस्य(याः) = क्विब्वृत्तेः ।

**[असुधियः]** सुष्ठु ध्यायति दधातीति वा सुधी(ः) । न सुधी(ः) = असुधी(ः) । 'नञत्' (३।२।१२५) न० → अ०, तस्याः । 'धातोरिवर्णो०' (२।१।५०) इय् ।

**[तौ]** तद् प्रथमा औ ।

**[उन्न्यौ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, उद्पूर्व० । उन्नयत इति क्विप् उन्न्यौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन यत्वम् ।

**[उन्न्यः]** उन्नयन्तीति क्विप् उन्न्यः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन यत्वम् ।

**[सुल्वौ]** सुष्ठु लुनीतः इति क्विप् सुल्वौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन वत्वम् ।

**[सुल्वः]** सुष्ठु लुनन्तीति क्विप् सुल्वः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन वत्वम् ।

**[तिरोल्वौ]** तिरो लुनीतः इति तिरोल्वौ ।

**[तिरोल्वः]** तिरो लुनन्तीति तिरोल्वः ।

**[ग्रामण्यौ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, ग्रामपूर्व० । ग्रामं नयतः इति क्विप् ग्रामण्यौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन यत्वं । 'ग्रामाऽग्रान्नियः' (२।३।७१) णत्वम् ।

**[ग्रामण्यः]** ग्रामं नयन्तीति ग्रामण्यः ।

**[खलप्वौ]** 'पूगश् पवने' (१५१८) पू, खलपूर्व० । खलं पुनीतः इति क्विप् खलप्वौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । अनेन वत्वम् ।

**[खलप्वः]** खलं पुनन्तीति क्विप् खलप्वः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । अनेन वत्वम् ।

**[परमनियौ]** परमौ च तौ नियौ च = परमनियौ ।

**[परमनियः]** परमाश्च ते नियश्च = परमनियः । 'धातोरिवर्णो०' (२।१।५०) इय् ।

**[सुधियः]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, सुपूर्व० । सुष्ठु ध्यायन्ति दधति वा इत्येवंशीलाः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० - धीभावश्च । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रध्यौ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, प्रपूर्व० । प्रध्यायतः इति क्विप् प्रध्यौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र०-धीनिपातः । प्रथमा औ । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[आध्यौ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, आङ्पूर्व० । आध्यायतः इति क्विप् आध्यौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र०-धीनिपातः । प्रथमा औ । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[उद्ध्यौ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, उद्पूर्व० । उद्ध्यायतः इति क्विप् उद्ध्यौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० - धीनिपातः । प्रथमा औ । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ॥ छ ॥

**दृन्-पुन-र्वर्षा-कारेर्भुवः ॥२।१।५९॥**

**[दृन्पुनर्वर्षाकारैः]** दृन् च पुनर् च वर्षा च कारश्च = दृन्पुनर्वर्षाकारास्तैः, तृतीया भिस् । 'भिस ऐस्' (१।४।२) ऐस् ।

**[भुवः]** भू षष्ठी ङस् । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् ।

**[दृन्भ्वौ]** दृन्-हिंसन् भवतः इति क्विप् दृन्भ्वौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन व् ।

**[दृन्भ्वः]** दृन्-हिंसन् भवन्तीति क्विप् दृन्भ्वः ।

**[पुनर्भ्वौ]** पुनर्भवतः इति क्विप् पुनर्भ्वौ ।

**[पुनर्भ्वः]** पुनर्भवन्तीति क्विप् पुनर्भ्वः । अनेन व् ।

**[वर्षाभ्वौ]** वर्षासु भवतः इति क्विप् वर्षाभ्वौ । अनेन व् ।

**[वर्षाभ्वः]** वर्षासु भवन्तीति क्विप् वर्षाभ्वः । अनेन व् ।

**[काराभ्वः]** काराशब्दं तु देवनन्दी कथ्यते । कारासु भवन्तीति क्विप् काराभ्वः । अनेन व् ।

**[स्वयंभुवौ]** स्वयं भवतः इति क्विप् स्वयंभुवौ ।

**[प्रतिभुवौ]** प्रतिभवतः इति क्विप् प्रतिभुवौ ।

**[मित्रभुवौ]** मित्रं भवतः इति क्विप् मित्रभुवौ ।

**[विभुवौ]** विशेषेण भवतः इति क्विप् विभुवौ ।

**[आत्मभुवौ]** आत्मनि भवतः इति क्विप् आत्मभुवौ । पञ्चसु उदाहरणेषु 'धातोरिवर्णो०' (२।१।५०) उव् ॥ छ ॥

**ण-षमसत्परे स्यादिविधौ च ॥२।१।६०॥**

**[णषमसत्परे]** णश्च षश्च = णषम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । अस्तीति सन्, न सत् = असत् । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । पर सप्तमी ङि ।

**[स्यादिविधौ]** सिरादिर्यस्याऽसौ स्यादिः, स्यादेर्विधिः = स्यादिविधिस्तस्मिन् ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पूष्णः]** 'पूष वृद्धौ' (५००) पूष् । पूषतीति पूषा । 'उक्षि-तक्ष्यक्षीशि-राजि-धन्वि-पञ्चि-पूषि-क्लिदि-स्निहि-नु-मस्जेरन्' (उणा० ९००) अन्प्र० । षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[तक्ष्णः]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । तक्षतीति तक्षा । शेषं 'पूष्णः' वत् ।

**[पिपठीः]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) पठ्द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) ठलोपः । 'सन्यस्य' (४।१।५९) अ० → इ० ।

'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेपि' (२।३।१५) स० → ष० । पिपठिषतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विपलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'सो रुः' (२।१।७२) र० । 'पदान्ते' (२।१।६४) दीर्घः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अर्वाणौ]** अर्वन् । प्रथमा औ । 'नि दीर्घः' (१।४।८५) दीर्घः ॥ छ ॥

**क्ताऽऽदेशोऽषि** ॥२।१।६१॥

**[क्ताऽऽदेशोऽषि]** क्तस्य आदेशः = क्ताऽऽदेशः । प्रथमा सि । न ष् = अष् । 'नञत्' (३।२।१२५) न० → अ० । तस्मिन् = अषि ।

**[क्षामिमान्]** 'क्षैं क्षये' (४२) क्षै । 'आत् सन्ध्यक्षरस्य' (४।२।१) क्षा । क्षायति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त. । 'क्षै-शुषि-पचो म-क-वम्' (४।२।७८) त० → म० । क्षामस्य अपत्यं = क्षामिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । क्षामिर्विद्यते यस्याऽसौ क्षामिमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[शुष्किका]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त. । 'क्षै-शुषि-पचो म-क-वम्' (४।२।७८) त० → क० । शुष्क एव = शुष्किका । स्वार्थे कप्र० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इकारु ।

**[पक्वम्]** 'डुपचींष् पाके' (८९२) पच् । पचति स्म । 'गत्यर्थाऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त. । 'क्षै-शुषि-पचो म-क-वम्' (४।२।७८) त० → व० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

[1]**[बुद्धः]** 'बुधिं ज्ञाने' (१२६२) बुध् । बुध्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

[2]**[दग्धा]** 'दहं भस्मीकरणे' (५५२) दह् । दह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः ।

**[लून्युः]** 'लूग्श् छेदने' (१५१९) लू । लुनाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । लूनमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । 'क्यनि' (४।३।११२) ई । लूनीयतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । षष्ठी ङस् । 'योऽनेकस्वरस्य' (२।१।५६) यत्वं । 'खि-ति-खी-तीय उर्' (१।४।३६) उर् ।

अथवा लवनं = लूतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अग्रे पूर्ववत्साध्यः ।

**[पून्युः]** 'पूग्श् पवने' (१५१८) पू । पुनाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । पूनमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । 'क्यनि' (४।३।११२) ई । पूनीयतीति क्विप् । शेषं 'लून्युः' वत् ।

**[वृक्णः]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । वृश्च्यते स्म । 'क्त-क्तवतू'

१. बृहद्वृत्तौ - 'बुद्ध्वा' । २. बृहद्वृत्तौ - 'दग्ध्वा' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५।१।१७४) क्तप्र० → त. । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्रथमा सि ।

**[वृक्णवान्]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । वृश्च्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः' सौ (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[लग्नः]** 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । लज्जति(ते)स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलोपः । 'च-जः क-गम्' (२।२।८६) ज० → ग० ।

**[मग्नः]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । मज्जति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'मस्जेः सः' (४।४।११०) स० → न० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'च-जः क-गम्' (२।१।८६) ज० → ग० ।।छ।।

**ष-ढोः कस्सि** ।।२।१।६२।।

**[षढोः कस्सि]** षश्च ढश्च = षढौ, तयोः । क प्रथमा सि । स् सप्तमी ङि ।

**[पेक्ष्यति]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । भविष्यन्ती स्यतिप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० → ए. । अनेन ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[पिपिक्षति]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पेष्टुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । अनेन ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः०' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अद्राक्षीत्]** 'दृशृं प्रेक्षणे' (४९५) दृश् । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारु । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । अनेन ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष. ।

**[अस्राक्षीत्]** 'सृजंत् विसर्गे' (१३४९) सृज् । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारु । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । अनेन ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-ष संयोगे क्ष. ।

**[अयाक्षीत्]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दिस्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । अनेन षस्य कत्वं । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[लेक्ष्यति]** 'लिहींक् आस्वादने' (११२९) लिह् । भविष्यन्ती स्यति । 'लघोरुपान्त्यस्य' (४।३।४) गु० → ए. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन ढ० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[लिलिक्षति]** 'लिहींक् आस्वादने' (११२९) लिह् । लेढुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन कत्वं । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । क-षसंयोगे क्ष ।

**[निघोक्ष्यति]** 'गुहौग् संवरणे' (९३५) गुह्, निपूर्व० । भविष्य० स्यति । 'लघोरुपान्त्यस्य' (४।३।४) गु० → गो० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ग-ड-द-बादेः०' (२।१।७७) गो० → घो० । अनेन ढस्य कत्वं । 'नाम्यन्तस्था०' (२।३।१५) सस्य षत्वं । क-षसंयोगे क्ष. ।

**[पिनष्टि]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । वर्त्त० तिव् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न. । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।।छ।।

**भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने** ।।२।१।६३।।

**[भ्वादेः]** भू आदिर्यस्याऽसौ भ्वादिः, तस्य भ्वादेः, षष्ठी ङस् ।

**[नामिनः]** नमनं = नाम(ः) । नामोऽस्याऽस्तीति नामी, तस्य नामिनः ।

**[दीर्घः]** 'दृश् विदारणे' (१५३५) दृ । दृणात्युच्चारणकाले मुखं विदारयतीति दीर्घः । 'मघा-घङ्घाघ-दीर्घादयः' (उणा० ११०) घप्र०-दृणातेर्दीर् च । प्रथमा सि ।

**[र्वोः]** र् च व् च = र्वौ, तयोः = र्वोः, सप्तमी ओस् ।

**[व्यञ्जने]** व्यज्यतेऽर्थोऽनेनेति व्यञ्जनं, तस्मिन् ।

**[हूर्च्छा]** 'हुर्छा कौटिल्ये' (१२५) हुर्छ् । हु(हू)र्छनं = हूर्च्छा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप् । 'समानानां०' (१।२।१) दीर्घः । अनेन दीर्घः ।

**[हूर्च्छिता]** 'हुर्छा कौटिल्ये' (१२५) हुर्छ् । श्वस्तनी ता । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[मूर्च्छा]** 'मुर्छा मोह-समुच्छ्राययोः' (१२६) मुर्छ् । मु(मू)र्छनं = मूर्च्छा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप् । 'समानानां० (१।२।१) दीर्घः । अनेन दीर्घः ।

**[मूर्च्छिता]** मुर्छ् । श्वस्तनी ता । 'स्ताद्य०' (४।४।३२) इट् ।

**[आस्तीर्णम्]** स्तॄग्श् आच्छादने (१५२१) स्तॄ, आङ्पूर्व० । आस्तीर्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'ॠतां' क्ङितीर्' (४।४।११६) इर् । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अनेन दीर्घः ।

**[प्रस्तीर्णम्]** प्रस्तीर्यते स्म ।

**[पूर्त्तम्]** 'पॄश् पालन-पूरणयोः' (१५३२) पॄ । पृणाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'र्हादर्हस्वरस्याऽनु नवा' (१।३।३१) द्वित्वं । अनेन दीर्घः ।

**[अवगूर्णम्]** 'गुरैति उद्यमे' (१४६४) गुर्, अवपूर्व० । अवगुरते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त. । 'रदादमूर्च्छ०' (४।२।६९) त० → न० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अनेन दीर्घः ।

**[ऊर्दिदिषते]** 'उर्दि मान-क्रीडयोश्च' (७३२) उर्द् । ऊर्दितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लोऽन्त्यात्' (१।१।३) उर् पाठउ विश्लेषियइ. । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) दि

सउं द्विर्वचनं । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । अनेन दीर्घः ।

**[चिकीर्षति]** 'डुकृंग् करणे' (८८८) कृ । कर्त्तुमिच्छति । 'तुमर्हादिच्छा०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः = कॄ । 'ॠतां क्ङित्तीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) किर् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[वुवूर्षति]** 'वृगट् वरणे' (१२९४) वृ । वरीतुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) वॄ. । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'सन्-यङश्च' (४।१।३) वुर् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दीव्यति]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य. । अनेन दीर्घः ।

**[सीव्यति]** 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य. । अनेन दीर्घः ।

**[दीव्यात्]** (२।१।६५) सूत्रवत् ।

**[सीव्यात्]** (२।१।६५) सूत्रवत् ।

**[प्रतिदीव्ना]** प्रतिदीव्यतीति प्रतिदीव्यन् । 'लू-पू-यु-वृषि-दंशि-द्यु-दिवि- प्रतिदिविभ्यः कित्' (उणा० ९०१) किद् अन्प्र० । तेन । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) क्वनिप्प्र० । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) वलोपः । तृतीया टा । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[प्रतिदीव्ने]** प्रतिदीव्यतीति प्रतिदीव्यन् । 'लू-पू-यु-वृषि-दंशि-द्यु-दिवि- प्रतिदिविभ्यः कित्' (उणा० ९०१) किद् अन्प्र० । तस्मै । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) क्वनिप्प्र० । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) वलोपः । चतुर्थी ङे । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[चतुर्थः]** चतुर् । चतुर्णां पूरणः = चतुर्थः । 'चतुरः' (७।१।१६३) थट्प्र० → थ. ।

**[कुर्कुरीयति]** कुर्कुरमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'क्यनि' (४।३।११२) ई । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः०' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[चतुर्यति]** चतुरमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दिव्यति]** दिवमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य. । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[स्मर्यते]** 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य. । 'क्य-यङाऽऽशीर्ये' (४।३।१०) गु० अर् ।

**[भव्यम्]** 'भू सत्तायाम्' (१) भू । भूयते = भव्यम् । 'भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा' (५।१।७) निपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दधिव्रज्या]** धजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज्, दधिपूर्व० । दध्नो व्रजनं = दधिव्रज्या । 'आस्यटि-व्रज्-यजः क्यप्' (५।३।९७) क्यप्प्र० → य. । 'आत्' (२।४।१८) आप् ।

**[ग्रामणिव्रज्या]** धजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज्, ग्रामणी पूर्व० । ग्रामण्या व्रजनं = ग्रामणिव्रज्या । 'आस्यटि-व्रज्-यजः क्यप्' (५।३।९७) क्यप्प्र० → य. । 'वेदूतोऽनव्यय-य्वृदीच्-ङीयुवः पदे' (२।४।९८) ह्रस्वः । 'आत्' (२।४।१८) आप् ॥ छ ॥

**पदान्ते** ॥२।१।६४॥

**[पदान्ते]** पदस्याऽन्तः = पदान्तस्तस्मिन्, सप्तमी ङि ।

**[गीः]** 'गॄत् निगरणे' (१३३५) गॄ । गिरणं = गीः । क्विप्प्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् = गिर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ।

**[गीर्भ्याम्]** गिर् । तृतीया भ्याम् । 'नाम सिदय्व्यञ्जने' (१।१।२१) पदसंज्ञा । अनेन ।

**[गीर्षु]** गिर् । सप्तमी सुप् । 'नाम सिदय्व्यञ्जने' (१।१।२१) पदसंज्ञा । 'अरोः सुपि रः' (१।३।५७) स० → ष० । अनेन ।

**[गीस्तरा]** द्वयोर्मध्ये प्रकृष्टा गीः = गीस्तरा । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर. । 'आत्' (२।४।१८) आप् । अनेन ।

**[गीरर्थः]** गिरोऽर्थः = गीरर्थः ।

**[धूः]** उर्वै (४७०) - तुर्वै (४७१) - थुर्वै (४७२) - दुर्वै (४७३) - 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वतीति क्विप् धूः । 'राल्लुक्' (४।१।११०) वलोपः ।

**[धूर्मान्]** धूर्विद्यते यस्याऽसौ धूर्मान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[आशीः]** 'आङः शासूकि इच्छायाम्' (१११८) शास्, आङ्पूर्व० । आशासनमाशीः । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) आशास्० → आशिस्० ।

**[गिरौ]** गिरतः इति क्विप् गिरौ । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[गिरः]** गिरन्तीति क्विप् गिरः । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[लुवौ]** लुनीतः इति क्विप् लुवौ । 'धातोरिवर्णो०' (२।१।५०) उव् ।

**[लुवः]** लुनन्तीति क्विप् लुवः । 'धातोरिवर्णो०' (२।१।५०) उव् ।

**[अजागः]** 'जागृक् निद्राक्षये' (१०९३) जागृ । ह्यस्तनी दिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दलोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[मधुलिट्]** 'लिहींक् आस्वादने' (११२९) लिह् । मधु लेढीति मधुलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न यि तद्धिते ।।२।१।६५।।

**[न यि तद्धिते]** न अव्यउ । प्रथमा सि । य् सप्तमी ङि । तद्धित सप्तमी ङि ।

**[धुर्यः]** धुरं वहति । 'धुरो यैयण्' (७।१।३) यप्र० । प्रथमा सि ।

**[गिर्यः]** गिरि साधुः = गिर्यः । 'तत्र साधौ' (७।१।१५) यप्र० ।

**[गीर्वत्]** गिर् । गीरिव = गीर्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । 'पदान्ते' (२।१।६४) दीर्घः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[धूर्वत्]** धूरिव = धूर्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । 'पदान्ते' (२।१।६४) दीर्घः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[गीर्यति]** गिरमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[धूर्यति]** धुरमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[गीर्यते]** गीरिवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य. । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[धूर्यते]** धूरिवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य. । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[कीर्यते]** 'कृत् विक्षेपे' (१३३४) कृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य. । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[गीर्यते]** 'गृत् निगरणे' (१३३५) गृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य. । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[कीर्यात्]** 'कृत् विक्षेपे' (१३३४) कृ । आशीः क्यात्प्र० → यात् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[गीर्यात्]** 'गृत् निगरणे' (१३३५) गृ । आशीः क्यात्प्र० → यात् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[दीव्यात्]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । आशीः क्यात्प्र० → यात् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[सीव्यात्]** 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । आशीः क्यात्प्र० → यात् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।।छ।।

कुरुच्छुरः ।।२।१।६६।।

**[कुरुच्छुरः]** कुरुश्च छुर् च = कुरुच्छुर्, तस्य ।

**[कुर्यात्]** 'डुकृंग् करणे' (८८८) कृ । सप्तमी यात् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'कृगो यि च' (४।२।८८) उलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कुर्वः]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० वस् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'कृगो यि च' (४।२।८८) उलोपः ।

**[कुर्मः]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० मस् । शेषं 'कुर्वः' वत् ।

१**[छुर्यात्]** 'छुरत् छेदने' (१४५९) छुर् । आशीः क्यात्प्र० → यात् ।

**[छुर्यते]** 'छुरत् छेदने' (१४५९) छुर् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० ।

**[कूर्यात्]** 'कुरत् शब्दे' (१३९१) कुर् । आशीः क्यात्प्र० → यात् । १"पदान्ते' (२।१।६४) दीर्घः ? । ('भ्वादेर्नामिनो०' (२।१।६३) दीर्घः) ।

**[रिर्यतुः]** 'रींश् गति-रेषणयोः' (१५२५) री । 'रिं गतौ' (१३२८) रि । परोक्षा अतुस्प्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) री-रि द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'योऽनेकस्वरस्य' (२।१।५६) इत्यनेन यत्वेन 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इत्यस्य इय् बाध्यते । 'इवर्णादे०' (१।२।२१) यत्वम् ।

**[रिर्युः]** 'रींश् गति-रेषणयोः' (१५२५) री । 'रिं गतौ' (१३२८) रि । परोक्षा उस्प्र० । शेषं 'रिर्यतुः' वत् ।

**[विव्यतुः]** 'वींक् प्रजन-कान्त्यसनखादने च' (१०७६) वी । परोक्षा अतुस्प्र० । 'द्विर्धातुः०' (४।१।१) द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[विव्युः]** 'वींक् प्रजन-कान्त्यसनखादने च' (१०७६) वी । परोक्षा उस्प्र० । शेषं 'विव्यतुः' वत् ।

**[संविव्याय]** 'व्येंग् संवरणे' (९९३) व्ये ।卐 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, संपूर्व० । परोक्षा णव्प्र० → अ. । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) व्या सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः' (४।१।७१) इ. । 'आत ऐः कृञ्औ' (४।३।५३) व्या० → व्यै० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[विव्याध]** 'व्यधंच् ताडने' (११५७) व्यध् । परोक्षा णव्प्र० → अ. । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) व्यध् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः' (४।१।७१) इ. । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ॥ छ ॥

### मो नो म्वोश्च ॥२।१।६७॥

**[मो नो म्वोश्च]** म् षष्ठी ङस् । न प्रथमा सि । म् च व् च = म्वौ, तयोः । च प्रथमा सि ।

**[प्रशान्]** 'शमू उपशमे' (१२३०) शम्, प्रपूर्व० । प्रशाम्यतीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन नकारु ।

**[प्रतान्]** 'तमूच् काङ्क्षायाम्' (१२३२) तम्, प्रपू० । प्रताम्यतीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन नकारु ।

**[प्रदान्]** शमू (१२३०) 'दमूच् उपशमे' (१२३१) दम्, प्रपूर्व० । प्रदाम्यतीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन नकारु ।

P. 卐 'व्यस्थव्-णवि' (४।२।३) इति सूत्रेण आत्वाऽभावो भवति, आत्वाऽभावे 'नामिनोऽकलिहलेः' (४।३।५१) इति सूत्रेण ए इत्यस्य ऐ वृद्धिर्भवति ।

१. आशीःप्रत्यये पदसंज्ञाऽभावात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परिक्लान्]** 'क्लमूच् ग्लानौ' (१२३७) क्लम्, परिपूर्व० । परिक्लाम्यतीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विपलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन नकारु ।

**[प्रशान्भ्याम्]** 'शम् उपशमे' (१२३०) शम्, प्रपूर्व० । तृतीया भ्याम् ।

**[जङ्गन्मि]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । कुटिलं गच्छामि । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) गम् सउ द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मुरागमः । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० मिव् । अनेन ।

**[जङ्गन्वः]** 'गम्लृं गतौ' (३९६) गम् । कुटिलं गच्छावः । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य. । 'सन्-यङश्च' (४।१।३) गम् सउ द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मुरागमः । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० वस् । अनेन ।

**[जङ्गन्मः]** 'गम्लृं गतौ' (३९६) गम् । कुटिलं गच्छामः । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य. । 'सन्-यङश्च' (४।१।३) गम् सउ द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मुरागमः । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० मस् । अनेन ।

**[जगन्वान्]** जगाम = जगन्वान् । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) गम् द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'पदस्य' (२।१।८९) सलोपः । अनेन ।

**[नन्नन्मि]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । भृशं पुनः पुनर्वा नमामि । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) नम्द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० मिव् । अनेन म० → न० ।

**[नन्नन्वः]** नम् । भृशं पुनः पुनर्वा नमावः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) नम् द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० वस् । अनेन म० → न० ।

**[नन्नन्मः]** नम् । भृशं पुनः पुनर्वा नमामः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० मस् । अनेन म० → न० ।

**[प्रशामौ]** प्रशाम्यतः इति क्विप् प्रशामौ । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । प्रथमा औ ।

**[प्रतामौ]** प्रताम्यतः इति क्विप् प्रतामौ । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । प्रथमा औ ।

**[छित्]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छिनत्तीति क्विप् छित् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[भित्]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्तीति क्विप् भित् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।।छ।।

### स्रंस्-ध्वंस्-क्वस्सनडुहो दः ।।२।१।६८।।

**[स्रंस्ध्वंस्क्वस्सनडुहो दः]** स्रंस् च ध्वंस् च क्वस् च अनड्वांश्च = स्रंस्ध्वंस्क्वस्सनडुह्, तस्य । द प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उखास्रत्, उखास्रद्]** भ्रंशूङ् (९५२) - 'स्रंसूङ् अवस्रंसने' (९५३) स्रंस्, उख-उखापूर्व० । उखेन स्रस्यते-उखया स्रंसते इति क्विप्० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । अनेन दत्वं । 'विरामे वा' (१।३।५१) द० → त० । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[पर्णध्वत्, पर्णध्वद्]** 'ध्वंसूङ् गतौ च' (९५४) ध्वंस्, पर्णपूर्व० । पर्णानि ध्वंसते इति क्विप् । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । अनेन दत्वं । 'विरामे वा' (१।३।५१) द० → त० । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[विद्वद्, विद्वत् कुलम्]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति यत् कुलं तत् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[उपसेदिवद्, उपसेदिवत् कुलम्]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद्, उपपूर्व० । उपससाद । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः' (४।१।२४) स० → से० । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् ।

**[स्वनडुद्, स्वनडुत् कुलम्]** 'वहीं प्रापणे' (९९६) वह्, अनस्पूर्व० । अनो वहति । 'अनसो वहेः क्विप् सश्च डः' (उणा० १००६) क्विप्प्र०—स० → ड० । 'यजादि-वचेः किति' (४।१।७९) य्वृद् व० → उ० । अनडुह् सुपूर्व० । शोभना अनड्वाहो यत्र कुले तत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[उखास्रद्भ्याम्]** उखया स्रंसेते इति उखास्रदौ, ताभ्याम् ।

**[पर्णध्वद्भिः]** पर्णानि ध्वंसन्ते इति पर्णध्वसस्तैः ।

**[विद्वत्सु]** विदन्तीति विद्वांसस्तेषु ।

**[विद्वत्ता]** विदुषो भावः । 'भावे त्व-तल्' (७।१।५५) तल्प्र० → त. । आत् (२।४।१८) आप् ।

**[उपसेदिवत्तमः]** बहूनां मध्ये प्रकृष्टः उपसेदिवान् = उपसेदिवत्तमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम. ॥छ॥

ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः ॥२।१।६९॥

**[ऋत्विज्दिशदृश्स्पृश्स्रज्दधृषुष्णिहः]** ऋत्विज् च दिश् च दृश् च स्पृश् च स्रज् च दधृष् च उष्णिह् च = ऋत्विज्दिश्दृश्स्पृश्स्रज्दधृषुष्णिह्, तस्य ।

**[गः]** ग प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ऋत्विक्, ऋत्विग्]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज्, ऋतुपूर्व० । ऋतौ यजते, ऋतवे यजते, ऋतु(तुं) प्रयोजनो वा यजते । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृद् य० → इ० । प्रथमा सि ।

**[दिक्, दिग्]** 'दिशीं अतिसर्जने' (१३१८) दिश् । दिश्यते इति । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[दृक्, दृग्]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यति दर्शनं वा दृक् । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[अन्यादृक्, अन्यादृग्]** 'दृशृं प्रेक्षणे' (४९५) दृश्, अन्यपूर्व० । अन्य इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च' (५।१।१५२) क्विप्प्र० । 'अन्य-त्यदादेराः' (३।२।१५२) आ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[घृतस्पृग्, घृतस्पृक्]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश्, घृतपूर्व० । घृतं स्पृशतीति घृतस्पृक् । 'स्पृशोऽनुदकात्' (५।१।१४९) क्विप्प्र० ।

**[स्रग्, स्रक्]** 'सृं गतौ' (२५) सृ । सरतीति । 'ऋधि-प्रथि-भिषिभ्यः कित्' (उणा० ८७४) किद् अज्प्र० । 'इवर्णादे०' (१।२।२१) रत्वम् ।

**[दधृग्, दधृक्]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । धृष्णोतीति क्विप् । अत एव सूत्रनिर्देशाद् द्वित्वं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) धृ० → ध० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

**[उष्णिग्, उष्णिक्]** 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह्, उत्पूर्व० । ऊर्ध्वं स्निह्यतीति । अथवा 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह्, उत्पूर्व० । ऊर्ध्वं नह्यतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) । क्विप्लोपः ।

**[ऋत्विग्भ्याम्]** ऋतुं यजेते इति ऋत्विजौ, ताभ्याम् ।

**[दिग्भ्याम्]** दिशतः इति दिशौ, ताभ्याम् ।

**[घृतस्पृग्भ्याम्]** 'घृतं स्पृशतः' इति घृतस्पृशौ, ताभ्याम् ।

**[स्रग्भ्याम्]** सृजतः इति सृजौ, ताभ्याम् ।

**[दधृग्भ्याम्]** धृष्णुतः इति दधृषौ, ताभ्याम् ।

**[उष्णिग्भ्याम्]** ऊर्ध्वं स्निह्यतः इति उष्णिहौ, ताभ्याम् ।।छ।।

### नशो वा ।।२।१।७०।।

**[नशो वा]** नश् षष्ठी ङस् । वा प्रथमा सि ।

**[जीवनग्, जीवनक्, जीवनड्, जीवनट्]** 'नशौच् अदर्शने' (१२०२) नश्, जीवपूर्व० । जीवस्य नशनं । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन गत्वं । पक्षे 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[जीवनशौ]** जीवं नश्यतः इति जीवनशौ ।।छ।।

### युजञ्च-क्रुञ्चो नो ङ ।।२।१।७१।।

**[युजञ्चक्रुञ्चो नो ङः]** युज् च अञ्च् च क्रुञ्च् च युजञ्चक्रुञ्च्, तस्य । न् षष्ठी ङस् । ङ प्रथमा सि ।

**[युङ्]** 'युजूंपी योगे' (१४७६) युज् । युङ्क्ते-युनक्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'युजोऽसमासे' (१।४।७१) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) जलोपः । अनेन ।

**[प्राङ्]** 'अञ्चू गतौ च' (१०५) अञ्च्, प्रपूर्व० । प्राञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । अनेन ।

**[प्राङ्भ्याम्]** प्राञ्चतः इति प्राञ्चौ, ताभ्याम् ।

**[प्राङ्षु, प्राङ्क्षु]** प्राञ्चन्तीति प्राञ्चस्तेषु ।

**[क्रुङ्]** 'क्रुञ्च च कौटिल्याल्पीभावयोः' (१०२) क्रुञ्च् । क्रुञ्चतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । अनेन ।

**[क्रुड्भ्याम्]** क्रुञ्चतः इति क्रुञ्चौ, ताभ्याम् ।

**[क्रुड्षु, क्रुड्क्षु]** क्रुञ्चन्तीति क्रुञ्चस्तेषु, सप्तमी सुप् ।

**[युञ्जौ]** युङ्क्तः इति क्विप् युञ्जौ ।

**[युञ्जः]** युञ्जन्तीति क्विप् युञ्जः ।

**[प्राञ्चौ]** प्राञ्चतः इति क्विप् प्राञ्चौ ।

**[प्राञ्चः]** प्राञ्चन्तीति क्विप् प्राञ्चः ।

**[क्रुञ्चौ]** क्रुञ्चतः इति क्विप् क्रुञ्चौ ।

**[क्रुञ्चः]** क्रुञ्चन्तीति क्विप् क्रुञ्चः ॥छ॥

**सो रुः ॥२।१।७२॥**

**[सो रुः]** स् षष्ठी ङस् । रु प्रथमा सि ।

**[मित्रशीः]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, मित्रपूर्व० । मित्रं शास्तीति क्विप् मित्रशीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'क्वौ' (४।४।११९) इसादेशः ।

**[आशीः]** आशासनमाशीः । 'क्रुध्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) आशास्० → आशिस् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन रु० । 'पदान्ते' (२।१।६४) दीर्घः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पयोवत्]** पय इव = पयोवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० ॥छ॥

**सजुषः ॥२।१।७३॥**

**[सजूर्देवैः]** 'जुषैति प्रीति-सेवनयोः' (१४७२) जुष्, सहपूर्व० । सह जुषते । 'क्विप्' (५।१।१४८) क्विप्प्र० । अत एव निर्देशात् सहस्य सभावः । 'पदान्ते' (२।१।६४) दीर्घत्वम् ।

**[सजूर्भ्याम्]** सह जुषेते इति सजुषौ, ताभ्याम् ।

**[सजूर्वत्]** सजूरिव = सजूर्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० ॥छ॥

**अह्नः ॥२।१।७४॥**

**[अह्नः]** अहन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[हे दीर्घाहो निदाघ!]** दीर्घाण्यहान्यस्मिन् निदाघे स = दीर्घाहो निदाघः, **तस्य संबोधनं हे दीर्घाहो** निदाघ ! । 'आमन्त्र्ये' (२।२।३२) सि । आमन्त्र्यार्थाभिद्योतको हे शब्दप्रागुपादीयते । हे प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । अनेन रु० । **'घोषवति'** (१।३।२१) र० → उ० । 'अवर्णस्ये०' (१।२।६) ओ. ।

**[दीर्घाहा निदाघः]** 'दहं भस्मीकरणे' (५५२) दह्, निपूर्व० । निदह्यन्ते प्राणिनोऽस्मिन्निति निदाघः, कर्मणि समासः । निदहनं = निदाघः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । अनेन रु० । 'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२) रुलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अहन् शत्रुम्]** 'हनंक् हिंसा-गत्योः' (११००) हन् । ह्यस्तनी दिव् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दिलोपः । 'अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा' (४।४।२९) अडागमः ।। छ ।।

**रो लुप्यरि** ।।२।१।७५।।

**[रो लुप्यरि]** र् षष्ठी ङस् । लुप् सप्तमी ङि । न र् = अर्, तस्मिन् ।

**[अहरधीते]** अहन् । द्वि० अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । अनेन रेफ । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० ते ।

**[अहर्ददाति]** 'डुदांग्क् दाने' (११३८) दा. । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) दा द्वित्वं । 'ह्रस्वः' (४।१।३९) दा० → द० ।

**[अहःकाम्यति]** अहः इच्छति । 'द्वितीयायाः काम्यः' (३।४।२२) काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अहर्वत्]** अहरिव = अहर्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० ।

**[अहोरूपम्]** प्रशस्तमहः = अहोरूपम् । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० ।

**[अहोरात्रः]** अहश्च रात्रिश्च = अहोरात्रः । 'ऋक्सामर्ग्यजुष-धेन्वनडुह-वाङ्मनसा-अहोरात्र-रात्रिंदिव-नक्तंदिवा-ऽहर्दिवोर्वष्ठीव-पदष्ठीवा-ऽक्षिभ्रुव-दारगवम्' (७।३।९७) अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरादिलोपः ।। छ ।।

**धुटस्तृतीयः** ।।२।१।७६।।

**[धुटस्तृतीयः]** धुट् षष्ठी ङस् । तृतीय प्रथमा सि ।

**[वाग्]** वच् । वक्तीत्येवंशीला वाक् । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र०-वाच्० । अनेन क० → ग० ।

**[विड्]** 'विशंत् प्रवेशने' (१४१५) विश् । विशतीति । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'यज-सृज०' (२।१।८७) श० → ष० । अनेन ।

**[विड्भिः]** 'विशंत् प्रवेशने' (१४१५) विश् । विशन्तीति विशस्तैः । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । अनेन ष० → ड० ।

**[सुदुग्]** सुख (१८४९) 'दुःखण् तत्क्रियायाम्' (१८५०) दुःख-दु≍ख, सुपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । सुष्ठु दुःखयते(ति), सुष्ठु दु≍खयते(ति) इति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) खलोपः ।

**[सुदुग्भ्याम्]** सुष्ठु दुःखयतः, सुष्ठु दु≍खयतः इति क्विप् सुदुगौ, ताभ्याम् ।

**[षष्ठः]** षष् । षण्णां पूरणः = षष्ठः । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ. । 'तवर्गस्य श्चवर्ग०' (१।३।६०) थ० → ठ० ।।छ।।

**ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये** ।।२।१।७७।।

**[गडदबादेः]** गश्च डश्च दश्च बश्च = गडदबाः, गडदबा आदिर्यस्याऽसौ गडदबादिस्तस्य ।

**[चतुर्थान्तस्य]** चतुर्थोऽन्ते यस्याऽसौ चतुर्थान्तस्तस्य ।

**[एकस्वरस्यादेः]** एकः स्वरो यस्याऽसौ एकस्वरस्तस्य = एकस्वरस्य । आदि षष्ठी ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चतुर्थः स्ध्वोश्च प्रत्यये]** चतुर्थ प्रथमा सि । स् च ध्व् च = स्ध्वौ, तयोः = स्ध्वोः, सप्तमी ओस् । च प्रथमा सि । प्रत्यय सप्तमी ङि ।

**[पर्णघुट्]** 'गुहौग् संवरणे' (९३५) गुह्, पर्णपूर्व० । पर्णानि गूहते-गूहतीति क्विप् पर्णघुट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन ग० → घ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[पर्णघुड्भ्याम्]** पर्णानि गूहतः इति क्विप् पर्णगुहौ, ताभ्यां = पर्णघुड्भ्याम् । 'अप्रयोगीत्' (१।१।३७) क्विपलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन ग० → घ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० ।

**[पर्णघुट्त्वम्]** पर्णगुहो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[तुण्ढिप्]** तुण्ड मांडियइ । तुण्डिरस्यास्ति । 'वलि-वटि-तुण्डेर्भः' (७।२।१६) भप्र० । तुण्डिभमाऽचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । तुण्डिभयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'णेरनिटि' (४।३।८३) णिज्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ड० → ढ० । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० । 'विरामे वा' (१।३।५१) ब० → प० ।

**[तुण्ढिप्त्वम्]** तुण्डिभो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[गोधुक्]** 'दुहींक् क्षरणे' (११२७) दुह्, गोपूर्व० । गां दोग्धीति क्विप् गोधुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अनेन द० → ध० । 'धुटस्तृतीयः' घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[गोधुग्भ्याम्]** गां दोग्धः इति क्विप् गोदुहौ, ताभ्यां = गोधुग्भ्याम्, तृतीया भ्याम् । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अनेन द० → ध० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० ।

**[गोधुक्त्वम्]** गोदुहो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[गर्धप्]** गर्दभमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । गर्दभयतीति क्विप् गर्धप् । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन द० → ध० । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० । 'विरामे वा' (१।३।५१) ब० → प० ।

**[गर्धब्भ्याम्]** गर्दभयतः इति क्विप् गर्दभौ, ताभ्यां = गर्धब्भ्याम्, तृतीया भ्याम् । अनेन द० → ध० । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० ।

**[गर्धप्त्वम्]** गर्दभो भावः । 'भावे त्व- तल्' (७।१।५५) त्वप्र० ।

**[धर्मभुत्]** 'बुधिं ज्ञाने' (१२६२) बुध्, धर्मपूर्व० । धर्मं बुध्यते इति क्विप् धर्मभुत् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ब० → भ० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[धर्मभुत्त्वम्]** धर्मबुधो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[निघोक्ष्यते]** 'गुहौग् संवरणे' (९३५) गुह्, निपूर्व० । भविष्यन्ती स्यते । 'लघोरुपान्त्यस्य' (४।३।४) गु० उ० → ओ० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन ग० → घ० । 'ष-ढोः कस्सि' (२।१।६२) ढ० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नाम्यन्तस्था०' (२।३।१५) षत्वं । क-षसंयोगे क्ष. ।

**[न्यघूढ्वम्]** 'गुहौग् संवरणे' (९३५) गुह्, निपूर्व० । अद्यतनी ध्वम् ।卐 'ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४) सक्लोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन ग० → घ० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) एकढलोपः - पूर्विलाउ दीर्घः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[धोक्ष्यते]** 'दुहींक् क्षरणे' (११२७) दुह् । भवि० स्यते । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन द० → ध० । 'लघोरुपान्त्यस्य' (४।३।४) गु० उ० → ओ० । 'ष-ढोः कस्सि' (२।१।६२) ढ० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अधुग्ध्वम्]** दुह् । अद्यत० ध्वम् । 'ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४) सक्लोपः । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अनेन द० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → ग० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[बुभुत्सते]** 'बुधिं ज्ञाने' (१२६२) बुध् । बोद्धुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० → स. । 'सन्-यङश्च' (४।१।३) बुध् सउ द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन बु० → भु० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[अभुद्ध्वम्]** बुध् । अद्यत० ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सो धि वा' (४।३।७२) सिज्लोपः । अनेन बु० → भु० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[क्रुत्]** 'क्रुधंच् कोपे' (११८४) क्रुध् । क्रोधनं = क्रुत् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[अजञ्जप्]*** 'जप मानसे च' (३३८) जप् । गर्हितं जपति । 'गृ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) जप् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । ह्यस्तनी दिव् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दलोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[दामलिट्]** 'लिहींक् आस्वादने' (११२९) लिह् । दाम लेढीति क्विप् दामलिट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'हो धुट्०' (२।१।८२) ह० → ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[धर्मबुधौ]** धर्मं बुध्येते इति क्विप् धर्मबुधौ ।

**[अबुद्ध]** बुध् । अद्यत० त. । 'सिजद्यतन्याम्' (३।४।५३) सिच् । स्थानीवाऽवर्णविधौ (७।४।१०९) इत्यनेन सिचः स्थानित्वमित्यूह अस्योत्तरं वृत्तिमध्ये ज्ञेयम् । 'धुड् ह्रस्वाल्लुगनिटस्तथोः' (४।३।७०) सिज्लोपः । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय०' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

---

P. 卐 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सो धि वा' (४।३।७२) सलोपः ।

P. * 'जभ मैथुने' (३७९) जभ् । गर्हितं जभति । 'गृ-लुप-सद०' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वं । 'व्यञ्जनस्या०' (४।१।४४) भलोपः । 'जप-जभ-दह-०' (४।१।५२) मुरागमु । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । ह्य० दिव् । 'व्यञ्जनाद् देः०' (४।३।७८) दलोपः । 'धुटस्तृतीयः' (२।१।७६) भ० → ब० । 'विरामे वा' (१।३।५१) ब० → प० । 'अड् धातो०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अबुद्धाः]** बुध् । अद्यत० थास् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड् ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिज्लोपः । 'अधश्चतुर्थात्०' (२।१।७९) थ० → ध० । ['धुटस्तृतीयः' (२।१।७६) ध० → द० ।] 'तृतीयस्तृतीय०' (१।३।४३) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[दादद्धि]** 'दधि धारणे' (७४५) दध् । भृशं पुनः पुनर्वा दधते । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ. । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । पं० हि । 'हु-धुटो०' (४।२।८३) हि० → धि० । 'तृतीयस्तृतीय०' (१।३।४३) ध० → द० ।

**[दद्ध्वः]** 'डुधांग्क् धारणे च' (११३९) धा । वर्त्त० वस् । 'ह्वः शिति' (४।१।१२) धा द्वित्वं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) धकारस्य द्वित्वं । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

**[दद्ध्वहे]** 'डुधांग्क् धारणे च' (११३९) धा । वर्त्त० वहे । शेषं 'दद्ध्वः' वत् ॥ छ ॥

**धागस्त-थोश्च** ॥२।१।७८॥

**[धागस्तथोश्च]** धाग् षष्ठी ङस् । तश्च थश्च = तथौ, तयोः = तथोः, सप्तमी ओस् । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[धत्तः]** 'डुधांग्क् धारणे च' (११३९) धा । वर्त्त० तस् । 'ह्वः शिति' (४।१।१२) धा सउं द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । अनेन ।

**[धत्ते]** धा । वर्त्त० ते । शेषं 'धत्तः' वत् ।

**[धत्थः]** धा । वर्त्त० थस् । शेषं 'धत्तः' वत् ।

**[धत्थ]** धा । वर्त्त० थ । शेषं 'धत्तः' वत् ।

**[धत्से]** धा । वर्त्त० से । शेषं 'धत्तः' वत् ।

**[धत्स्व]** धा । पञ्चमी स्व । शेषं 'धत्तः' वत् ।

**[धद्ध्वे]** धा । वर्त्त० ध्वे । 'ह्वः शिति' (४।१।१२) धा सउं द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । अनेन ।

**[धद्ध्वम्]** धा । पञ्चमी ध्वम् । शेषं 'धद्ध्वे' वत् ।

**[दात्तः]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । भृशं पुनः पुनर्वा धयतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ् । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) धा द्वित्वं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० तस् । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[दात्थः]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । भृशं पुनः पुनर्वा धयथः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ् । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) धा द्वित्वं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० थस् । 'श्नश्चाऽऽतः' (४।२।९६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[धात्तः]** 'डुधांगृक् धारणे च' (११३९) धा । भृशं पुनः पुनर्वा धत्तः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ् । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । अग्रे पूर्ववत् ।

**[धात्थः]** भृशं पुनः पुनर्वा धत्थः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । अग्रे पूर्ववत् ।

**[धात्थ]** भृशं पुनः पुनर्वा धत्थ । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । अग्रे पूर्ववत् ।।छ।।

**अधश्चतुर्थात् त-थोर्धः ।।२।१।७९।।**

**[अधश्चतुर्थात्]** न धा = अधा, 'नञत्' (३।२।१२५) न० → अ० । तस्य = अधः । चतुर्णां पूरणश्चतुर्थस्तस्मात् = चतुर्थात् ।

**[तथोर्धः]** तश्च थश्च = तथौ, तयोः = तथोः । ध प्रथमा सि ।

अध इत्यत्र नञ्पर्युदासः तेन अत्यस्माद् (?) अपि शुद्धधातोरेव भवति, न क्विबन्तस्य ।

**[दोग्धा]** 'दुहींक् क्षरणे' (११२७) दुह् । श्वस्तनी ता. । 'लघोरुपान्त्यस्य' (४।३।४) गु० उ० → ओ० । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[दोग्धुम्]** दोहनाय = दोग्धुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

**[अदुग्ध]** दुह् । अद्यत० त. । 'ह-शिटो नाम्युपान्त्यादृशोऽनिटः सक्' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४) सक्लोपः । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[लेढुम्]** 'लिहींक् आस्वादने' (११२९) लिह् । लेहनाय = लेढुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० इ० → ए० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन त० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः ।

**[अलीढ]** लिह् । अद्यत० त० । 'ह-शिटो०' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४) सक्लोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन त० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्विला दीर्घत्वं । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[अलीढाः]** लिह् । अद्यत० । थास् । 'ह-शिटो०' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो०' (४।३।७४) सक्लोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । अनेन थ० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्विला दीर्घत्वं । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[बोद्धुम्]** 'बुधिं ज्ञाने' (१२६२) बुध् । बोधनाय = बोद्धुम् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन त० → ध० । 'तृतीयस्तृतीय०-' (१।३।४९) ध० → द० ।

**[अबुद्ध]** बुध् । अद्यत० त० । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुग०' (४।३।७०) सिज्लोपः । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[अबुद्धाः]** बुध् । अद्यत० थास् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिज्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन थ० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

[लब्धा] 'डुलभिंष् प्राप्तौ' (७८६) लभ् । श्वस्तनी ता । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।

[लब्धुम्] लभ् । लभनाय = लब्धुम् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम् । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।

[अलब्ध] लभ् । अद्यत० त० । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिज्लोपः । अनेन त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० । 'अड् धातोरदि०' (४।४।२९) अडागमः ।

[अलब्धाः] लभ् । अद्यत० थास् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिज्लोपः । अनेन थ० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

[धत्तः] 'डुधांग्क् धारणे च' (११३९) धा । वर्त्त० तस् । 'ह्वः शिति' (४।१।१२) द्वित्वं । शेषं (२।१।७८) सूत्रवत् ।

[धत्थः] धा । वर्त्त० थस् । 'ह्वः शिति' (४।१।१२) द्वित्वं । शेषं (२।१।७८) सूत्रवत् ।

[दात्तः] 'डुधांग्क् धारणे च' (११३९) धा । भृशं पुनः पुनर्वा धत्तः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) धाद्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'द्वितीयतुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० तस् । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

[दात्थः] 'डुधांग्क् धारणे च' (११३९) धा । भृशं पुनः पुनर्वा धत्थः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) धा द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० थस् । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

[दाद्धः] 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । भृशं पुनः पुनर्वा धयतः । अग्रे पूर्ववत् ।

[ज्ञानभुत्त्वम्] 'बुधिं ज्ञाने' (१२६२) बुध्, ज्ञानपूर्व० । ज्ञानं बुध्यते इति क्विप् । ज्ञानबुधो भावः = ज्ञानभुत्त्वम् । 'क्विबन्ता धातुत्वं नोज्झन्ति नामत्वं च प्रतिपद्यन्ते' ( ) । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'ग-ड-द-बादेः०' (२।१।७७) बु० → भु० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।।छ।।

**र्नाम्यन्तात् परोक्षा-ऽद्यतन्याशिषो धो ढः ॥२।१।८०॥**

[र्नाम्यन्तात्] र् च नामी च = र्नामिनौ, र्नामिनावन्ते यस्याऽसौ र्नाम्यन्तस्तस्मात् ।

[परोक्षाऽद्यतन्याशिषः] परोक्षा च अद्यतनी च आशीश्च = परोक्षाऽद्यतन्याशिष्, तस्य ।

[धो ढः] ध् षष्ठी ङस् । ढ प्रथमा सि ।

[अतीड्ढ्वम्] 'तॄ प्लवन-तरणयोः' (२७) तॄ । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'ॠवर्णात्' (४।३।३६) सिच् किद्वत् । 'ॠवर्ण्ण-श्र्युर्ण्णुगः कितः' (४।४।५७) इड्निषेधः । 'सो धि वा' (४।३।७२) सिज्लोपः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । अनेन ध० → ढ० । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ढस्य द्वित्वं । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ढ० → ड० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[तीषीर्ढ्वम्]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । आशीः सीध्वम् । 'ॠवर्णात्' (४।३।३६) किद्वत् । 'ॠवर्ण्ण-श्र्युण्णुगः कितः' (४।४।५७) इड्निषेधः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । अनेन ध० → ढ० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[तुष्टुढ्वे]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्यायसंग्रहः १/२९) स्तु । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) स्तु द्विर्वचनं । 'अघोषे शिटः' (१।३।५०) सलोपः । अनेन ध० → ढ० ।

**[अदिढ्वम्]** 'डुदांग्क् दाने' (११३८) दा । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'इश्च स्था-दः' (४।३।४१) सिच्किद्वत् - दा० → दि० । 'सो धि वा' (४।३।७२) सिज्लोपः । अनेन ध० → ढ० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[अचेढ्वम्]** 'चिंग्ट् चयने' (१२९०) चि । अद्यत० ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए. । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड्०' (४।४।२९) अट् । अनेन ।

**[अच्योढ्वम्]** 'च्युंङ् गतौ' (५९४) च्यु । अद्यत० ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ० । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड्०' (४।४।२९) अट् । अनेन ।

**[अकृढ्वम्]** 'डुकृंग् करणे' (८८८) कृ । अद्यत० ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'ॠवर्णात्' (४।३।३६) किद्वत् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातो०' (४।४।२९) अट् । अनेन ।

**[अपग्ध्वम्]** 'डुपचींष् पाके' (८९२) पच् । अद्यत० ध्वम् । 'सिजद्यत०' (३।४।५३) सिच् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) क० → ग० । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[ववसिध्वे]** 'वसिक् आच्छादने' (१११७) वस् । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः' (४।१।१) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् ।

**[आसिध्वम्]** 'आसिक् उपवेशने' (१११९) आस् । अद्यत० ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः ।

**[अस्तुध्वम्]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । ह्यस्तनी ध्वम् । 'अड् धातोरादि०' (४।४।२९) अडागमः ।।छ।।

### हान्तस्थाञ्जीड्भ्यां वा ।।२।१।८१।।

**[हान्तस्थाञ्जीड्भ्याम्]** हश्च अन्तस्था(:) च = हान्तस्थम् । 'क्लीबे' (२।४।९७) ह्रस्वस्तस्मात् । ञिश्च इट् च = ञीटौ । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) न० → ञ० । ताभ्यां = हान्तस्थाञ्जीड्भ्याम् । 'धुटस्तृतीयः' (२।१।७६) ट० → ड० ।

**[अग्राहिढ्वम्, अग्राहिध्वम्]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा' (३।४।६९) ञिट् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः । अनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ग्राहिषीढ्वम्, ग्राहिषीध्वम्]** ग्रह । आशीः सीध्वम् । 'स्वर-ग्रह-दृश०' (३।४।६९) ञिट्-इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[अनायिढ्वम्, अनायिध्वम्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[नायिषीढ्वम्, नायिषीध्वम्]** नी । आशीः सीध्वम् । 'स्वर-ग्रह-दृश०' (३।४।६९) ञिट् → इ. । 'नामिनोऽकलि०' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[अकारिढ्वम्, अकारिध्वम्]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् → इ । 'सो धि वा' (४।३।७२) सिज्लोपः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[कारिषीढ्वम्, कारिषीध्वम्]** कृ । आशीः सीध्वम् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् → इ. । 'नामिनो०' (४।३।५१) वृ० आर् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[अलाविढ्वम्, अलाविध्वम्]** 'लूग्श् छेदने' (१५१९) लू । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् → इ । 'सो धि वा' (४।३।७२) सिज्लोपः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अट् धातोरादि०' (४।४।२९) अडागमः ।

**[लाविषीढ्वम्, लाविषीध्वम्]** लू । आशीः सीध्वम् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् → इ । 'नामिनोऽकलि०' (४।३।५१) वृ० औ । 'ओदौतो०' (१।२।२४) आव् । 'नाम्यन्तस्था० (२।३।१५) स० → ष० ।

**[जगृहिढ्वे, जगृहिध्वे]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । परोक्षा ध्वे । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद्-गृह् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) गृ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । अनेन ध० → ढ० ।

**[अग्रहीढ्वम्, अग्रहीध्वम्]** ग्रह् । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[ग्रहीषीढ्वम्, ग्रहीषीध्वम्]** ग्रह् । आशीः सीध्वम् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[उपदिदीयिढ्वे, उपदिदीयिध्वे]** 'दीङ्च् क्षये' (१२४४) दी, उपपूर्व० । परोक्षा ध्वे । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । 'दीय् दीङः क्ङिति स्वरे' (४।३।९३) दीय् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) दीय् द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । अनेन ध० → ढ० ।

**[आयिढ्वम्, आयिध्वम्]** 'अयि गतौ' (७९०) अय् । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । सो धि वा (४।३।७२) सिज्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृ० आ० ।

**[तत्वरिढ्वे, तत्वरिध्वे]** 'ञित्वरिष् संभ्रमे' (१०१०) त्वर् । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अत्वरिढ्वम्, अत्वरिध्वम्]** त्वर् । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[ववलिढ्वे, ववलिध्वे]** 'वलि संवरणे' (८०७) वल् । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् ।

**[अवलिढ्वम्, अवलिध्वम्]** वल् । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[लुलुविढ्वे, लुलुविध्वे]** 'लूगृश् छेदने' (१५१९) लू । परोक्षा ध्वे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनं । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् ।

**[अलविढ्वम्, अलविध्वम्]** लू । अद्यतनी ध्वम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ० । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'सो धि वा' (४।३।७२) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[घानिषीध्वम्]** 'हनंक् हिंसा-गत्योः' (११००) हन् । आशीः सीध्वम् । 'स्वर-ग्रह-दृश-हन्भ्यः०' (३।४।६९) ञिट् । 'ञि-णवि घन्' (४।३।१०१) घन् आदेशः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[आसिषीध्वम्]** 'आसिक् उपवेशने' (१११९) आस् । आशीः सीध्वम् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।।छ।।

### हो धुट्-पदान्ते ।।२।१।८२।।

**[हो धुट्-पदान्ते]** ह् षष्ठी ङस् । धुट् च पदान्तश्च = धुट्पदान्तम्, तस्मिन् = धुट्पदान्ते । सप्तमी ङि ।

**[मधुलिट्]** 'लिहींक् आस्वादने' (११२९) लिह्, मधुपूर्व० । मधु लेढीति क्विप् मधुलिट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[मधुलिड्भ्याम्]** मधु लीढः इति क्विप् मधुलिहौ, ताभ्यां = मधुलिड्भ्याम् । तृतीया भ्याम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ह० ⟶ ढ० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ढ० ⟶ ड० ।

**[मधुलिड्वत्]** मधुलिडिव । 'स्यादेरिवे' (७।१।५२) वत्प्र० ।

**[मधुलिट्कल्पः]** ईषदपरिसमाप्तो मधुलिट् । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० ⟶ कल्प० ।

**[गुडलिण्मान्]** गुडं लेढीति क्विप गुडलिट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । अप्रयोगीत् (१।१।३७) क्विप्लोपः । गुडलिहो विद्यन्ते यस्याऽसौ गुडलिण्मान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । अनेन ह० ⟶ ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० ⟶ ड० । 'प्रत्यये च' (१।३।२) ड० ⟶ ण० ।

**[औजढत्]** 'वहीं प्रापणे' (९९६) वह् । उह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृद् व० ⟶ उ० । अनेन ह० ⟶ ढ० । 'अधश्चतुर्थात् त-थोर्धः' (२।१।७९) त० ⟶ ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० ⟶ ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्विला दीर्घः । ऊढमाख्यत् । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच् । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि । 'णि-श्रि-द्रु-सु-कमः०' (३।४।५८) ङप्र० ⟶ अ. । 'लोकात्' (१।१।३) ऊपाठउ विश्लेषियइ । 'स्वरादेर्द्वितीयः' (४।१।४) द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृ० ऊ० → औ० ॥ छ ॥

**भ्वादेर्दादेर्घः ॥२।१।८३॥**

**[भ्वादेर्दादेर्घः]** भू आदिर्यस्याऽसौ भ्वादिस्तस्य = भ्वादेः । द आदिर्यस्याऽसौ दादिस्तस्य = दादेः । घ प्रथमा सि ।

**[दग्धा]** 'दहं भस्मीकरणे' (५५२) दह् । श्वस्तनी ता । अनेन ह० → घ० । 'अधश्चतुर्थात् त-थोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[दग्धुम्]** दह् । दहनाय = दग्धुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । अनेन ह० → घ० । 'अधश्चतुर्थात् त-थोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[दोग्धा]** 'दुहींक् क्षरणे' (११२७) दुह् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० उ० → ओ० । अनेन ह० → घ० । 'अधश्चतुर्थात् त-थोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[दोग्धुम्]** 'दुहींक् क्षरणे' (११२७) दुह् । दोहनाय = दोग्धुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । शेषं 'दोग्धा' वत् ।

**[अधाक्षीत्]** 'दहं भस्मीकरणे' (५५२) दह् । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ० । अनेन ह० → घ० । 'गडदबादे०' (२।१।७७) द० → ध० । 'अघोषे०' (१।३।५०) घ० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-ष संयोगे क्ष । 'अड् धातो०' (४।४।२९) अट् ।

**[गोधुक्]** 'दुहींक् क्षरणे' (११२७) दुह्, गोपूर्व० । गां दोग्धीति क्विप् गोधुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ह० → घ० । 'ग-ड-द-बादेः०' (२।१।७७) द० → ध० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[काष्ठधक्]** काष्ठं दहतीति क्विप् काष्ठधक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन ह० → घ० । 'ग-ड-द-बादेः०' (२।१।७७) द० → ध० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[गोधुग्भ्याम्]** गां दुग्धः इति ।

**[काष्ठधग्भ्याम्]** काष्ठानि दग्धः (दहतः) इति ।

**[गोधुक्षु]** गां दुहन्तीति, तेषु ।

**[काष्ठधक्षु]** काष्ठानि दहन्तीति, तेषु ।

**[दामलिट्]** दामलिह्यतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । ['योऽशिति' (४।३।८०) यलोपः ।?] 'य्वोः०' (४।४।१२१) यलोपः ।

~ **[दृषद्धुट्]** 'गुहौग् संवरणे' (९३५) गुह्, दृषद्पूर्व० । दृषदं गूहतीति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । दृषद्गुहमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र०→य० । दृषद्गुह्यतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ग-ड-द-बादेः०' (२।१।७७) ग० → घ० । 'धुटस्तृतीयः' (२।१।७६) ढ०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

→ ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[मधुलिट्]** मधु लेढीति क्विप् ।

**[अदात्]** 'डुदांग्क् दाने' (११३८) दा । अद्यतनी दि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[गोदुहौ]** गां दुग्धः इति गोदुहौ ।

**[गोदुहः]** गां दुहन्तीति गोदुहः ॥ छ ॥

**मुह-द्रुह-ष्णुह-ष्णिहो वा ॥२।१।८४॥**

**[मुहद्रुहष्णुहष्णिहो वा]** मुहश्च द्रुहश्च ष्णुहश्च ष्णिहश्च = मुहद्रुहष्णुहष्णिह्, तस्य । वा अव्यउ । प्रथमा सि ।

**[उन्मुक्, उन्मुट्]** 'मुहौच् वैचित्त्ये' (१२३८) मुह्, उत्पूर्व० । उन्मुह्यतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ह० → घ० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । पक्षे 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[उन्मुग्भ्याम्, उन्मुड्भ्याम्]** उन्मुह्यतः इति क्विप् उन्मुहौ, ताभ्याम् ।

**[मित्रध्रुक्, मित्रध्रुट्]** 'द्रुहौच् जिघांसायाम्' (१२३९) द्रुह्, मित्रपूर्व० । मित्राय द्रुह्यतीति । अनेन ह० → घ० । 'ग-ड-द-बादेः०' (२।१।७७) द० → ध० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । पक्षे 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ग-ड-द-बादेः०' (२।१।७७) द० → ध० । 'धुटस्तृतीयः' (२।१।७६) ढ० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[मित्रध्रुग्भ्याम्, मित्रध्रुड्भ्याम्]** मित्राय द्रुह्यतः इति क्विप् मित्रद्रुहौ, ताभ्याम् ।

**[उत्स्नुक्, उत्स्नुट्]** 'ष्णुहौच् उद्गिरणे' (१२४०) ष्णुह्, उत्पूर्व० । 'षः सोऽष्टयै० (२।३।९८) स्नुह् । ऊर्ध्वं स्नुह्यतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[उत्स्नुग्भ्याम्, उत्स्नुड्भ्याम्]** ऊर्ध्वं स्नुह्यतः इति क्विप् उत्स्नुहौ, ताभ्याम् ।

**[चेलस्निक्, चेलस्निट्]** 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह्, चेलपूर्व० । 'षः सोऽष्टयै०' (२।३।९८) स्निह् । चेलं स्निह्यतीति क्विप् चेलस्निक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[चेलस्निग्भ्याम्, चेलस्निड्भ्याम्]** चेलं स्निह्यतः इति क्विप् चेलस्निहौ, ताभ्याम् ।

**[उन्मुहौ]** उन्मुह्यतः इति क्विप् उन्मुहौ ।

**[उन्मुहः]** उन्मुह्यन्तीति क्विप् उन्मुहः ।

**[दोद्रोग्धि, दोद्रोढि]** द्रुह् । भृशं पुनः पुनर्वा द्रुह्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० उ०→ओ० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ → द्रो । अनेन ह० → घ० । 'अधश्चतुर्थात्०' (२।१।७९) ति० → धि० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० । पक्षे 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्०' (२।१।७९) ति० → धि० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धि० → ढि० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ढस्तड्ढे' (१।३।४२) ढलोपः ।

नहा-ऽऽहोर्ध-तौ ॥२।१।८५॥

**[नहाऽऽहोर्धतौ]** नहश्च आह् च = नहाहौ, तयोः = नहाहोः, षष्ठी ओस् । धश्च तश्च = धतौ ।

**[नद्धा]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः (२।३।९७) नह् । श्वस्तनी ता । अनेन ह० → ध० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तृतीयस्तृ०' (१।३।४९) ध० → द० ।

**[उपानत्]** उपनह्यते इति क्विप् उपानत् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'गति-कारकस्य-नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) दीर्घत्वं प० → पा० ।

**[परीणत्]** परिनह्यते इति क्विप् परीणत् । 'गति-कारकस्य-नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) दीर्घत्वं रि० → री० । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) न० → ण० ।

**[उपानद्भ्याम्]** उपनह्येते इति क्विप् उपानहौ, ताभ्याम् ।

**[उपानत्कल्पः]** ईषदपरिसमाप्त उपानद् = उपानत्कल्पः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० ।

**[आत्थ]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० सिव् । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) परोक्षा थव्-आह्० । अनेन ह० → त० ।

**[उपानहौ]** उपनह्येते इति क्विप् उपानहौ ।

**[आह]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० तिव् । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) परोक्षा णव्-आह् ।

**[आहतुः]** ब्रू । वर्त्त० तस् । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) परोक्षा अतुस्- आह् ।

**[आहुः]** ब्रू । वर्त्त० अन्ति । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) परोक्षा उस्-आह् ॥ छ ॥

च-जः क-गम् ॥२।१।८६॥

**[चजः]** चश्च जश्च = चज(ज्), तस्य = चजः ।

**[कगम्]** कश्च गश्च = कगम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[वक्तुम्]** 'वचंक् भाषणे' (१०९६) वच् । वचनाय → वक्तुम् । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० । अनेन कत्वम् ।

**[ओदनपक्]** ओदनं पचतीति क्विप् ।

**[वाक्त्वम्]** वाचो भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[त्यक्तुम्]** 'त्यजं हानौ' (१७२) त्यज् । त्यजनाय = त्यक्तुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

**[अर्द्धभाक्]** 'भजीं सेवायाम्' (८९५) भज्, अर्द्धपूर्व० । अर्द्धं भजते = अर्द्धभाक् । 'भजो विण्' (५।१।१४६) विण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अप्रयोगीत्' (१।१।३७) विण्लोपः ।

**[स्वप्नक्]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपितीति । 'तृषि-धृषि-स्वपो नजिङ्' (५।२।८०) नजिङ्प्र० → नज् । अनेन ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[तृष्णक्]** 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तृष्यतीति । 'तृषि-धृषि-स्वपो नजिङ्' (५।२।८०) नजिङ्प्र० → नज् । अनेन ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[धृष्णक्]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । धृष्णोतीति । 'तृषि-धृषि-स्वपो नजिङ्' (५।२।८०) नजिङ्प्र० → नज् । अनेन ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[वाचौ]** वक्तः इति वाचौ । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्०' (५।२।८३) क्विप्प्र० - वाच् ।

**[वाचः]** वचन्तीति वाचः । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्०' (५।२।८३) क्विप्प्र० - वाच् ।

**[तच्चञ्चुः]** तद् । तेन वित्तः इति तच्चञ्चुः । 'तेन वित्ते चञ्चु-चणौ' (७।१।१७५) चञ्चुप्र० ।

**[तच्चणः]** तद् । तेन वित्तः इति तच्चणः । 'तेन वित्ते चञ्चु-चणौ' (७।१।१७५) चणप्र० ।

**[अज्झलौ]** अच् च हल् च = अज्झलौ । प्रथमा औ । 'धुटस्तृतीयः' (२।१।७६) च० → ज० । 'ततो हश्चतुर्थः' (१।३।३) ह० → झ० ।। छ ।।

**यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः ।।२।१।८७।।**

**[यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः]** यजश्च सृजश्च मृजश्च राजश्च भ्राजश्च भ्रस्जश्च व्रश्चश्च परिव्राजश्च = यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राज्, तस्य ।

**[शः षः]** श् षष्ठी ङस् । ष प्रथमा सि ।

**[देवेट्]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज्, देवपूर्व० । देवेभ्यो यजतीति क्विप् देवेट् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[उपयट्]** उपयजते इति उपयट् । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विज्लोपः ।

**[उपयड्भ्याम्]** उपयजतः इति उपयजौ, ताभ्याम् ।

**[तीर्थसृट्]** 'सृजंत् विसर्गे' (१३४९) सृज्, तीर्थपूर्व० । तीर्थं सृजतीति क्विप् तीर्थसृट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[तीर्थसृड्भ्याम्]** तीर्थं सृजतः इति क्विप् तीर्थसृजौ, ताभ्याम् ।

**[मार्ष्टा]** 'मृजौक् शुद्धौ' (१०९७) मृज् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृ० आ० । अनेन ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[मार्ष्टुम्]** मार्जनाय = मार्ष्टुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । मृजोऽस्य वृद्धिः' (४।३।४२) वृ० आ० । अनेन ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[कंसपरिमृट्]** 'मृजौक् शुद्धौ' (१०९७) मृज्, कंसपूर्व० । कंस परिमार्ष्टीति क्विप् कंसपरिमृट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[कंसपरिमृड्भ्याम्]** कंसं परिमृष्टः इति क्विप् कंसपरिमृजौ, ताभ्याम् ।

**[विभ्राट्]** 'टुभ्राजि दीप्तौ' (८९४) भ्राज्, विपूर्व० । विशेषेण भ्राजते इति क्विप् विभ्राट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[विभ्राड्भ्याम्]** विशेषेण भ्राजेते इति क्विप् विभ्राजौ, ताभ्याम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[राष्टिः]** 'राजृग् दीप्तौ' (८९३) राज् । राजनं = राष्टिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[भ्राष्टिः]** 'टुभ्राजि दीप्तौ' (८९४) भ्राज् । भ्राजनं = भ्राष्टिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[भ्रष्टा, भर्ष्टा]** 'भ्रस्जींत् पाके' (१३१६) भ्रस्ज् । श्वस्तनी ता । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलुक् । 'भृज्जो भर्ज्' (४।४।६) भर्ज् आदेशः । अनेन षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[भ्रष्टुम्, भर्ष्टुम्]** भर्ज्जनाय । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलुक् । 'भृज्जो भर्ज्' (४।४।६) भर्ज् आदेशः । अनेन षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[धानाभृड्]** धानां(ना) भृज्जतीति क्विप् धानाभृड् । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् भृ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलुक् ।

**[धानाभृड्भ्याम्]** धानां(ना) भृज्जतः इति क्विप् धानाभृज्जौ, ताभ्याम् ।

**[व्रष्टुम्]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । व्रश्चनाय । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

**[मूलवृट्]** मूलं वृश्चतीति क्विप् मूलवृट् । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[मूलवृड्भ्याम्]** मूलं वृश्चतः इति क्विप् मूलवृश्चौ, ताभ्याम् ।

**[परिव्राड्भ्याम्]** ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज्, परिपूर्व० । परिव्रजतः इत्येवंशीलौ परिव्राजौ । 'दिद्युद्-ददृद्-जगज्जुहू०' (५।२।८३) क्विप्प्र० - व्राज् आदेशः ।

**[लेष्टा]** 'लिशंत् गतौ' (१४१७) लिश् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० इ० → ए० ।

**[लेष्टुम्]** लेशनाय = लेष्टुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० इ० → ए० ।

**[लिड्भ्याम्]** लिशतः इति क्विप् लिशौ, ताभ्याम् ।

**[प्रष्टा]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । श्वस्तनी ता ।

**[प्रष्टुम्]** प्रच्छनाय = प्रष्टुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

**[शब्दप्राड्]** शब्दं पृच्छतीति क्विप् शब्दप्राड् । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) च्छ० → श० । अनेन षत्वम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[शब्दप्राड्भ्याम्]** शब्दं पृच्छतः इति क्विप् शब्दप्राशौ, ताभ्याम् ।

**[विभ्राग्भ्याम्]** विभ्राजेते इति क्विप् विभ्राजौ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । ताभ्याम् ।

**[देवेजौ]** देवान् यजतः इति देवेजौ ।

**[देवेजः]** देवान् यजन्तीति देवेजः ।

**[रज्जुसृजौ]** रज्जुं सृजतः इति क्विप् रज्जुसृजौ ।

**[कंसपरिमृजौ]** कंसं परिमृष्टः इति कंसपरिमृजौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सम्राजौ]** संराजेते इति सम्राजौ ।

**[विभ्राजौ]** विभ्राजेते इति विभ्राजौ ।

**[धानाभृज्जौ]** धानां(ना) भृज्जतः इति धानाभृज्जौ ।

**[परिव्राजौ]** परिव्रजतः इत्येवंशीलौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र०-व्राज् आदेशः ।

**[शब्दप्राशौ]** शब्दं पृच्छतः इत्येवंशीलौ ।

**[समुशौ]** 'उछैत् विवासे' (१३४४) उछ्, संपूर्व० । समुच्छतः इति क्विप् समुशौ । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) च्छ्० → श० ।

**[असृक्]** 'असूच् क्षेपणे' (१२२१) अस् । अस्यतीति । 'ऋधि-प्रथि-भिषिभ्यः कित्' (उणा० ८७४) किद् अजप्र०-बाहुलकादस्य ऋ० ।

**[पथिप्राच्छौ]** पन्थानं पृच्छतः इत्येवंशीलौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० ।

**[पथिप्राच्छः]** पन्थानं पृच्छन्तीत्येवंशीलाः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० ।

**[शब्दप्राच्छौ]** शब्दं पृच्छतः इत्येवंशीलौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप् ।

**[शब्दप्राच्छः]** शब्दं पृच्छन्तीत्येवंशीलाः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० । तन्मात्रं यथास्थाने दीर्घत्वम् ।

**[समुच्छौ]** समुच्छतः इत्येवंशीलौ । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० ।

**[समुच्छः]** समुच्छन्तीत्येवंशीलाः । 'दिद्युद्-ददृद्०' (५।२।८३) क्विप्प्र० ।। छ ।।

**संयोगस्यादौ स्कोर्लुक** ।।२।१।८८।।

**[संयोगस्यादौ]** 'युजूंपी योगे' (१४७६) युज्, संपूर्व० । संयुज्यन्ते वर्णा अस्मिन्निति संयोगः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० उ० → ओ० । 'क्तेऽनिटश्च-जोः क-गौ घिति (४।१।१११) ज० → ग० । तस्य । आदि सप्तमी ङि ।

**[स्कोर्लुक्]** स् च क् च = स्कौ, तयोः । लुक् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[लग्नः]** 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । लज्जते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'डीय-श्व्यैदितः क्तयोः' (४।४।६१) इड्निषेधः । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । अनेन सलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० ।

**[लग्नवान्]** लज्जते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० ।

**[साधुलक्]** साधु लज्जते इति क्विप् साधुलक् ।

**[साधुलग्भ्याम्]** साधु लज्जेते इति क्विप् साधुलज्जौ, ताभ्याम् ।

**[साधुमक्]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । साधुं(धु) मज्जतीति क्विप् साधुमक् ।

**[साधुमग्भ्याम्]** साधुं(धु) मज्जतः इति क्विप् साधुमज्जौ, ताभ्याम् ।

卐**[मग्नः]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । मज्जति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'मस्जेः सः' (४।४।११०) स० → न० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५)

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नलोपः ।

**[वृक्णः]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । वृश्च्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ० । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । दन्त्यापदिष्टकार्यं तालव्यस्यापि भवति इति तस्य दर्शितं दन्तस्य ककुङ् श्वकुङ् इति पठितस्य वस्केः इति वेदितव्यमिति शेषः । अनेन सलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्रथमा सि ।

**[मूलवृट्]** मूलं वृश्चतीति क्विप् मूलवृट् । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ० ।

**[मूलवृड्भ्याम्]** मूलं वृश्चतः इति क्विप् मूलवृश्चौ, ताभ्यां । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् वृ० ।

**[भृष्टः]** 'भ्रस्जींत् पाके' (१३१६) भ्रस्ज् । भृज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'ग्रह-वस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृद् भृ० । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[भृष्टवान्]** भृज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० ।

**[यवभृट्]** यवान् भृज्जतीति क्विप् यवभृट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[यवभृड्भ्याम्]** यवान् भृज्जतः इति क्विप् यवभृज्जौ, ताभ्याम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[तष्टः]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । तक्षते(ति) स्म, तक्ष्णोति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन ।

**[काष्ठतट्]** काष्ठानि तक्ष्णोतीति क्विप् काष्ठतट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[काष्ठतड्भ्याम्]** काष्ठानि तक्ष्णुतः इति क्विप् काष्ठतक्षौ, ताभ्याम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[अष्टः]** 'अक्षौ व्याप्तौ च' (५७०) अक्ष् । अक्षति स्म । अक्ष्णोति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन कलोपः । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[अष्टवान्]** अक्षति स्म । अक्ष्णोति स्म । क्त-क्तवतू (५।१।१७४) क्तवतुप्र० ।

**[तृणाट्]** तृणान्यक्ष्णोतीति क्विप् तृणाट् ।

**[तृणाड्भ्याम्]** तृणान्यक्षतः इति क्विप् तृणाक्षौ, ताभ्याम् ।

**[तृणाट्कल्पः]** ईषदपरिसमाप्तस्तृणाट् = तृणाट्कल्पः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० → कल्प० ।

**[आचष्टे]** 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष्, आङ्पूर्व० । वर्त्त० ते । अनेन कलोपः ।

**[साता]** 'षणूयी दाने' (१५००) षण् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सन् । सन्यते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त० । 'आः खनि-सनि-जनः' (४।२।६०) न० → आ० । 'आत्' (२।४।१८) आप् ।

**[शाशङ्क्ति]** 'शकुङ् शङ्कायाम्' (६१७) शक् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । भृशं पुनः पुनर्वा शङ्कते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) शङ्क् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० तिव् । 'म्नां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० ।

**[वावङ्क्ति]** 'वकुङ् कौटिल्ये' (६०८) वक् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । भृशं पुनः पुनर्वा वङ्क्ते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) वङ्क् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० तिव् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० ।

**[नर्नर्ति]** 'नृतैच् नर्तने (११५२) नृत् । भृशं पुनः पुनर्वा नर्नर्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) नृत् द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) नृ० → न० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'रि-रौ च लुपि' (४।१।५६) र् । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[क्षेत्रप्रात्]** क्षेत्रं प्राड्डतीति क्विप् क्षेत्रप्रात् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) डलोपः । 'विरामे वा' (१।३।५१) द० → त० ।

**[गृहप्रात्]** गृहं प्राट्टत इति क्विप् गृहप्रात् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) टलोपः । 'विरामे वा' (१।३।५१) द० → त० ।

**[अत्]** अट्टति(ते) इति स्वमत-परमतयोः 'न ब-द-नं संयोगाऽऽदिः' (४।१।५) इत्यत्र विशेषः, सिद्धान्ते तु अट्टिटिषत इति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'पदस्य' (२।१।८९) टलोपः ।

**[पृथक्स्थाता]** पृथक् तिष्ठतीति पृथक्स्थाता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ० । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अत्र पृथक्शब्दः कान्तोऽव्ययम्, न तु अजन्त औणादिकः, तदा हि 'च-जः क-गम्' (२।१।८६) इति कृतस्य गत्वस्य परे कार्येऽसत्त्वात् तदादेशस्याऽपि कत्वस्याऽसत्त्वाद् द्वयङ्गविकलता स्यात् ।

**[वास्यर्थम्]** वास्यै इदं = वास्यर्थम् ।

**[काक्यर्थम्]** काक्यै इदं = काक्यर्थम् ।

**[मांसपिपक्]** मांस 'डुपचींष् पाके' (८९२) पच् । पक्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) पच् सउं द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'सन्यस्य' (४।१।५९) इ० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष, मांसं पिपक्षतीति क्विप् । 'अतः' (४।३।८२) अकारलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'पदस्य' (२।१।८९) षलोपः ।

**[वचोविवक्]** 'वचंक् भाषणे' (१०९६) वच् । वक्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'सन्यस्य' (४।१।५९) इ० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वचो विवक्षतीति क्विप् । 'अतः' (४।३।८२) अकारलोपः । 'पदस्य' (२।१।८९) षलोपः ॥ छ ॥

**पदस्य** ॥२।१।८९॥

**[पदस्य]** पद्यतेऽनेनेति पद्यं (दं), तस्य ।

**[पुंवत्]** पुमानिवेति पुंवत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० ।

**[पुंरूप्यः]** पुंस आगतः = पुंरूप्यः । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० । 'पदस्य' (२।१।८९)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सलोपः ।

**[पुंमयः]** पुंस आगतः = पुंमयः । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय० । 'पदस्य' (२।१।८९) सलोपः ।

**[पुंजातीयः]** पुमान् प्रकारोऽस्य = पुंजातीयः । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय० । 'पदस्य' (२।१।८९) सलोपः ।

**[भूयान्]** अयं बहु(ः)२, अयमतिशयेन बहुर्भूयान् । 'गुणाङ्गाद् वेष्ठेयसू (७।३।९) ईयसुप्र० । 'भूर्लुक् चेवर्णस्य' (७।४।४१) भूरादेशः ईकारश्च लुक्, । अवादेशो न, ऊकार प्रश्लेषात्, विधानं भूमेत्यत्र सफलम् ।

**[स्कन्त्वा]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द् । स्कन्दनं पूर्वं । 'प्राक्काले' (५।४।४७) क्त्वाप्र० ।

**[स्यन्त्वा]** 'स्यन्दौङ् स्रवणे' (९५६) स्यन्द् । स्यन्दनं पूर्वं । 'प्राक्काले' (५।४।४७) क्त्वाप्र० ॥ छ ॥

**रात् सः ॥२।१।९०॥**

**[रात् सः]** र पञ्चमी ङसि । स प्रथमा सि ।

**[चिकीः]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः → कॄ । 'ॠतां क्ङितीर्' (४।४।११६) किर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'सन्-यङश्च' (४।१।३) कीर् द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रेफलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नाऽन्तरेपि' (२।३।१५) स० → ष० । चिकीर्षतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[चिकीर्षुः]** चिकीर्षणं = चिकीर्षुः । 'सन्-भिक्षा-ऽऽशंसेरुः' (५।२।३३) उप्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[जिहीः]** 'हृंग् हरणे' (८८५) हृ । हर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) हिर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'सन्-यङश्च' (४।१।३) हीर् द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रेफलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वं । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । जिहीर्षतीति क्विप् । 'अतः' (४।३।८२) अलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[जिहीर्षुः]** जिहीर्षणं = जिहीर्षुः । 'सन्-भिक्षा-ऽऽशंसेरुः' (५।२।३३) उप्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कटचिकीः]** कटं कर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अग्रे पूर्ववत् । कटं चिकीर्षतीति क्विप् ।

**[पटजिहीः]** पटं हर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अग्रे पूर्ववत् । पटं जिहीर्षतीति क्विप् ।

**[ऊर्क्]** 'ऊर्जण् बल-प्राणनयोः' (१५८२) ऊर्ज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । ऊर्जयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[ऊर्ग्भ्याम्]** ऊर्जयतः इति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः, ताभ्याम् ।

**[न्यमार्ट्]** 'मृजौक् शुद्धौ' (१०९७) मृज्, निपूर्व० । हयस्तनी दिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मृजोऽस्य वृद्धिः' **(४।३।४२) वृ० मार्ज्** । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दिलोपः । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० । 'अड् **धातोरादिर्ह्यस्तन्यां चाऽमाङ्'** (४।४।२९) अडागमः ।

**[अजर्घाः]** 'गृधूच् अभिकाङ्क्षायाम्' (११८७) गृध् । भृशं पुनः पुनर्वा गृध्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) द्विर्वचनं । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) धलोपः । 'ऋतोऽत्' (४।१।३८) गृ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'रि-रौ च लुपि' (४।१।५६) रोऽन्तः । ह्यस्तनी सिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'सेः स्-द्-धां च रुर्वा' (४।३।७९) सिलोपः ध० → रु० । 'रो रे लुग् दीर्घश्चादिदुतः' (१।३।४१) रलोपः - पूर्वस्य दीर्घत्वं । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[अपास्पाः]** 'स्पर्धि संघर्षे' (७४२) स्पर्ध् । भृशं पुनः पुनर्वा स्पर्धते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) स्पर्ध् द्विर्वचनं । 'अघोषे शिटः' (४।१।४५) सलोपः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'रि-रौ च लुपि' (४।१।५६) रोऽन्तः(?) । ह्यस्तनी सिव् । 'सेः स्-द्-धां च रुर्वा' (४।३।७९) सिलोपः - ध० → रु० । 'रो रे लुग् दीर्घश्चादिदुतः' (१।३।४१) रलोपः – पूर्वस्य दीर्घत्वं । 'अड् धातोरादि०' (४।४।२९) अडागमः ॥ छ ॥

**नाम्नो नोऽनह्नः ॥२।१।९१॥**

**[नाम्नः]** नामन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[नोऽनह्नः]** न् षष्ठी ङस् । न अहः = अनहः, तस्य ।

**[वृत्रहा]** 'हनंक् हिंसा-गत्योः' (११००) हन्, वृत्रपूर्व० । वृत्रं हतवान् । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[दण्डी]** दण्डो विद्यते यस्याऽसौ दण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[वाग्मी]** वाच् । प्रशस्ता वाक् अस्याऽस्ति । 'ग्मिन्' (७।२।२५) ग्मिन्प्र० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

त्रिषु प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन नलोपः ।

**[राजकाम्यति]** राजानमिच्छति । 'द्वितीयायाः काम्यः' (३।४।२२) काम्यप्र० ।

**[राजकल्पः]** ईषदपरिसमाप्तो राजा = राजकल्पः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० → कल्प० ।

**[अहोरूपम्]** अहन् । प्रशस्तमहः = अहोरूपम् । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० । 'अह्नः' (२।१।७४) न० → रु० । 'घोषवति' (१।३।२१) उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ० ।

**[दीर्घाहा निदाघः]** दीर्घाण्यहानि यस्याऽसौ । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[हे अहः!]** 'रो लुप्यरि' (२।१।७५) रत्वम् ।

**[हे दीर्घाहः!]** 'अह्नः' (२।१।७४) रत्वम् ।

**[अहन्नहितम्]** 'हनंक् हिंसा-गत्योः' (११००) हन् । ह्यस्तनी दिव् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अड् धातोरादि०' (४।४।२९) अडागमः । अहित ॥छ॥

नाऽऽमन्त्र्ये ॥२।१।९२॥

[नाऽऽमन्त्र्ये] न 'मन्त्रिण् गुप्तभाषणे' (१८४०) मन्त्र्, आङ्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । आमन्त्र्यते इति' आमन्त्र्यम् । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः, तस्मिन् ।

[हे बहुराजन्!] ईषदूनो राजा = बहुराजा । 'नाम्नः प्राग् बहुर्वा' (७।३।१२) बहुप्र०, तस्य संबोधनम् ॥ छ ॥

क्लीबे वा ॥२।१।९३॥

[क्लीबे वा] क्लीब सप्तमी ङि । वा प्रथमा सि ॥

[हे चर्म !, हे चर्मन् !] चर्मन् । 'आमन्त्र्ये' (२।२।३२) सि । अनेन ।

[हे दाम !, हे दामन् !] दामन् । 'आमन्त्र्ये' (२।२।३२) सि । अनेन ॥ छ ॥

मा-ऽवर्णान्तोपान्ता-ऽपञ्चमवर्गान्मतोर्मो वः ॥२।१।९४॥

[माऽवर्णान्तोपान्ताऽपञ्चमवर्गात्] मश्च अवर्णश्च = मावर्णौ, अन्तश्च उपान्तश्च = अन्तोपान्तौ, मावर्णौ अन्तोपान्तौ यस्याऽसौ मावर्णान्तोपान्तः, पञ्चमश्चासौ वर्गश्च = पञ्चमवर्गः, न पञ्चमवर्गः = अपञ्चमवर्गः, 'नञत्' (३।२।१२५) न० → अ० । मावर्णान्तोपान्तश्च अपञ्चमवर्गश्च = मावर्णान्तोपान्तापञ्चमवर्गम्, तस्मात् = मावर्णान्तोपान्तापञ्चमवर्गात् ।

[मतोर्मो वः] मतु षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । म् षष्ठी ङस् । व प्रथमा सि ।

[अहर्वान्] 'अह्नः' (२।१।७४) रेफु ।

[भास्वान्] भासो विद्यन्ते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत्० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन म० → व० ।

[समिद्वान्] समिधो विद्यन्ते यस्याऽसौ ॥ छ ॥

नाम्नि ॥२।१।९५॥

[नाम्नि] नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अनोऽस्य वा लुक् ।

[अहीवती] अहि । अहयो विद्यन्ते यस्यां सा । अहीनां निवासः । अहीनामदूरभवा । अहिभिर्निर्वृत्ता अहीवती । एवमग्रेऽपि । 'नद्यां मतुः' (६।२।७२) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । 'अनजिरादिबहुस्वरशरादीनां मतौ' (३।२।७८) दीर्घत्वम् ।

[कपीवती] कपयोऽत्र सन्ति । 'नद्यां मतुः' (६।२।७२) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । 'अनजिरादिबहुस्वर०' (३।२।७८) दीर्घत्वम् ।

[मणीवती] मणयोऽत्र सन्ति । 'नद्यां मतुः' (६।२।७२) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । 'अनजिरादिबहुस्वर०' (३।२।७८) दीर्घत्वम् ।

[मुनीवती] मुनयोऽत्र सन्ति । 'नद्यां मतुः' (६।२।७२) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । 'अनजिरादिबहुस्वर०' (३।२।७८) दीर्घत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ऋषीवती]** ऋषयोऽत्र सन्ति । 'नद्यां मतुः' (६।२।७२) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । 'अनजिरादिबहुस्वर०' (३।२।७८) दीर्घत्वम् ।

**[आसन्दीवान् नाम ग्रामः]** आस् अग्रे टुनदु समृद्धौ (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः-नन्द् । आसिक्रियां नन्दति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ० । पृषोदरादित्वात् ।

'आसिक् उपवेशने' (१११९) आस् । आस्ते इति आसन्दी । 'कुमुद०' (६।२।९६) इति वा अड्प्र० (?) । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । आसन्दी = वेत्रासनं सा अत्रास्ति । 'मध्वादेः' (६।२।७३) मतुप्र० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ॥ छ ॥

**चर्मण्वत्य-ऽष्ठीवच्-चक्रीवत्-कक्षीवद्-रुमण्वत् ॥२।१।९६॥**

**[चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत्]** चर्मण्वती च अष्ठीवच्च चक्रीवच्च कक्षीवच्च रुमण्वच्च, प्रथमा सि ।卐 सूत्रत्वात् सिलोपः । समाहारत्वादेकत्वं नपुंसकत्वं च ।

**[चर्मण्वती नाम नदी]** चर्माणि विद्यन्ते यस्यां सा । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'माऽवर्णान्तो-पान्ताऽपञ्चमवर्गान्मतोर्मो वः' (२।१।९४) म० → व० । अत एव सूत्रनिर्देशाद् नलोपाऽभावः-णत्वं च । 'अधातूदृदितः' (२।४।२) ङीप्र० ।

**[अष्ठीवान् जङ्घोरुसंधिः]** अस्थि । अस्थीनि विद्यन्ते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ।

**[चक्रीवान् नाम गर्दभः]** चक्रं विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ।

**[चक्रीवान् नाम राजा]** चक्राकारं लिङ्गं विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ।

**[कक्षीवान् नाम ऋषिः]** कक्ष्या विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ।

**[रुमण्वान् नाम पर्वतः]** लवणं विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० ।

नाममालामध्यान्(ये) यल्लक्षणेनाऽनुप(प)न्नं तत्सर्वं निपातनात् सिद्धम् ।

**[चर्मवती]** 'नाम्नि' (२।१।९५) म० → व० ॥ छ ॥

**उदन्वानब्धौ च ॥२।१।९७॥**

**[उदन्वानब्धौ]** उदन्वत् प्रथमा सि । अब्धि सप्तमी ङि ।

**[उदन्वान् घटः]** उदकं विद्यते* यस्याऽसौ उदन्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । अनेन उदकस्य उदन्निपात्यते । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ॥ छ ॥

**राजन्वान् सुराज्ञि ॥२।१।९८॥**

**[राजन्वान् सुराज्ञि]** राजन्वत् प्रथमा सि । सुराजन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अनोऽस्य वा लुक् ।

**[राजन्वान् देशः]** शोभनो राजा यस्मिन् देशे स = राजन्वान् देशः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । अनेन राजन्वत् निपातः ।

---

P. 卐 'अनतो लुप्' (१।४।५९) सिलोपः ।

P. * यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[राजन्वती पृथ्वी]** शोभनो राजा यस्यां पृथ्व्यां सा = राजन्वती पृथ्वी । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० । अनेन राजन्वत् निपातः ।

**[राजन्वत्यः प्रजाः]** शोभनो राजा यासां प्रजानां ताः = राजन्वत्यः प्रजाः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङी । अनेन राजन्वत् निपातः ॥ छ ॥

**नोर्म्यादिभ्यः** ॥२।१।९९॥

**[नोर्म्यादिभ्यः]** न प्रथमा सि । ऊर्मिशब्द आदिर्येषां ते = ऊर्म्यादयस्तेभ्यः ।

**[ऊर्मिमान्]** ऊर्मयो विद्यन्ते यत्राऽसौ ।

**[दल्मिमान्]**卐 दल्मिर्विद्यते यस्य ।

**[कुञ्चामान्]** कुञ्चा अत्राऽस्ति ।

**[द्राक्षामान्]** द्राक्षा अत्राऽस्ति । सर्वत्र 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । एवमग्रेऽपि ।

**[ज्योतिष्मती]** ज्योतिर्विद्यते यस्यां सा । 'तदस्या०' (७।२।१) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङी । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[महिष्मान्]** महिष । महिषाणामदूरभवा । 'नड-कुमुद-वेतस-महिषाड्डित्' (६।२।७४) डिद् मतुप्र० ।

**[कान्तिमती]** कान्तयो विद्यन्ते यस्यां सा ।

**[शिम्बीमती]** शिम्ब्यो विद्यन्ते यस्यां सा ।

**[हरिमती]** हरयो विद्यन्ते यस्यां सा ।

**[चारु(र)मती]** चार = वृक्षाः+ विद्यन्ते यस्यां सा ।

**[इक्षुमती]** इक्षूणि (इक्षवः) विद्यन्ते यस्यां सा ।

**[बन्धुमती]** बन्धवो विद्यन्ते यस्यां सा । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० ।

**[मधुमती]** मधु विद्यते यस्यां सा । 'मध्वादेः' (६।२।७३) मतुप्र० । 'अधातूदृदितः' (२।४।२) ङीप्र० ।

**[द्रुमती]** द्रुवो = वृक्षा विद्यन्ते यस्यां सा ।

**[वसुमती]** वसूनि = रत्नानि विद्यन्ते यस्यां सा ।

